॥स॰जी॰पं॰ ॥श्रीमत्सहजानंदस्वामिने नमः॥ यः स्वाश्रितान्धामनिजं सदक्षरं संप्रापयामास परात्परं बृहन्मत॥ अ॰१॥
॥२॥ कदुर्लभं साधनकोटिभिर्द्धे तस्मिन्नो धर्मकृते दयानिधौ॥१॥ सद्धर्माचरिताय यश्च सद्धर्मस्याविता तथा
॥सद्धर्मवक्तानं वंदे भक्तिधर्मात्मजं हरिम्॥२॥ त्रिविधैव पोषणां कृत्वा सद्धर्मस्य दयार्णवः॥ यः स्वाश्रितज
नास्वामी कृपया मास संतमन्ने॥३॥ अथ व्याख्यां पंचमस्य पेतस्य प्रसादतः॥ स्वश्च प्रकारणं स्यामहं हेतु
संज्ञां पयामति॥४॥ अष्टचत्वारिंशन्नाताद्यैतत्राध्यायैरुदाहृतः॥ धर्मोपदेशो हरिणा शिवरामाय दर्शितः
॥५॥ तत्रादिमस्त्रिभिः प्रोक्ता धर्माः साधारणा नृणाम्॥ वर्णधर्मो वर्णिधर्मैः षड्भ्यां तिच विस्तरात॥६॥
द्वाविंशासाततः प्रोक्ता गृहिधर्माः क्रमिस्तता॥ धर्मास्ततोऽष्टभिः स्त्रीणां द्विविधानां च तत्स्ततः॥७॥ त
तश्चैकेन संप्रोक्तास्तृतीयाश्रमिणां वृषाः॥ त्रिभिस्ततश्च संन्यासि धर्मास्सविस्तरतः शुभाः॥८॥ धर्माः
संकरजातीनां तत एकेन वेरिताः॥ प्रायश्चित्तविधिः प्रोक्तास्ततः षड्भिः क्रमिस्ततः॥९॥ जीर्णदुर्गपुरे
प्रोक्तास्ततश्चैकेन चित्रदा॥ हरिकेशादिमूर्तीनां कृप्रतिष्ठा विधानतः॥१०॥ ततश्च पंचभिः प्रोक्ता धर्मा
नैष्ठिकवर्णिनाम्॥ एकेनाथो दुर्गपुरे गोपीनाथ प्रतिष्ठितिः॥११॥ ततश्च दशभिः सांगो योगः प्रोक्तो
ऽनिलिमिस्ततः॥ ज्ञानानंदकृते केमन कृतिस्वरशानकम्॥१२॥ ततश्चैकेन सत्संगिजीवनग्रंथनंततः॥ ॥१॥

प्रोक्तं स्वस्थापितानां कृष्णतापः श्रीहरेः स्फुटम्॥१३॥ तत एकेन संप्रोक्ता सीयाश्चासनपूर्वकम्॥ हरेरं
तर्हिजीजावनरवत्संप्रदर्शिताः॥१४॥ एकेन ततउक्तं श्रीहरेर्जन्मतिथेर्व्रतम्॥ विधानसहितं सर्वपुरु
षार्थफलप्रदम्॥१५॥ ग्रंथस्यास्यानुक्रमश्च तत एकेन कीर्तितः॥ माहात्म्यसहितः स्पष्टं सर्वग्रंथशिरो
मणेः॥१६॥ इत्यध्यायैः क्रमस्यास्यानन कल्याणकारिणी॥ पंचमस्येयमुदिता कथा प्रकरणस्य हि॥ तत्रा
दौ प्रथमे धर्मशास्त्रवक्तृक्रिपूर्वकम्॥ निरूपितं श्रीहरिणा शोधधर्मस्य लक्षणम्॥१८॥ सुव्रत उवा
च॥ एकादशीशिवरामस्तं विप्रवर्यो नराधिप॥ पप्रच्छ प्रांजलिर्नत्वा नारायणमृषीश्वरम्॥१॥ ब्राह्मण उ
वाच॥ भगवच्छ्रोतुमिच्छामि नृणां धर्मं सनातनम्॥ त्वमेव सर्वधर्मज्ञो धर्ता धर्मस्य च प्रभो॥२॥ बुधैर
पि कदुर्ज्ञेयो धर्मो यं साम वेदवत्॥ केवलं त्वां समाश्रित्य वर्त्ते ते सर्वथाहि सः॥३॥ यदा यदा तु भवति ग्ला
निस्तस्याः प्रभूतले॥ तदा तदा भवतीर्यत्वं संपन्नकृपास्तितमच्युत॥४॥ वक्ता कर्त्ताऽविताचास्य नान्यस्त्वत्तो
ऽत्र विद्यते॥ न स्वर्गे न च पाताले न च ब्रह्मसदस्यपि॥५॥ तस्मात्त्वमाश्रमीः सार्कं वर्णानां च शृ यथा यथा॥
वक्तुमर्हसि सद्धर्मानितरेषां नृणां पंचमे॥६॥ सुव्रत उवाच॥ इति ब्राह्मण वर्यस्य प्रश्नं सर्वहितावहम्॥
श्रुत्वा स भगवान्स्नेप्रसन्नो धर्मरक्षकः॥७॥ श्रीनारायणमुनिरुवाच॥ नैःश्रेयस करोत्नृणां ब्रह्मन्॥

प्रश्नः कृतस्त्वया ॥ ततः सनातनान्धर्मानार्षवाक्यैर्वदामि ते ॥८॥ वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विप
र्ययः ॥ वेदो नारायणः साक्षात्स्वयंभूरिति गीयते ॥९॥ धर्मा वेदेन ये प्रोक्ता ऋषिभिस्तत्त्वदर्शिभिः ॥ प्रो
क्तास्त एव स्मृतिप्रमाणं नोऽस्ततः स्मृताः ॥१०॥ पुराणं न्यायमीमांसा धर्मशास्त्रांगमिश्रिताः ॥ वेदाः
स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥११॥ मन्वत्रिविष्णुहारीतयाज्ञवल्क्यांगिरोयमाः ॥ आपस्तंब
संवर्त्ताः कात्यायनबृहस्पती ॥१२॥ पराशरोशनःशंखलिखिता दक्षगौतमौ ॥ शातातपो वशिष्ठश्च ध
र्मशास्त्रप्रवर्त्तकाः ॥१३॥ संति चान्येऽपि मुनय एतद्धर्मानुसारिणः ॥ तदुक्तान्यपि शास्त्राणि प्रमाणत्वे
न गम्यताम् ॥१४॥ एतेषामुक्तिमात्रस्य प्रामाण्ये सत्यपि द्विज ॥ युगानुरूपो बोद्धव्यो विशेषः खलु सर्वदा ॥
१५॥ कृते तु मानवा धर्मास्त्रेतायां गौतमाहिताः ॥ द्वापरे शांखलिखिताः कलौ पाराशराः स्मृताः ॥१६॥
तेभ्योऽपि मोक्षधर्मोक्ताः श्रीमद्भागवतोदिताः ॥ भगवद्गीतया प्रोक्ता धर्माः श्रेयस्कराः कलौ ॥१७॥ श्रुति
स्मृत्युदितं धर्ममनुतिष्ठन्हि मानवः ॥ इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ॥१८॥ स षड्विधो व
र्णधर्मो धर्म आश्रमिणां तथा ॥ धर्मो वर्णाश्रमाणां च गौणो नैमित्तिकस्तथा ॥१९॥ साधारण इति प्रो
क्तः षोढा तद्भेदवादिभिः ॥ लक्षणान्यपि चैतस्य संक्षेपेण वदामि ते ॥२०॥ वर्णत्वमेकमाश्रित्य यो धर्मः संप्र ॥ २ ॥

वर्त्तते ॥ वर्णधर्मः स तु प्रोक्तो यथोपनयनादिकम् ॥२१॥ आश्रमं तु समाश्रित्य धर्मो यः संप्रवर्त्तते ॥ स त
्वाश्रमधर्मो हि भिक्षादंडादिको यथा ॥२२॥ वर्णत्वमाश्रमत्वं च योऽधिकृत्य प्रवर्त्तते ॥ स वर्णाश्रमध
र्मः स्यान्मौंज्यादिर्मेखला यथा ॥२३॥ यो गुणेन प्रवर्त्तेत गुणधर्मः स उच्यते ॥ यथा मूर्द्धाभिषिक्तस्य प्रजा
नां परिपालनम् ॥२४॥ निमित्तमेकमाश्रित्य यो धर्मः संप्रवर्त्तते ॥ नैमित्तिकः स विज्ञेयः प्रायश्चित्तवि
धिर्यथा ॥२५॥ वर्णानामाश्रमाणां च सर्वेषां यः समो भवेत् ॥ स हि साधारणो धर्मस्त्वहिंसादिर्यथा द्वि
ज ॥२६॥ धर्मस्त्वाचरितः शुद्धे देशे स्यात्सफलोदयकः ॥ स एवाशुचिदेशे तु कृतोऽप्यफलतां व्रजेत् ॥२७॥
मृगः कृष्णश्चरेद्यत्र स्वभावात्तु महीतले ॥ स तु पुण्यप्रदेशः कथित आर्यावर्तश्च पुण्यभूः ॥२८॥ यत्र यत्र ह
रेर्भक्ता भवेयुः शुद्धचेतसः ॥ ते यः स सुपवित्रो वै देशो धर्मक्रियोचितः ॥२९॥ कायक्लेशैर्न बहुभिर्न चैवा
र्थस्य राशिभिः ॥ धर्मः संप्राप्यते सूक्ष्मः शास्त्रहीनैः कृतैरपि ॥३०॥ तच्छुद्धध्यानैर्नियमेन धर्मः संवर्द्धनीयः पुरु
षैः स्वदेशे ॥ भवेत्स्वधामी परलोकफलं च न तु तातिधनादपोऽन्ये ॥३१॥ इति श्रीसत्संगिजीवने नाराय
णचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे षड्विधधर्मलक्षणनिरूपणनामा प्रथमोऽध्यायः ॥ १ ॥ श्री
नारायणमुनिरुवाच ॥ ब्रह्मक्षत्रियविट्शूद्रा वर्णाश्चत्वार ईरिताः ॥ मुखबाहूरुपादेभ्यो वैराजस्य

॥स॰जी॰ पं॰
॥३॥

ःप्रवन्द्हिन॥१॥ तेषां साधारणो धर्म्मश्चतुर्णामप्युदीर्य्यते॥ अहिंसा ब्रह्मचर्य्यं च त्यागोऽस्तेयं क्षमा अ॰२॥
र्जवम्॥२॥ संतोषो ब्रह्मविद्सेवा ग्राम्येच्छापरिवर्जनम्॥ शौचं तपो दया सत्यं तितिक्षा च शमो दमः॥३॥ सु
क्तायुक्तविवेकश्च जन्ममृत्युसमीक्षणम्॥ सर्वदा पापभीरुत्वं कुसंगपरिवर्जनम्॥४॥ अन्नाद्यैः
संविभागो भूतेभ्यश्च यथोचितम्॥ तेष्वात्मदेवताबुद्धिर्मनुष्येषु विशेषतः॥५॥ कथायाः श्रवणं नित्यं
कीर्त्तनं स्मरणं हरेः॥ सेवेज्यावनतिर्दास्यं सख्यं चात्मसमर्पणम्॥६॥ एष साधारणो धर्म्मः सर्वेषां सु
खदायकः॥ कथितोऽथ विशेषांस्तेषां धर्म्मान्वदाम्यहम्॥७॥ शमो दमस्तपः शौचं संतोषः क्षांति
रार्जवम्॥ अहिंसाऽपत्नोऽमात्सर्यं मैत्री सत्यं धृतिर्दया॥८॥ धर्मोऽनसूया दाने च हर्य्यर्चा मार्द्दवं त्रपा॥ ज्ञा
नं विज्ञानमास्तिक्यं स्वाध्यायः समदृष्टिता॥९॥ चतुर्विंशतिसंख्याका ब्राह्मणस्य समपोदिताः॥ गुणाः स्वा
भाविका ह्येते सर्व्वाभीष्टफलप्रदाः॥१०॥ शौर्यं धैर्यं च वीर्यं च तितिक्षा तेज उद्यमः॥ औदार्यमुत्साहो
मात्मज्ञात्मजयस्तथा॥११॥ ब्रह्मण्यत्वं तथैश्वर्यं रक्षणं चारिनिग्रहः॥ दक्षत्वं च प्रसादश्च संग्रामे चाप
लायनम्॥१२॥ शस्त्रवाहनयोः प्रीतिर्दानं दुर्धर्षमस्त्रे रुचिः॥ ब्राह्मणानुवर्त्तनं नित्यं वासुदेवार्चनं तथा॥
१३॥ प्रजानां पुत्रवद्रक्षा शरणागतपालनम्॥ क्षत्रियस्य गुणा ह्येते प्रोक्ताः स्वाभाविका मया॥१४॥ आ ॥३॥

स्तिक्यं चोद्यमो नित्यमदंभो ब्रह्मसेवनम्॥ पोषणं च त्रिवर्गस्य भक्तिश्च गुरुदेवयोः॥१५॥ कृषिर्गोरक्ष
णं रुचिर्दानं निष्ठा च दक्षता॥ स्वाभाविका गुणा ह्येते वैश्यस्य परिकीर्तिताः॥१६॥ शुश्रूषणं द्विजगवां दे
वानां चाप्यमायया॥ तत्र लब्धेन संतोषः शूद्रप्रकृतयस्त्विमाः॥१७॥ ब्राह्मणक्षत्रियविशस्त्रयः प्रो
क्ता द्विजातयः॥ एकजातिर्मतः शूद्र उपनीतिरभावतः॥१८॥ आद्यं तु सत्कुले जन्म तेषां प्रोक्तं ततः पर
म्॥ संस्कारैर्वैदिकैः [illegible] प्रोक्ता द्विजा इति॥१९॥ गर्भाधानं पुंसवनं सीमंतो जातकर्म्म च॥ ना
मक्रियानिष्क्रामोऽन्नप्राशनं चौलकर्म च॥२०॥ कर्णवेधो व्रतादेशो वेदारंभक्रियाविधिः॥ केशांतः स्ना
नमुद्वाहो विवाहाग्निपरिग्रहः॥२१॥ त्रेताग्निसंग्रहश्चेति संस्काराः षोडश स्मृताः॥ ब्राह्मणक्षत्रविशां
वेदमंत्रैरुदीरिताः॥२२॥ न वैताः कर्णवेधांता मंत्रवर्ज्जं क्रियाः स्त्रियाः॥ विवाहो मंत्रतस्तस्याः शूद्रस्या
मंत्रतो दश॥२३॥ सच्छूद्रस्य दश प्रोक्ताः संस्कारा मंत्रवर्जिताः॥ असच्छूद्रस्य तु प्रसन्नविवाहोत्येक
इरितः॥२४॥ शूद्रो वर्णश्चतुर्थोऽपि वर्णश्चतुर्थोऽपि वर्णत्वाद्धर्म्ममर्हति॥ वेदमंत्रस्वधास्वाहावषट्का
रादिभिर्विना॥२५॥ पंचयज्ञदानादिकं मंत्रैर्गाः पौराणैर्ब्राह्मणेरितैः॥ कुर्याच्छृणु यादृशान्नपुराणमस
भारत॥२६॥ युगांतरे तु नारीणामासीन्मौंजीनिबंधनम्॥ अध्यापनं च वेदानां सावित्रीवाचनं तथा॥

२७॥ तत्रापि ब्रह्मवादिन्यः सद्योवध्वश्च कन्यकाः ॥ चतुर्द्विधा योषाद्विमानां तीक्ष्णबुद्धयः ॥२८॥ तत्रा
ह्मणोत्र तस्या नामासीद्गनीधनेसदा ॥ स्वगृहेन्नैक्ष्यचर्यां च ब्रह्मचर्यं तथाऽष्टधा ॥२९॥ अन्यासांतूपन
यनादिवाहोऽभूद्यथोचिताम् ॥ एतत्कलौ निषिद्धं वै योषितां बुद्धिजाड्यता ॥३०॥ अध्यापनं याजनं च वि
शुद्धाच्च प्रतिग्रहः ॥ जीविकात्रितयं ह्येतद्ब्राह्मणस्य प्रकीर्तिताः ॥३१॥ प्रतिग्रहं मन्यमानस्तपस्तेजोय
शोनुदम् ॥ अन्याभ्यां सेवनं जीवेद्द्विजैर्वा दोषदर्शकं तयोः ॥३२॥ चतुर्विधा तयायाः स्याज्जीविका वृत्तिरुच्य
ते ॥ सुखानुकल्पनेदेनन्दे हे निर्वाहहेतुना ॥३३॥ वार्त्ता विचित्राः शाजीनं यायावरशिलोञ्छनम् ॥ विप्रवृ
त्तिश्चतुर्द्धैवं श्रेयसी चोत्तरोत्तरा ॥३४॥ शस्त्रास्त्राजीवं क्षितिरक्षापरं सेव्यस्य निर्जयः ॥ राजन्यनीसां सहितं
क्षत्रस्योक्ता हि जीविका ॥३५॥ कृषिवाणिज्यगोरक्षाः कुसीदं चतुरीयं कम् ॥ वार्त्तावृत्तिश्चतुर्द्धेयं वैश्यस्यो
क्ता च जीविका ॥३६॥ सेवनं ब्राह्मणादीनां निःस्वयक्रयविक्रयौ ॥ शूद्रस्येति स्मृतिप्रोक्ता जीविकाऽस्ति
द्विजोत्तम ॥३७॥ लवणं मधुतैलं च दधितक्रं मघृतं पयः ॥ विक्रीणीयाच्च शूद्रो नाति नदोषस्य विद्यते ॥
३८॥ विक्रयो मद्यमांसादेरभक्ष्यस्य च भक्षणम् ॥ अगम्यागामिता चौर्यं शूद्राणां पातहेतवः ॥३९॥ इत्थे
ते द्विजवर कीर्तिता मया ते वर्णानानिगममता वृणाश्चतुर्णाम् ॥ वक्ष्यामि क्रममनुसृत्य वेदगीतं सर्वांस्ता ॥४॥

नपरमहितानथाश्रमाणाम् ॥४०॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे ध
र्मोपदेशे चातुर्वर्ण्यधर्मनिरूपणनामा द्वितीयोऽध्यायः ॥ २ ॥ श्रीनारायणमुनिरुवाच ॥ ब्रह्मचर्यं च गा
र्हस्थ्यं वानप्रस्थश्च संन्यसते ॥ संन्यासइति चत्वार आश्रमाः परिकीर्तिताः ॥१॥ त्रैवर्णिकस्य चत्वार आश्र
मा विहिता इमे ॥ तुरीयमाश्रमं केचिन्निषेधंति क्षत्रवैश्ययोः ॥२॥ कीर्त्यमानान्मयातत्र द्विजातीनां य
थोचितम् ॥ ब्रह्मचर्याश्रमस्यादौ धर्मान्नादौ शृणु द्विज ॥३॥ जातकर्मादिभिः पूर्वं संस्कारैः संस्कृ
तोपि सन् ॥ उपनीतश्चैव लभते द्विजत्वं द्विजबालकः ॥४॥ गर्भाष्टमेऽष्टमेवाऽब्दे ब्राह्मणस्योपनायनम् ॥
एकादशे क्षत्रियस्य वैश्यस्य द्वादशेस्मृतम् ॥५॥ तीक्ष्णबुद्धेर्ब्राह्मणस्य पंचमेऽब्देपिशस्यते ॥ अष्टमे क्ष
त्रियस्यापि वैश्यस्य नवमे तथा ॥६॥ ब्रह्मवर्चसकामो वा च विप्रोऽब्दे पंचमे हि तत् ॥ बलार्थी मेखलां क्षत्रे
षष्ठेऽर्थार्थ्यष्टमे च विट् ॥७॥ संस्कारेष्विह सर्वेषु द्विजत्वप्रापकोत्तमम् ॥ मौंजीबंधस्ततः सम्यक्क
र्त्तव्यः सयथाविधि ॥८॥ विप्रं वसंते क्षितिपं निदाघे वैश्यं घनांते व्रतिनं विदध्यात् ॥ माघादिशुक्रांति
मपंचमासाः साधारणा वा सकलाद्विजानाम् ॥९॥ न जन्ममासे न च जन्मधिष्ण्ये न जन्मकाले यदि
ने विदध्यात् ॥ ज्येष्ठेन मासि प्रथमस्य सूनोस्तथा कृतायां अपि मंगलानि ॥१०॥ जन्ममासे तिथौ भेच

॥स॰नी॰पं॰ विपरीतदले सति॥ कार्ये मं गजमिलाकुर्गर्ग्रावेशौनकाः॥२१॥बृहस्पतेर्बलं दृष्ट्वा कर्तव्यमुपनाय ॥स॰त॰॥
॥५॥ नम्॥ तस्मिन्नकनिर्बले कुर्यात्तच्चैत्रे मीनगतेरवौ॥२२॥स्वशाखेशाबलं दृष्ट्वा लग्नशुद्धिं विजोकयेत्॥स्वस्वशा
खानुसारेण पूर्वोक्तं व्रतमादिशेत॥२३॥शुद्धे कार्यासमसूत्रेण समेनाग्रत्रुटितेन च॥स्थानेपवित्रे संख्या
तं षण्णवमांगुलीषु च॥२४॥त्रिवृदूर्ध्ववृतं कार्यं तंतु त्रयमधोवृतम्॥त्रिवृत्तं चोपवीतं स्यात्तस्यैको ग्रं
थिरिष्यते॥२५॥यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि॥तृतीयमुत्तरीयार्थं वस्त्राभावे तदिष्यते
॥२६॥उपवीतं बटोरेकं द्वे तथेतरयोः स्मृते॥एकमेव यतीनां स्यादित्याहुरपि केचन॥२७॥उपवीतं क
मेणास्यात्कार्यासं शाणमाविकम्॥सर्वेषां वा द्विजातीनां कार्यासं तत्प्रशस्यते॥२८॥पृष्ठदेशे च नाभ्यां च
धृतं यद्विंदते कटिम्॥तद्धार्यमुपवीतं स्यान्नातिलंबं न चोच्छ्रितम्॥३०॥विप्रस्य मेखला मौंजी मौ
र्वी राज्ञो विशस्तथा शाणा सा प्रवरग्रंथिस्त्रिवृच्च श्लक्ष्णा समा मता॥३१॥पालाशदंडस्यान्मौंजीबंधो वा ब्रा
ह्मणस्य तु॥न्यग्रोधजः सादिरो वा जन्यादींतीनृपस्य॥३२॥नासांतः पैजवो दंडो वैश्यस्योदुंबरोऽपि वा॥
केशांतो रवमानं च विप्रादेरजिनं मतम्॥३३॥उपविश्योत्तरे चाग्नेराचार्यः प्राङ्मुखः सुधीः॥प्रत्यङ्मुख
मवटवे सावित्रीं समुपादिशीत॥३४॥प्रदक्षिणं परीत्याग्निमुपस्थाय दिवाकरम्॥दंडाजिनोपवीता ॥५॥

टी बटुर्भिक्षेत्समेखलाः॥२५॥ब्राह्मणक्षत्रियविशामादिमध्यावसानतः॥भैक्षचर्या क्रमेणास्याद्
वच्छब्दोपलक्षिता॥२६॥कृतोपनयनः सम्यक्ब्रह्मचारिस कार्यमेते॥द्विजसूत्रोपनयतो वसेद्गु
रुगृहे व्रती॥२७॥मेखलाजिनवासांसि जटादंडकमंडलून्॥बिभृयादुपवीतं च दर्भपाणिर्यथाविधि
२८॥दृढशौचो ब्रह्मचारी च शौचाचारसमन्वितः॥आहूतोऽध्ययनं कुर्याद्वीक्षमाणो गुरोर्मुखम्॥२९॥
आरंभे नैतेन शिरसा पादयोः प्रणमेद्गुरोः॥संध्यांसि समधीयात तस्का अनध्यायाहसरानृ॥३०॥गुरुः
शूनाऽऽथित्वापि विद्यामध्यापयेत्सतम्॥अदत्त्वनाशानार्थत्वान्न दोषः शिष्यताडने॥३१॥अधोभागे श
रीरस्य शनैः कुर्वीत ताडनम्॥नोत्तमांगे न हृदये दोषभागन्यथा भवेत्॥३२॥जनयेत्पंचवर्षाणि दश
वर्षाणि ताडयेत्॥प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत्॥३३॥ब्रह्मचारी गुरुर्नित्यं विद्याकामो जितें
द्रियः॥सेवेत तद्वत्सत्व र्यं चतुष्पादितु दीर्घ्यते॥३४॥आचार्यमेव पितरं मातालाशे हादि वर्जितः॥शि
ष्यवृत्त्या सुपाद्वृद्धो पादो ग्येप्रथमोऽस्य हि॥३५॥गुरोः पत्नी च पुत्रं च विनपान्मानयन शुचिः॥जितेंद्रिशि
ष्यसेद्विद्यो द्वितीयः पादः स्मयम्॥३६॥उपकारं गुरुकृतं निजजाड्यविनाशनम्॥जानन्सेवेत तं सो सा
तृतीयः पादस्समयम्॥३७॥आचार्यस्य प्रियं कुर्यात् दुम्ध्रनकायकर्मभिः॥प्राणैर्धनैस्त्वाः समतः पाद

॥ स॰नी॰पु॰ ष्कर्योः यमस्सन ॥ ३८॥ ज्ञानं सत्यं तितिक्षा च क्षीरमास्सर्यं धृतिस्तपः ॥ शमो दमो ऽनसूया च दानं यज्ञो ॥ अ॰ ३ ॥
॥ ६ ॥ गुणा ऽमी ॥ ३९॥ कामः क्रोधः शोकमोहौ तृष्णेर्ष्या चाऽकृपा स्पृहा ॥ लोभो ऽसूयानुगुश्चानमानो द्वेषो
ऽतिमेमता: ॥ ४०॥ सत्कारो दोषानुत्पादं शीतास्तु क्रोधादृशानिर्गुणैः ॥ वेदाभ्यासं च कुर्वीत वेदार्थं च विचिं
तयेत् ॥ ४१॥ सायं प्रातरुपासीत वह्निं चाप्यु समाहितः ॥ प्रातः संध्यां च पंकलागुर्वादीन्प्रणमेत्सच ॥ ४२
॥ अभिवादनशीलश्च वृद्धसेवारतस्सन ॥ आयुश्शोभवं वृद्धिर्विद्यते: हरहो ऽधिकम् ॥ ४३॥ सायं प्रातस्त्वरेभैक्ष्यं
पवित्रद्विजवेश्मसु ॥ निवेद्य गुरवे तच्च भुंजीत तदनुज्ञाया ॥ ४४॥ अनारोग्यमनायुष्यमस्वर्ग्यं चाऽतिभो
जनम् ॥ अपुल्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ॥ ४५॥ नैकस्याऽन्नं समश्नीयान्नित्यं वर्णीत्युना परि
ऽस्तुणः कामममश्नाच्च श्राद्धे व्रतमपीडयन् ॥ ४६॥ कर्शैत्कृतांजलिर्नत्वा गुरोरग्निमुखं सदा ॥ नमत्रोप
विशोत्सुक्तस्त्यासीत पुरः सतु ॥ ४७॥ गुरोश्चक्षुर्विषये न यथेष्टासनो भवेत् ॥ नचैवाऽस्याऽनुकुर्वीत ग
तिभाषितचेष्टितम् ॥ ४८॥ गुरोर्निंदां नवैराग्यमसत्यं परवपनन्त्यजेत् ॥ कर्णौपिधाय गच्छेद्वा शिक्षयेन्निं
दकान्प्रभुः ॥ ५०॥ हरस्थो नाऽर्चयेदेनं नक्रुद्धोनांऽतिकेस्त्रियाः ॥ नचैवाऽस्योत्तरं ब्रूयादुच्चरत्राव्देन क
र्हिचित् ॥ ५१॥ उदकुंभं कुसुमान्युष्मसमिधोःस्याहरेत्सदा ॥ मार्जनं लेपनं नित्यमंगानां च समाचरेत् ॥ ५२ ॥ ६ ॥

नाऽस्यनिर्माल्यशयने पादुकोपानहावपि ॥ आक्रामेदासनं छायामंचकं वा कदाचन ॥ ५३॥ साधयेद्
तकाष्ठादीनान्कल्पं चास्मै निवेदयेत् ॥ अनापृच्छ्य न गच्छेत्तं क्वापि सप्रियकृद्गुरोः ॥ ५४॥ पादौ प्रसार्य
पुरतो गुरोर्नासीत कर्हिचित् ॥ आस्फोटनं चाट्टहासनं कुर्यात्तत्र च स्वापि च वम् ॥ ५५॥ धावंतमनुधाव
वेत्तु गच्छंतं गुरुमन्वियात् ॥ नोदाहरेच्च तन्नाम स्वयं प्राच्याःश्रुतमुत्तम् ॥ ५६॥ जितेंद्रियः स्यात्सततं व
श्यात्मा ऽक्रोधनः शुचिः ॥ प्रयुंजीत सदा वाचं मधुरां गुरुसन्निधौ ॥ ५७॥ स्त्रीणां कथायाः श्रवणं की
र्तनं प्रेक्षणं तथा ॥ संकल्पं कीडनं तासामिर्निश्चयं गुह्यभाषणम् ॥ ५८॥ वर्जयेत्त्वयतो नित्यं तस्य शोतु
विशेषतः ॥ स्त्रीसंगिसंगं च बहु नै कुर्यात्कर्हिचिद्वती ॥ ५९॥ गुरुवद्गुरुपत्नी च पूज्या च गुरुपुत्रकः ॥ अ
वमानं न कुर्वीत तयोरपि कदाचन ॥ ६०॥ अभ्यंजनं स्नापनं च गात्रसंमर्दनं तथा ॥ गुरुपत्न्या न कुर्वीत
केशानां च प्रसाधनम् ॥ ६१॥ गुरुपत्नीतियुवतिर्नाभिवाद्येह पादयोः ॥ कुर्वीत वंदनं भूमावसावहमि
ति ब्रुवन् ॥ ६२॥ अंगस्पर्शो न कर्तव्यो गुरुपत्न्याश्च पि कर्हिचित् ॥ तेनापि व्रतभंगः स्यात्ततोऽत्र ब्रह्मचारिणा
॥ ६३॥ पितृष्वसा मातृष्वसा भ्रातृजाया च मातुली ॥ गुरुपत्नीव मान्याश्च जननी भगिनी तथा ॥ ६४॥ गुरोस्सा
गोन कर्तव्यः कर्हिचित् ब्रह्मचारिणा ॥ कामो क्रोधो भावमोहाच्च तत्सत्वापतितो भवेत् ॥ ६५॥ गुरोरप्य

॥स॰नी॰पं॰ लिप्तस्य कार्य्याकार्य्यमजानतः॥ तस्य यं प्रतिपन्नस्य मनुस्त्यागं समब्रवीत्॥६६॥ लौकिकं वैदिकं अ॰२॥
॥७॥ वापि ज्ञानमाध्यात्मिकं यतः॥ आददीत न तं कश्चिद्गुरुं शिष्योऽवमानयेत्॥६७॥ अहर्दिवं गणाद्भी
तः सौहित्यान्मरणादिव॥ राक्षसीमिव तु स्त्रीमस्य विद्यामधिगच्छति॥६८॥ द्यूतं पुस्तकशुश्रूषा नाटि
कासक्तिरेव च॥ स्त्रियस्तन्द्रा च निद्रा च विद्याविघ्नकराणि षट्॥६९॥ विद्यामेवमधीयानो ब्रह्मचारी गु
रोर्गृहे॥ वसंस्त्रिषु वृथालापी कुसंगं परिवर्जयेत्॥७०॥ पुष्पस्रजंश्चन्दनं च रसान्सक्तिं च कुंकुमम्॥ स्र
गंधोऽभ्यंगं पर्यंकं वर्जयेद्दन्तधावनम्॥७१॥ अभ्यंगं चांजनं नेत्रमादर्शालोकनं तथा व्रती सर्वं वर्जयेद्द्यूतं गी
तवादित्रनर्तनम्॥७२॥ प्राणिहिंसां च पैशुन्यं कामं लोभं भयं तथा॥ वर्जयेन्मधु मांसं च तद्वल्लक्षं लशुना
दिकं॥७३॥ संध्ययोश्च दिवा स्वापं शय्यायां तथा मयोः वर्जयेच्च प्रयत्नेन परीवादं तु पानहौ॥७४॥ अनृत
दर्शीन च वेश्याप्यगीतं च सर्वथा॥ श्मशानयात्रां तीर्थेनानृतं च वदेच्च यः॥७५॥ न मंचे शयनं कुर्यान्न
च तांबूलभक्षणम्॥ तत्कालोचितं सर्वं वैदिकं विधिमाचरेत्॥७६॥ उपाकर्म च वेदानां कुर्वीत हि यथा
विधि॥ श्रवणे श्रावणे मासि पूर्णे श्रवणलग्नके॥७७॥ यजुर्वेदी तन्मासे पौर्णमास्यां विधानतः॥ मध्या
ह्ने तत्र कुर्वीत हस्तर्क्षे तत्र सामगः॥७८॥ संक्रान्तिर्ग्रहणं वापि यदि पर्वणि जायते॥ श्रावणे हस्तयुक्तायां ॥७॥

पंचम्यां वा तदिष्यते॥७९॥ अर्धरात्रादधस्ताच्चेत्संक्रान्तिर्ग्रहणं भवेत्॥ उपाकर्म न कुर्वीत परतश्चेन्न दो
षकृत्॥८०॥ पौषमासस्य रोहिण्यामष्टकायामथापि वा॥ जलान्ते छंदसां कुर्यादुत्सर्गं च द्विजो बहिः॥८१॥
॥उपाकर्मदिनेऽप्येके वेदोत्सर्गं प्रकुर्वते॥ कर्म्मणोरुभयोस्तत्र क्षीणं पूजनं स्मृतम्॥८२॥ एवमाचार
संपन्नमात्मवंतमदांभिकम्॥ वेदाध्ययनपुराणानि गुरुरध्यापयेत्सुतम्॥८३॥ बहुनाऽपि च कालेन प
रिक्ष्य ब्रह्मचारिणम्॥ उपादिशेद्गुरुस्तान्मं कृत्वा निष्कपटोऽखिलाम्॥८४॥ वेदं वेदौ च वेदान्वा सोऽप्य
धीत्य यथारुचि॥ गुरवे दक्षिणां दत्त्वा समावर्त्तेत च द्विजः॥८५॥ गृहं वनेवासो प्रविशेत्स्त्र ब्रह्मवा विजोऽस
सः॥ मंदत्वं मध्यमत्वं च स्वे वैराग्यस्य तीव्रताम्॥८६॥ चतुर्विधा ब्रह्मचारिकल्प्यते द्विजसत्तम॥ सावित्रः प्रा
जापत्यश्च ब्राह्मो नैष्ठिक एव सः॥८७॥ प्राप्तोपनयनं सम्यक् गायत्रीं प्रपठन्व्रतम्॥ दिनत्रयं धारयेद्यः प्रथ
मः स प्रकीर्त्तितः॥८८॥ द्वितीयः स्यात्पठन्वेदं व्रती संवत्सरं भवेत्॥ आवेदग्रहणाद्वापि द्वादशाब्दान्व्रती परः
॥८९॥ यावज्जीवं चतुर्थः स्यात्तिष्ठेद्गुरुकुले व्रती॥ उत्तरोत्तरतः श्रेष्ठं तेषामेतत्स्मृतिनिश्चितम्॥९०॥ अज्ञाना
न्मांसमश्नं वा स्करं संस्पृश्य मेव वा॥ पुनः संस्कारमर्हन्ति मुक्त्वाऽन्यान्द्विजातयः॥९१॥ सेवमानो गुरुं
सोऽपि व्रतं स्वं पालयेद्दृढम्॥ अज्ञानाज्ज्ञानतो वापि तच्च्युतो निष्कृतं चरेत्॥९२॥ अकृत्वा भैक्षचरणमस

भिक्ष्यं च पावकम् ॥ अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् ॥ ९३ ॥ असमिद्भैक्ष्यकृन्मौनी तेनाभ्यस्यौदर्ये नेत
पा ॥ नभ्रस्वाये ऽग्निनिर्मुक्तो मुदितश्चेद्दिवाशये ॥ ९४ ॥ स्मशानाक्रमणैः स्वाध्यायो रोहे पूज्यातिक्रमे विना
यज्ञोपवीतं च भोजनादिक्रियाकृतौ ॥ ९५ ॥ प्रतिग्रहे च मण्यादेर्दुःस्वप्नादिघातने ॥ एतेषु स्मृतमेवैषु जा
तेनच्युदयेद्विजः ॥ ९६ ॥ स्नाना चम्योत्तमे देशे कृत्वा त्रीन्प्राणसंयमान् ॥ अथोत्तरसहस्रं स प्रजपेद्देवमानत
रम् ॥ ९७ ॥ प्रायश्चित्तं तदिदं सर्वं च मन्नगे समीरितम् ॥ तच्चाग्रे हं वदिष्यामि सर्वेषां हितावहम् ॥ ९८ ॥ नैष्ठिका
नां वनस्थानां यतीनां ब्रह्मचारिणाम् ॥ नाऽङ्गीत्वं कीर्तितं सद्भिः शावं सौतं च सन्मते ॥ ९९ ॥ आचार्यं
स्वमुपाध्यायं मातरं पितरं गुरुम् ॥ निर्हृत्य व्रती प्रेतं सद्यः स्नानेन शुद्ध्यति ॥ १०० ॥ नत्समेत्सूतके कर्म
ब्रह्मचारी स्वकं क्वचित् ॥ कृत्वा तौत्स्वैव कुर्वीत तेषां पिण्डोदकक्रियाम् ॥ १०१ ॥ एतेन यत्नेन द्विजवर्य धर्मा
आ दाश्रमस्थस्य यथावदुक्ताः ॥ समासतो ऽथाऽऽह्निककर्म सर्वं वदामि शुद्धं विहितं द्विजानाम् ॥ १०२ ॥
इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे ब्रह्मचार्याश्रमधर्म
निरूपणनामा तृतीयो ऽध्यायः ॥ ३ ॥ श्रीनारायणमुनिरुवाच ॥ स्नानं संध्या जपो होमः स्वाध्यायः पितृ
तर्पणम् ॥ देवताभ्यर्चनं चेति षट्कर्माणि दिने दिने ॥ १ ॥ प्रातः स्नानं विना नैव द्विजन्मा निजकर्मकृ ॥

नर्हः संध्यादिषु स्याद्धि तस्मात्तत्पूर्वमाचरेत् ॥ २ ॥ नद्यां तडागे कूपे वाऽग्रहे वा स्नानमाचरेत् ॥ उद्धृत्य पंचमृ
त्पिंडान्स्नायान्न परजलाशये ॥ ३ ॥ विष्णुदाम्मृदमादाय पवहीं वितिलगोमयम् ॥ शुचौ देशे प्रतिष्ठाप्य वैमा ॥ ४ ॥ प
यशीच दृष्टिसोजलमध्ये प्रविश्य च ॥ तत्र मंत्रैर्मृदाद्भिश्च स्नायाच्छांगानि विलिप्य सः ॥ ५ ॥ मंत्राः स्नाने बुधैर्देव
ताः पावमान्यश्च पावने ॥ गृहीत्वा कृच्छ्र स्तेन स्मरता हृदये हरिम् ॥ ६ ॥ स्नात्वांगे तर्पणं कृत्वा परिधाय च
वाससि ॥ गृहीत्वा कृच्छ्र स्तेन स्मरता हृदये हरिम् ॥ ७ ॥ धौतेन ततः सचाचम्य संध्योपासनमाचरेत् ॥ प्रातःस्ना
नेन कर्तव्यं कदाचित्तिजतर्पणम् ॥ जलमध्ये स्थितः कुर्यात्केवलं कुशवारिणा ॥ ८ ॥ उष्णोदकेन च स्ना
नं वृथा स्नानं तदुच्यते ॥ अशक्तस्यैव तत्स्नानं प्रशस्तं मुनिभिः स्मृतम् ॥ ९ ॥ रविसंक्रान्तिवारे च ग्रहणे च
शाशिक्षये ॥ व्रताहे षु च पर्वसु स्नातव्यं नोष्णवारिणा ॥ १० ॥ अशक्तश्चाविशिरस्कं वा स्नानमस्य विधीयते
आर्द्रेण वाससा वाऽथ मार्जनं पावनं स्मृतम् ॥ ११ ॥ देशकालौ विलोक्यैव प्राज्ञः स्नानांतराणि च ॥ आप
न्नानां द्विजातीनां पूर्वजा हिमहर्षयः ॥ १२ ॥ मार्जनं पावनैर्मंत्रैर्ब्राह्मणं स्नानं कुशोदकैः ॥ भस्मोद्धूलनमा
ग्नेयमापादतलमस्तकम् ॥ १३ ॥ गोखुरोद्धूतरजसा वायव्यं स्नानमुच्यते ॥ स्नानं सातपवर्षेण यत्तद्दिव्य
मुदाहृतम् ॥ १४ ॥ मानसं च हरेर्ध्यानं स्नानमाहुर्मनीषिणः ॥ स्नानान्येतान्यशक्तस्य सैव तु वारुणम् ॥

॥स॰जी॰पं॰ २५ ॥ कालातिक्रमणं नस्यात्संध्यायाश्च यथा तथा ॥ प्रातःस्नानविधिः कार्यो मध्याह्नेऽशेषमाचरेत् ॥ २६ ॥प॰५॥
॥५॥ ऊर्ध्वपुंड्रं मृदा कृत्वा भस्मना वा त्रिपुंड्रकम् ॥ स्वस्वशाखानुसारेण कुर्युः संध्याविधिं द्विजाः ॥ २७ ॥ रात्र्यंतया
मनाड्यौ द्वे संध्याकालोयमुच्यते ॥ दर्शनाद्रविरेखायास्तदंतो मुनिभिः स्मृतः ॥ २८ ॥ आपस्तंबं पूर्वतः कृत्वा गो
कर्णाकृतिवत्करम् ॥ संहतांगुलिना तेन ग्राह्यं माषद्रकं द्विजः ॥ २९ ॥ मुक्त्वांगुष्ठकनिष्ठे न करेणाचमनं च
रेत् ॥ ब्राह्मणेव तु तीर्थेन द्विजो नित्यमुपस्पृशेत् ॥ ३० ॥ अंगुष्ठमूलरेखायां ब्राह्मं तीर्थमिहोच्यते ॥ प्रदेशि
न्याश्च यन्मूलं पित्र्यं तीर्थं तदीरितम् ॥ ३१ ॥ कनिष्ठामूलतः पश्चात्प्राजापत्यं प्रकीर्तितम् ॥ अंगुल्यग्रे
स्मृतं दैवं मध्ये वाऽऽग्नेसौमिकम् ॥ ३२ ॥ तत्तत्कार्येषु बोद्धव्यं तत्तत्तीर्थं द्विजन्मना ॥ त्रिरेवमाचम्य ततस्त्रिभिः
कुर्यात्प्राणसंयमम् ॥ ३३ ॥ गायत्रीं शिरसा सार्द्धं सप्तव्याहृतिपूर्विकाम् ॥ दशप्रणवसंयुक्तां प्राणाया
मे जपेद्द्विजः ॥ ३४ ॥ पंचांगुलीभिर्नासाग्रपीडनं प्रणवाभिधायुदेयं सर्वपापघ्नी वानप्रस्थगृहस्थयोः ॥ ३५
कनिष्ठानामिकांगुष्ठैर्नासाग्रस्य च पीडनम् ॥ ओंकारमुख्यसा प्रोक्ता यतेर्ब्रह्मचारिणः ॥ ३६ ॥ सूर्यनारा
यणं साक्षाद्ध्यात्वा विष्णुं त्रिधामकम् ॥ ध्यानान्ते उदयात्सूर्यमर्घ्यदानं समाचरेत् ॥ ३७ ॥ दुर्निवार्यारुजं संमे
मंदेहानामराक्षसाः ॥ उद्यंतं भास्करं नित्यं हन्यते अर्घोदकैर्हते ॥ ३८ ॥ दिनांतरे पुनस्ते च जीवंत्येव विधे ॥५॥

र्वरात् ॥ संध्यामुपासिता ततः प्रत्यहं द्विजसत्तमः ॥ ३९ ॥ विवस्वतः सहायार्थं यो द्विजो नांजलित्रयम् ॥
दद्यान्मंदेहनाशाय सोपि मंदेहतां व्रजेत् ॥ ४० ॥ एवमेव प्रभाते तु मध्याह्ने ऋजुसंस्थितः ॥ उपविश्यै
कसार्घ्यं विनिक्षिपेत् ॥ ४१ ॥ हस्ताभ्यां स्वस्तिकं कृत्वा तत्स्थः पतिष्ठेत्स्वग्रे रविम् ॥ मध्याह्ने तु ऋजुर्वाऽऽरु
सायं मुकुलितौ करौ ॥ ४२ ॥ उत्तमा तारकोपेता मध्यमा लुप्ततारका ॥ कनिष्ठा सूर्यसहिता प्रातः सं
ध्या त्रिधा मता ॥ ४३ ॥ उत्तमा संगवादूर्ध्वं मध्यमा लुप्ततारकम् ॥ अपराह्णेऽधमा ज्ञेया मध्यसंध्या
त्रिधा स्मृता ॥ ४४ ॥ उत्तमा सूर्यसहिता मध्यमा लुप्ततारका ॥ कनिष्ठा तारकोपेता सायंसंध्या त्रिधो
दिता ॥ ४५ ॥ यस्तु द्विजो लौकिककर्मसक्तः संध्यां न काले समुपास्त उर्व्याम् ॥ जीवन्मृतः शूद्रसमः स
नूनं भविष्यति श्वानतनुं विहाय ॥ ४६ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्र
करणे धर्मोपदेशे स्नानसंध्याविधिनिरूपणनामा चतुर्थोऽध्यायः ॥ ४ ॥ श्रीनारायणमुनिरुवा
च ॥ संध्यामेवमुपासीनस्त्रिषु कालेषु वै द्विजः ॥ गायत्रीं प्रजपेद्भक्त्या प्रणवेन समन्विताम् ॥ १ ॥ वै
दिकी त्रिपदा गायत्री तद्बीजं प्रणवो मतः ॥ प्रणवान्नपरं किंचिद्विद्यतेऽक्षरमेव सः ॥ २ ॥ त्रींल्लोकांस्त्रीन्गु
णान्कालांस्त्रीनग्नीन्लिंगमांश्च यः ॥ व्याप्या स्वैरकाराद्यैस्त्रिभिरास्तेऽधीश्वरः ॥ ३ ॥ प्रणवाद्याः स्म

त्यवेदाः प्रणवे यस्यं वस्थिताः ॥ वाङ्मयं प्रणवे सर्वं तत्तदाद्यं जपेन्मनुम् ॥४॥ ऋषिश्छन्दो देवतेच विनि 
योगं च ब्रासणाम् ॥ षडंगानीति मंत्रस्य विद्यात्सर्वत्र शास्त्रतः ॥५॥ गायत्री सर्वमंत्राणां सारभूतानि
गद्यते ॥ सर्ववेदस्वरूपा च त्रिपदा सर्वसिद्धिदा ॥६॥ गायत्री प्रकृतिर्ज्ञेया प्रणवः पुरुषस्तथा ॥ योगे
सत्तु नयोः सद्यो जपतां वांछितं फलम् ॥७॥ कुशासने निविष्टस्सन् कुशपाणिर्जितेन्द्रियः ॥ अर्कबिंबे
हरिं ध्यानमूगायत्रीं प्रयतो जपेत् ॥८॥ प्रणवं पूर्वमुच्चार्य भूर्भुवः स्वस्तथैव च ॥ गायत्रीप्रणवश्चां
तेन एवमुदाहृतम् ॥९॥ वाचिको मानसो पांशुः सात्विमास्त्रिविधो जपः ॥ त्रयाणां जपयतीनां श्रेया
न्स्यादुत्तरोत्तरः ॥१०॥ यदुच्चनीचैः स्वरितैः शब्दैः स्पष्टपदाक्षरैः ॥ मंत्रमुच्चारयेद्वाज पयतस्स वा
चिकः ॥११॥ शनैरुच्चारयेन्मंत्रमीषदोष्ठौ प्रचालयेत् ॥ किंचिच्छब्दं स्वयं विद्यादुपांशुः स जपः स्मृ
तः ॥१२॥ यो न वेदचलनज्जिह्वादशनावरणो जपः ॥ समानसः समाख्यातो जपः श्रुतिविभूषणैः ॥१३
॥ ध्यायेन्मनसा मंत्रं तत्पोष्ठौ न विचालयेत् ॥ न कंपयेच्छिरोग्रीवे दंतान्नैव प्रकाशयेत् ॥१४॥ यक्ष
राक्षसभूतानि सिद्धविद्याधरागणाः ॥ हरंति प्रसभं यस्मात्तस्माद्गुप्तं जपेन्मनुम् ॥१५॥ अकुर्वीता
त्त्वरां निद्रां जयं स्तजपेद्वै शिलीमु ॥ नाः मासस्यक्रमनाधीरो निष्पमाणरतस्ततः ॥१६॥ न चक्रमन्न च ह ॥१०॥

न्न पार्श्वमवलोकयन् ॥ नापाश्रितो न जल्पंश्च न प्रावृतशिरास्तथा ॥१७॥ न पदा पदमाक्रम्य चालयेन्न
करौ तथा ॥ गायत्रीमसमाधिस्थो न सं स्यावयज्जपेत् ॥१८॥ प्राङ्मुखस्सन्जपेत्प्रात्स्संध्यायामाभास्करोदया
त् ॥ प्रत्यङ्मुखः समासीनः सायंचातारकोदयात् ॥१९॥ तिष्ठन्तुं द्विजस्य मध्याह्ने जपेदासीन एव वा ॥ सू
र्याभिमुख एवाऽसौ द्वितीयः प्राङ्मुखो भवेत् ॥२०॥ प्रातर्नाभौ करं कृत्वा मध्याह्ने हृदि संस्थितम् ॥ सा
यं जपेच्च नासाग्रे जपो हि त्रिविधः स्मृतः ॥२१॥ सहस्रं परमां देवीं शतमध्यां दशावराम् ॥ गायत्रीं प्रज
पेन्नित्यं महापातकनाशनीम् ॥२२॥ दशाभिर्जन्मजनितं शतेन तु पुराकृतम् ॥ त्रिजन्मजं सहस्रेण गा
यत्री हंति किल्बिषम् ॥२३॥ चतुर्विंशतिलक्षैश्च पुरश्चरणमीरितम् ॥ गायत्र्यास्तु यः कुर्यात्सर्वान्का
मान्स चाप्नुयात् ॥२४॥ गायत्र्या जपविधिरित्युदीरितस्ते कर्तव्यो द्विजनिजशक्तितोऽनुघस्रम् ॥ आजन्
मनिजकृतारिमाप्तुहित्वा संस्कारं स्वधाममुपागतैः सः ॥२५॥ इति श्री सत्संगिजीवने नारायणचरि
त्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे गायत्रीजपविधिनिरूपणनामा पंचमोऽध्यायः ॥ ५ ॥
श्रीनारायणमुनिरुवाच ॥ कालातिक्रमणं यस्तु प्रमादात्कुरुते द्विजः ॥ संध्यायाः सतु कुर्वीत प्रायश्चित्तं वि
शुद्धये ॥१॥ संध्याकालेऽत्यतिक्रांते स्नात्वाऽऽचम्य यथाविधि ॥ जपेदष्टशतं देवीं ततः संध्यां समाचरेत् ॥२

॥म॰ती॰पं॰ ॥२१॥

प्रातरेव प्रकुर्वीत कार्ये त्वावश्यके सति ॥ अपि माध्याह्निकीं संध्यां द्विजन्मा न तु सर्वदा ॥ ३ ॥ नोपास्ते यस्तु अ॰६॥
मूढात्मा संध्यां पूर्वां च पश्चिमाम् ॥ स शूद्रेण समो ज्ञेयः सर्वकर्मबहिष्कृतः ॥ ४ ॥ अर्धोक्तां मानसीं संध्यां कुशा
वारिविवर्जिताम् ॥ सूतके मृतके वापि द्विजः कुर्यान्न चाऽखिलाम् ॥ ५ ॥ गृहे गोष्ठे नदीतीरे संध्या दशगुणा
क्रमात् ॥ समुद्रे स्याच्छतगुणा त्वनन्ते त्वग्निसन्निधौ ॥ ६ ॥ संध्याकर्मावसाने तु स्वयं होमो विधीयते ॥ स्वयं होमे
फलं यत्स्यान्न तदन्येन लभ्यते ॥ ७ ॥ ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः ॥ एतैरपि कृतं यस्मा
त्तत्कृतं स्वयमेव तत् ॥ ८ ॥ होमे यत्फलमुद्दिष्टं तत्फलं स्वयमेव तत् ॥ रूप्यमानेन तदन्येन फलमर्धं प्रपद्यते ॥ ९
कार्ये त्वावश्यके प्राप्ते यां कांचिदापदि ॥ पक्षहोमं प्रकुर्वीत नान्यथा तु कदाचन ॥ १० ॥ पवित्रपाणिः पू
तात्मा शुक्लाम्बरधरो द्विजः ॥ अनन्यमनसा नित्यं जुहुयात्संयतेन्द्रियः ॥ ११ ॥ पवित्रं कौशिकं ताम्रं राजतं
हैममेव वा ॥ दक्षिणे तत्करे धार्यं पवित्रं चोत्तरोत्तरम् ॥ १२ ॥ स्वर्णस्य स्वर्णवर्णस्य स्वर्णसांगुलीयकम्
॥ पवित्रमिति विज्ञेयं सर्वकर्मसु शोभनम् ॥ १३ ॥ अनामिकाधृतं हैमं तर्जन्यां रूप्यमेव च ॥ कनिष्ठिकाधृ
तं खड्गं तेन पूतो भवेन्नरः ॥ १४ ॥ देवतानां नमस्कुर्यादुपहारान्निवेदयेत् ॥ दद्यात्पुष्पादिकं तेभ्यो वृद्धांश्चै
वाभिवादयेत् ॥ १५ ॥ वेदपाठं ततः कुर्याद्यथाशक्ति समाहितः ॥ उपविश्य शुचौ देशे प्राचीनाग्रान्कुशास् ॥२१॥

न ॥ १६ ॥ वेदान्सांगान्पुराणानि भारतं वा यथारुचि ॥ स्तोत्राणि वा तदुक्तानि रामायणमपि द्विजः ॥ १७ ॥
स्वाध्यायसिद्धये नित्यं यथाशक्ति पठेद्द्विजः ॥ आरंभे च समाप्तौ च प्रणवं समुदीरयेत् ॥ १८ ॥ देवान्ब्रह्मऋ
षींश्चाऽथ तर्पयेदक्षतोदकैः ॥ तिलोदकैः पितॄन्भक्त्या स्वसूत्रोक्तविधानतः ॥ १९ ॥ तर्पयेत्प्राङ्मुखो देवानृषीं
श्चोदङ्मुखः पितॄन् ॥ दक्षिणाभिमुखश्चैवं तर्पणस्य विधिः स्मृतः ॥ २० ॥ पितृत्वादयमेवेन दक्षिणाभिमुखस्ति
लैः ॥ देवत्वाद्देवतातीर्थेन यथाम्नायं तर्पयेद्बुधः ॥ २१ ॥ आब्रह्मस्तंबपर्यंतं जगत्तृप्यत्विति ब्रुवन् ॥ क्षिपेत्तिलो
दकं भूमौ कुर्वन्संक्षेपतर्पणम् ॥ २२ ॥ न स्नं निष्पीडयेद्भूमौ नवादर्पान संक्रमे ॥ चतुर्दश्यां श्राद्धदिने न च क्षा
रेणापोत्नपेत् ॥ २३ ॥ यज्ञोपवीती देवे स्यान्निवीती स्यादृषितर्पणे ॥ प्राचीनावीती पित्र्ये च तत्तन्मंत्रान्समुच्चरन्
२४ ॥ देवान्देवेन तीर्थेन ब्राह्मणेन मुनींस्तथा ॥ पित्र्येण तर्पयेत्पितॄन्स्वकीयान्दैविकानपि ॥ २५ ॥ साग्रान्स
मूलान्कुशांश्च धृत्वा दक्षिणपाणिना सव्येन चान्वारब्धेन देवादींस्तर्पयेद्द्विजः ॥ २६ ॥ अग्रैस्तु तर्पयेद्देवान्म
नुष्यांश्चैव मध्यतः ॥ पितॄंश्चैव तु मूलाग्रैः कुशानां तु यथाक्रमम् ॥ २७ ॥ कुशाः काशा यवा दूर्वा उशीराश्च सं
कुंदराः ॥ गोधूमा व्रीहयो मुंजा एते दर्भाः प्रकीर्तिताः ॥ २८ ॥ नभोमासस्य दर्शे ये कुशाः शुद्धा उपाहृताः ॥ अया
तयामास्ते दर्भा नियोक्तव्याः पुनः पुनः ॥ २९ ॥ कुशाः प्रादेशमात्राः स्युर्द्विगुणो दर्भ उच्यते ॥ हस्तमात्रो भवेद्

श्रोगो तु तूत्तमुच्यते ॥ २० ॥ श्राद्धकाले कुशाः श्रेष्ठा दाने पुरुर्नेत्र उच्यते ॥ आवसथ्ये न वेदुक्तो गोपुच्छः पे
न कर्मणि ॥ २१ ॥ पाणिनैकगुणं प्रोक्तं दर्भैः शतगुणं तथा ॥ अक्षय्यं स्वर्णपात्रेण पितॄणां तर्पणं भवेत्
२२ ॥ एकैकमञ्जलिं दद्याद्देवा दैवचनकादयः ॥ त्रीन्त्रीन् वाञ्छन्ति पितरः स्त्रियश्चैकैकमञ्जलिम् ॥ २३ ॥ मातृ
मुख्यास्तु याः स्त्रियस्तासां दद्याज्जलाञ्जलीन् ॥ त्रीन्त्रीन्निवृत्ततोऽन्यासां दद्यादेकैकमञ्जलिम् ॥ २४ ॥ रवौ शुक्रे त्रयो
दश्यां सप्तम्यां निशि सन्ध्ययोः ॥ मघासु भौमे नन्दायां न कुर्यात्तिलतर्पणम् ॥ २५ ॥ तीर्थे तिथिविशेषे च गंगायां
प्रेतपक्षके ॥ निषिद्धेऽपि दिने कुर्यात्तर्पणं तिलमिश्रितम् ॥ २६ ॥ तिलाभावे निषिद्धाहे स्वर्णरजता
न्वितम् ॥ तदभावे निषिञ्चेत्तु दर्भैर्मन्त्रेण वोदकम् ॥ २७ ॥ प्रत्यूषादेर्ममुख्यकर्म यदीरितं तेष्वात्तैर्वैश्वाग्नि
रक्षिलं विहितं द्विजानाम् ॥ देवार्चनाख्यविधिमद्य वदामि सर्वमावश्यकं द्विजवरानुदिनं विधेयम् ॥ २८ ॥
इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे प्रातर्होमब्रह्मयज्ञदेव
पितृतर्पणविधिनिरूपणनामा षष्ठोऽध्यायः ॥ ६ ॥ श्रीनारायणमुनिरुवाच ॥ करिष्यन्पूजनं विष्णोः
कृतसंध्याविधिर्द्विजः ॥ स्नात्वाऽथ पाणी संशुध्य पूर्वं कुर्यात्ततोऽर्चनम् ॥ १ ॥ समित्पुष्पकुशादीनि ब्राह्मणः स्व
यमाहरेत ॥ शूद्रानीतैः क्रयक्रीतैः पूजयेन्नरमापतिम् ॥ २ ॥ देवं पित्र्यं च वा कर्म संध्योपासादि नैत्यकम् ॥ ॥१२॥

शूद्रानीतेन तोयेन विप्रो नैव समाचरेत् ॥ ३ ॥ उदङ्मुखः प्राङ्मुखो वा देवतासंमुखोऽथवा ॥ उपविश्यार्चये
त्कृष्णं निजेष्टं सागमीश्वरम् ॥ ४ ॥ शैली दारुमयी लौही लेप्या लेख्या च सैकती ॥ मनोमयी मणिमयी प्रतिमा
ऽष्टविधा स्मृता ॥ ५ ॥ एतास्वपि भवेत्कृष्णरूपं यस्य यत्र सतां नरः ॥ निष्ठयाऽत्र पूजयेत्कृत्वा यथालब्धोपचारकैः ॥
६ ॥ भक्त्यार्पितेन दत्तेन तुष्यत्यल्पेन सोऽपि केशवः ॥ न पत्रपुष्पसंभाव्यैर्गन्धधूपैर्नाप्यभक्तिवत् ॥ ७ ॥ चतुर्णां
ब्राह्मणादीनां वर्णानां योषितां तथा ॥ प्रतिमापूजनं शास्त्रे विष्ण्वादीनां हि भक्तितः ॥ ८ ॥ शालग्रामशिलापू
जा विहिता ब्राह्मणस्य वै ॥ त्रयाणां क्षत्रियादीनां वेद्यभवत्येतु सोचिता ॥ ९ ॥ विष्णुः शिवो गणपतिः सूर्यो
देवी च पंचमी ॥ एता भक्तिमता पूज्या देवता विष्णुरेव वा ॥ १० ॥ शालग्रामा माममाः पूज्या विषमे एक एव च ॥ वं
शिनाम्बु शिला वापि शालग्रामशिला शुभा ॥ ११ ॥ शंखे द्विगरुपं नार्च्यं शालग्रामद्वयं तथा ॥ द्वे चक्रे द्वारिकाया
स्तु नार्च्ये सूर्यद्वयं तथा ॥ १२ ॥ शक्तित्रयं तथा नार्च्यं गणेशत्रयमेव च ॥ द्वौ शंखौ नार्चनीयौ च शिवलिंगद्विताप्र
तिमा तथा ॥ १३ ॥ पंचायतनपूजायां देवतासंनिवेशनम् ॥ यथोक्तविधिना कृत्वा ततः पूजनमाचरेत्
१४ ॥ मध्ये विष्णुस्तथैशाने शिवो वह्नौ गणेश्वरः ॥ नैरृते च रविर्वायौ दुर्गा स्थाप्या क्रमेण च ॥ १५ ॥
पंचायतनमेतद्धि पूजनीयं सतां सदा ॥ सूक्तेन पौरुषेणाथ तन्त्रमन्त्रैश्च वैदिकैः ॥ १६ ॥ देशकालोपकीसा

देवगणेशस्मृतिपूर्वकम्॥ कुर्यान्न्यासविधिं सम्यक्तत्केनैतेन च द्विजः॥२७॥ करयोः पादयोर्जान्वोः कट्यो
र्नाभौ हृदि कण्ठगात्र॥ कंठे बाहु मुखे नेत्रे मूर्ध्नि वा मागतो न्यसेत्॥२८॥ पूजाद्रव्याणि संशोध्य धौतश्रीखंडचंद
नपुष्पधूपेत्॥ यथाहरंश्रुतं वाऽथ ध्यात्वा श्रीविष्णुमर्चयेत्॥२९॥ अर्चकस्य तपोयोगादर्चनस्यातिशा
यनात्॥ आभिरूप्याच्च बिंबानां देवः सान्निध्यमृच्छति॥३०॥ सूक्तमंत्रैः षोडशाभिरुपचाराः क्रमशोऽत्र अ
र्पणीया भक्तिमता द्विजेन प्रसन्नहृदि॥ आवाहनं चासनं च पाद्यार्घ्याचमनानि च॥ स्नानं वस्त्रोपवीतानि चं
दनं कुंकुमानि च॥३१॥ धूपं दीपं च नैवेद्यं तांबूलं दक्षिणां तथा॥ पुष्पांजलिं प्रदायैवमसकृत्कुर्वीत सादर
म्॥३२॥ स्थिरायां प्रतिमायां च शालग्रामेऽपि सर्वदा॥ बाणलिंगे च कर्तव्यौ नावाहनविसर्जने॥३४॥ तत्र
सूक्ताद्यमंत्रेण ध्यानमेव विधीयते॥ पूजाविधौ न कुर्वीत भक्तिं शास्त्रीं कदाचन॥३५॥ नाऽक्षतैरर्चयेद्विष्णुं
न तुलस्या गणाधिपम्॥ न दूर्वया यजेद्देवीं बील्वपत्रैर्दिवाकरम्॥३६॥ न पंकेन च केतक्या नार्चयेच्छंक
रं तथा॥ उन्मत्तकं पुष्पं च विष्णोर्वर्ज्यं सदा बुधैः॥३७॥ मल्लिकामालतीजातीकेतकाशोकचंपकैः॥
पुन्नागनागबकुलैः पद्मकैरुत्पलैस्तथा॥३८॥ कुंदैश्च करवीरैश्च पुष्पैरन्यैः सुगंधिभिः॥ प्रशस्तं पूजनं
विष्णोर्वर्ज्यास्तु कनकेतकी॥३९॥ वर्ज्यं पर्युषितं पत्रं वर्ज्यं पर्युषितं जलम्॥ वर्ज्यं पर्युषितं पुष्पमालाकार



कृते केशनखोद्धत्तु॥ शुक्लांबरधरो नित्यं स्नातकाख्यो गृहे वसेत्॥४॥ अनापि स्वमीनतिवृद्धे द्विदिनमेक
मपि द्विजः॥ आश्रमं द्विविनातिष्ठन्न्यायप्रायश्चित्तेन शुद्ध्यति॥५॥ उद्वहेत्स ततो भार्यां सवर्णां लक्षणान्
वितां तु असमानगोत्रां च मातुरसपिंडकाम्॥६॥ असवर्णाविवाहोऽपि परदारानिवृत्तये॥ अतिकाम
कृतः पूर्वं द्विजस्य विहितः पुरा॥७॥ स च पातित्यहेतुत्वादधुना तु कलौ युगे॥ निषिद्धो मुनिभिस्तत्त्वज्ञै
स्तेन तत्परित्यजेत्॥८॥ स्त्रीसंबंधिषु पंचमादिक्षयिष्णु तिकुलं त्यजेत्॥ अभिशस्तं च पतितं दुराचारं त्यजेत्सु
धीः॥९॥ पुंलक्षणविहीनां च वयसा चाऽन्यगां सतः॥ कुशीलां सर्वभावेन द्विजः कन्यां समुद्वहेत्॥१०॥ कु
लक्षणा पितुः स्त्रीजा कुलक्षणा शिरोमणिः॥ सलक्षणा पिता साध्वी सर्वलक्षणासंभूतस्तु सा॥११॥ विवाहा
ब्राह्मणदैवार्षप्राजापत्यास्तथैव तथा॥ गांधर्वो राक्षसश्चासुरः पैशाचश्चेति कीर्तिताः॥१२॥ चत्वारस्तत्र विप्रा
णामाद्याः प्रोक्तास्ततस्त्रयः॥ प्रायः क्षत्रविशोरुक्ता हीनजातेस्तथाऽष्टमः॥१३॥ अग्निर्वैवाहिकश्चापि गृ
हीतव्यो द्विजन्मना॥ देवतानां तु सर्वासां प्रीणनाय निरंतरम्॥१४॥ सोऽग्निस्तदाप्रमादेन गृहीतो न यदा त
दा॥ विभागकाले दायस्य गृहीतव्यः प्रयत्नतः॥१५॥ दाराग्निरहिते ज्येष्ठे सोदरे सति नानुजैः॥ दारानग्निं र
हितैश्च गृहीतव्या न्यायपश्चित्ती स्मृतोऽन्यथा॥१६॥ परिवेत्ताऽनुजस्तत्र परिवित्तिश्च पूर्वजः॥ तावुभावपि

॥स॰नी॰पं॰ शैवो भागवश्चैव नार्हन्तो कृतवन्नु ॥१७॥ मेषस्थाः तु तुलयारो योनास्त्वेव परिवेदने ॥ धर्म्मवृद्धादिसक्केवाम्भेशेरो ॥स०८॥
॥२५॥ जिति नास्तिके ॥१८॥ कर्म्मस्थाने विवाहाग्नौ कुर्वीत गृहस्थ ग्रही ॥ दायकाला ऋते वापि श्रौतं वैतानिकाग्निषु
॥१९॥ स्थानात्तु कुलाभावाद्दारारिधारा ऽप्यनग्निकैः ॥ यः सदा धातुसंध्यां ते सायं प्रातर्जलांजलिम् ॥२०॥
सूर्य्य प्रजापतिभ्यां च नमस्तु च इत्युच्चरन्निति द्विवा ॥ सूर्य्यस्थाने ऽग्निमुद्दिश्य सायं दद्याज्जलं तथा ॥२१॥ कृत्वा ऽपि
भार्य्या कामेन यथेष्टाचरणो द्विजः ॥ क्वापि नैव प्रवर्त्तेत मर्य्यादां पालयन्करे ॥२२॥ ऋतुकाले ऽभिगमनं गृहस्थ
स्य स्मृतिर्नगौ ॥ स पोऽष्टानिशा रूपऋतु प्राप्ति दिनान्मता ॥२३॥ युग्माः पुत्रार्थिनस्तत्रायास्ताः कन्यार्थिनोऽ
पराः ॥ उत्तरात्तु उत्तरी श्रेष्ठा श्राकुस्त त्रापि शावरी मृ ॥२४॥ वर्ज्यास्तत्रापि यत्नेन तिथ्यारीण्वष्टमुसत्तम ॥ श्राद्धा
श्रुतस्नोपाभिमोदिवसश्च निरंतरम् ॥२५॥ श्राद्धाहः श्राद्धपूर्वाहः पर्वाणि निखिलानि च ॥ दशमि द्वादशी चैव
संक्रांती व्रतवासराः ॥२६॥ वर्ज्ये वैलेषु कालेषु नोपगच्छेत्स्त्रियं गृही ॥ गच्छंश्चेत्पुरुषो मूत्वा मानोरःस्था च नाय
ते ॥२७॥ भार्य्यां वस्त्रं च पारक्स्य सर्व्वोपायैर्गृहस्थितिः ॥ अन्नवस्त्रविभाषा शैर्मानानीया च नित्यदा ॥२८॥ विवाह
त्वा कूपितारक्षेद्रौ वने च पतिः स्त्रियम् ॥ रक्षेत्युर्वार्द्धके पुत्रा नास्ति स्त्रीणां स्वतंत्रता ॥२९॥ स्मातं त्रेण विन
ग्रांति कुलजातिश्चापि योषितः ॥ श्रस्यां त्वमतस्तासां प्रजापतिरकल्पयत् ॥३०॥ परदारान गंतव्याः सर्व्ववर्णै ॥२५॥

गृहे विना ॥३०॥ बिल्वं पत्रं च माध्यं च तमालामलकीदलम् ॥ कल्हारं तुलसीचैव पद्मं च मुनिपुष्पकम्
॥३१॥ हेमपुष्पाद्यलंकाराः कुशाश्च कलिकास्तथा ॥ एतत्पर्युषितं न स्यात्तीर्थतो पंच कत्रतं ॥३२॥ वैधृतौ
च व्यतिपाते भौम भार्गव भानुषु ॥ पर्वद्वये च संक्रांतौ द्वादश्यां सूतकद्वये ॥३३॥ तुलसीं नविचिनुसंध्या
यां सूनथा निशि ॥ विचिन्वन्महा ऽप्यदातां च मे च मेन मुद्रिरयेन ॥३४॥ तुलस्याः मूतनत्र मासिसदा त्वकेशव
प्रिये ॥ केशवार्थं विचिन्वामि वरदा नव शोभने ॥३५॥ कृत्वा मूर्द्धनि विन्यस्या तुलसीपत्रं मेजरि ॥ फलवर्णां
कोटिपुष्पाणां फलं यत्नत्स्यतो धिकम् ॥३६॥ पृथक्कृत्वा नार्च्चने चाधन ग्रात्यंत्यन्निवेदितम् ॥ निर्माल्यो च
धने ऽप्य मपस्पृष्णां दोषो महान्भवेत् ॥३७॥ प्रात्युं न शौचं नैवेद्यं पत्रं पुष्पं फलं जलम् ॥ शालग्रामशिला
संग्रामं सर्व्वं याति पवित्रताम् ॥३८॥ बाणलिंगे स्वयंभूते प्रतिमायां ग्रावस्य च ॥ नैवेद्यो दने दोषोस्ति देहलि
गेच धातुने ॥३९॥ पृथग्वेगेद्या श्रुपूजानव राग्मादी शुद्धितेः ॥ उपहारैः पायसाद्यैर्दैवैः कार्यानचाक्करैः ॥
४०॥ यं ग्रथम पा करेदृष्ट्वा द्विजाति मेद्य मांसयोः ॥ संसर्ग्गमपिनो कुर्य्यात्मद्यपानित्य कारणम् ॥४१॥ करा
मांसादि नैवेद्यं यस्मै प्रागर्पितं न वेत् ॥ तस्यादेवान नैवेद्यं गात्वे मन्त्रा द्युपिकल्पित ॥४२॥ द्विजन्मना तु दात
यं देवी पूजन कर्म्मणि ॥ माषाक्तं फलं वापि पायसान्नं च सर्व्वदा ॥४३॥ योन त्वान्मतत्कृतामेतां मर्य्यादां तुमा

॥स॰जी॰प्र॰५॥ ति: पुमान् ॥ वंशोच्छेदो न तस्य स्यात्कुंभीपाके मृत: पतेत् ॥४४॥ कुमार्गेण नाग्रे देवीमुपहारैर्यजेत यः ॥ अ ॥अ॰१॥
॥२५॥ रण्ये निर्जने देशे स भावेद्ब्रह्मराक्षसः ॥४५॥ देवार्चनमिति प्रोक्तमर्चायां खलु मानद ॥ स्थानान्तरेषु विविधं
कृत्वा यां कथयामि ते ॥४६॥ स्थंडिले तत्त्वविन्यासैः सूर्ये चाग्नौ महीतले ॥ कृत्वा विप्रैरुचिर्यया वह्नौ सलिले तेस
लिलादिभिः ॥४७॥ भावद्ध्येयं स्वहृदये ब्राह्मणे भोजनादिभिः ॥ वैष्णवेषु धुसत्कृत्या यजेद्देवं जितेन्द्रियः ॥४८॥
प्रातःकालेऽथ मध्याह्ने प्रदोषे चार्चनं हरेः ॥ त्रिःकर्तव्यं द्विजेनैकं रात्रौ केऽस्मत्सद्द्विज ॥४९॥ स्नानान्नैकक
र्ममंत्रःस्याचार्यशास्त्रादराः ॥ कार्यत्र ये द्विजस्यैव स्वरद्भिर्हृदयेऽहरिम् ॥५०॥ गायत्री मंत्रवर्च्चश्च आप
स्काले द्विजन्मभिः ॥ द्विकालमेवकस्य स्युः शुचिभिः प्रतिवासरम् ॥५१॥ दैनंदिनानामिति कर्माणां ते भाणोम
योक्तो हि विविधार्द्द्विजानाम् ॥ अयो गृहस्थाश्रमिणां च तेषां धर्मान्समासेन वदामि विप्र ॥५२॥ इति श्रीसत्सं
गिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे देवार्चनविधिनिरूपणनामा सप्तमोऽध्याय
:॥७॥ श्रीनारायणमुनिरुवाच ॥ उपकुर्वाणकोऽयश्च मंदवैराग्यवाजान्द्विजः ॥ गुरुवे दक्षिणां दत्वा स तु
स्नायाद्यथाविधि ॥१॥ गुरोरनुज्ञया स्नातो व्रतं वेदं समाप्य च ॥ धारयेद्वेणवीं यष्टिं मंतव्यामस्तयोत्तरम् ॥ अ
पत्रोपवीतद्वितयं सोरुकं नाम्ब्रभोजनम् ॥ छत्रं चोष्णीषमजं प्रादुके चाप्युपानहौ ॥३॥ रौक्मे च कुंडले वेदं ॥२५॥

पुष्करौ हि च वित्त ॥ स्वशूद्रान्तेषु पुष्पं हंत्री परदारागतिर्नृणाम् ॥३१॥ आयुर्यशस्तपः कीर्तिस्तेजसो यशा स:
श्रियः ॥ विनाशकारणं मुख्यं परदारप्रघर्षणम् ॥३२॥ यादृशं पुरुषस्येह परदारोपसेवनम् ॥ न तादृशम्
नायुष्यं लोके किंचन विद्यते ॥३३॥ मनसा च प्रदुष्टेन ये पश्यंति परस्त्रियम् ॥ ते जन्मरोगिणो नूनमीत्थायते तु
रूपाः किल ॥३४॥ परदारेषु ये मूढाश्चक्षुर्दृष्टं प्रयुंजते ॥ तेन दुष्टस्वभावेन जात्यंधास्ते भवंति हि ॥३५॥ स्त्रीवंध
काश्च स्त्रीदेवाः स्त्रीमंदजविहारिणः ॥ स्त्रीणां चानुप्रयोक्तारः स्त्रीभोगपरिभोगिनः ॥३६॥ स्त्रीदेवताः स्त्री
नियमाः स्त्रीविधाः स्त्रीप्रहारिणः ॥ स्त्रीभावाः स्त्रीकथालोभी ये च स्त्रीणां प्रलोभकाः ॥३७॥ यावंतो रोमकू
पाः स्युः स्त्रीणां गात्रेषु निर्मिताः ॥ तावद्वर्षसहस्राणि नरके पुपतंति ते ॥३८॥ नरकस्थं ते कृमिभिस्ते च तत्र ते
तेषु पाचिताः ॥ अग्निज्वालान्तरीर्यां च प्राप्नुवंत्येव वेदनाम् ॥३९॥ ये च मूढा दुराचारा वियोनौ मैथुने रताः ॥
पुरुषेषु च दुष्प्रज्ञा जायंते नपुंसकाः ॥४०॥ विधवानस्पृशेन्नारीः पुरुषो गृहवानपि ॥ विना स्वामनन्तसंबंध
स्त्रीयः कश्चिद्द्विनापदि ॥४१॥ मात्रा स्वस्रा दुहित्रापि न सहैकान्तवाचकोऽहरहः ॥ यावदर्थव्यवहारे दम्पत्या अपि वि
चक्षणाः ॥४२॥ स्त्रीणां प्रसंगविख्यिर्मानवानां स्त्रैणस्य वाप्यः क्षिति हि वै धुहेतुः ॥ ततो विवेकी द्विविधं तमु
न्ऊँस्य जेत सत्त्वमनुत्तमच्छमेषु ॥४३॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे

॥स॰जी॰पं०॥ धर्मोपदेशे गृहस्थधर्मेषु विवाहादिनिरूपणनामाऽष्टमोऽध्यायः ॥ ॥८॥ श्रीनारायणमुनिरु० ॥ अ० ९॥

॥१६॥ शनैः शनैः संचिनुयाद्धर्मं वल्मीकशृंगवत् ॥ परपीडामकुर्वाणः परलोकसहायिनम् ॥१॥ धर्म एव सहायी
स्यादमुत्र न परिच्छदः ॥ पितृमातृसुतभ्रातृयोषिद्धनादिकम् ॥२॥ देहे पंचत्वमापन्ने दग्ध्वा तं च सुताद
यः ॥ बांधवा विमुखा यांति धर्मस्तमनुगच्छति ॥३॥ मर्त्यो दुःखक्षणो यः स्यात्कुतो दग्धः शिवेन सः ॥ रक्षोऽर्थं
श्चैदरक्षं क्रिहरिश्चंद्रदग्धो नलम् ॥४॥ धर्मस्तु रक्षितः सर्वैः रक्षिदेहं जयेन च ॥ पुरा तत्तेन नृपतिभिर्धीमारे
र्दीस्त्वयाऽर्थिभिः ॥५॥ धर्मेणैव हरिः प्रीतो न वेला भुजगल्पतिः ॥ अर्थोऽरमत्त्विति तेनैत्तद्धर्मेणैव धृतं क्रिज ॥६॥ त्रि
वर्गेषु गुणेष्वेषो धर्मोऽत्रार्थस्तु मध्यमः ॥ कामो यवीयानुदितस्तस्माद्धर्मं समाश्रयेत् ॥७॥ धर्माविरुद्धः से
व्योऽर्थः कामोऽपि च तथाविधः ॥ तस्मै सम्यक्प्रयाति धर्मस्य दशमा प्रोक्ता निसूरभिः ॥८॥ तपो दानं क्षमा स्वरा
भाव शुद्धिर्विकुत्स्नुतम् ॥ यत्क्रियादयामर्त्येऽस्य मश्चेतिसम्मते ॥९॥ धर्मेणैव वर्षयस्त्वेव धर्म लोकाः प्र
तिष्ठिताः ॥ धर्मेणैव धियं देवाः सर्वो धर्मस्ततो मतः ॥१०॥ तस्माद्धर्मपरो भूत्वा गृही पंचमहामखान्
॥ कुर्यान्नित्यं पंचसूनादोषनाशार्थमादृतः ॥११॥ कंडनी पेषणी चुल्ली उदकुंभी च मार्जनी ॥ पंचसूना
गृहस्थस्य कथ्यन्ते पापहेतवे ॥१२॥ तद्दोषपरिहारार्थं कार्याः पंचमहामखाः ॥ अत्तोऽन्नयातुं तेनाऽपि येन रक्षा ॥१६॥

स्यापुयाद्गृहे ॥१३॥ देवश्च भौतिकः पैत्रो ब्राह्मो मानुष्य एव च ॥ प्रोक्ताः पंचमहायज्ञाः सद्गृहेषोपकारकाः
॥१४॥ ज्ञात्वगृह्योऽस्याग्निकोऽग्निः पञ्च नागेऽपि यथाविधि ॥ देवताभ्यो हविर्दद्याद्देवयज्ञः स उच्यते ॥१५॥ जले
वाऽभूमिहोतव्यमग्न्यभावे द्विजन्मना ॥ अन्नाभावे तु शाकाद्यैरपि दैवं समाचरेत् ॥१६॥ कृतशेषेण चान्नेन
न संस्कृतेषु भूतलेषु बलीन् ॥ भूतेभ्य आहरेन्नित्यं भूतयज्ञः स उच्यते ॥१७॥ स्वधायोत्र स यज्ञः स्यात्सम्यक्चेत्या
कर्पणान्न हि ॥ कुलस्ततानुष्ठी तयथाशक्ति तदेव तम् ॥१८॥ प्रातश्चैकं सकृद्वा स्वर्गमंते वा नित्यं कर्मणाम् ॥ अ
थवा वैश्वदेवांते ब्रह्मयज्ञस्त्रिधा मतः ॥१९॥ आवर्तनेऽवगाह्याऽपः कुशपाणिः कृतकृत्यः ॥ ब्रह्मयज्ञं प्रकु
र्वीत संध्योपासनाक्रियान्वितः ॥२०॥ स्नानं कृत्वा तु मध्याह्ने द्विजः संध्यामुपास्य च ॥ ब्रह्मयज्ञं ततः कृत्वा तर्पयेत्ते
त्तरीयकः ॥२१॥ स्ववेदसंहिताध्यायं सूक्तं वा पौरुषं पठेत् ॥ श्रीसूक्तमुक्तं वा शक्तः स्तोत्रमार्षं रमापतेः ॥२२॥
वेदादिपाठाऽसामर्थ्ये स्वाध्यायार्थं स कुर्ज्जपेत् ॥ द्विजः सप्रणवां भक्त्या गायत्रीं निगमात्मिकाम् ॥२३॥ पितृ
दैवोऽनसंततमेकं विप्रं तु भोजयेत् ॥ अशक्तो भुवि पिंडं वा दद्यात्तिलमखस्तु सः ॥२४॥ गोभ्यः श्वभ्यश्च काके
भ्यः कृमिभ्य आहरेत् ॥ किंचिदन्नं नतो द्वारि प्रतिक्षेताऽतिथिं स्थितः ॥२५॥ वृद्धं वा लं युवानं वा मूर्खं वाऽपं
डितं नरम् ॥ वैश्वदेवांते वा मूर्खं वा पंडितं प्राप्तमन्नेनातिथिमुच्यतम् ॥२६॥ हंतकारमथाऽग्रे वा भिक्षां वाऽऽ

॥स०जी०पं०॥ क्रितो द्विजः॥ दद्यादतिथये नित्यं मानुषीयज्ञरक्षये॥२७॥ ग्रासमात्रं भवेद्भिक्षा तासामग्रं चतुष्टयम् अ०९॥
॥२७॥ अग्रात्ति चापि चत्वारि हंतकारोऽभिधीयते॥२८॥ अतिथिं तत्र संजातमन्नाद्येनोदकेन च॥ सेवेत्स्वयं यथा
शक्ति गंधपुष्पादिभिस्तथा॥२९॥ न मित्रमतिथिं कुर्यान्नैकग्रामनिवासिनम्॥ तत्कालायात्तमज्ञातनामगोत्रं द्वि
तं विदुः॥३०॥ न पृच्छेद्गोत्रचारित्रं न स्वाध्यायं न पंडितः॥ शोभना शोभनाकारं तं मन्येत प्रजापतिम्॥३१॥ अ
नित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते॥ तस्मिंस्तुष्टे न यज्ञो तथाघ्राणान्मुच्येद्गृहाश्रमी॥३२॥ अध्वगः
क्षीणवृत्तिश्च विद्यार्थी च विरागवान्॥ यतिश्च ब्रह्मचारी च षडेते धर्मभिक्षुकाः॥३३॥ यतिर्व्रतःस्त्रि होत्री
च यश्चाऽत्रमरवरुद्द्विजः॥ सर्वे तेऽतिथयः प्रोक्ताश्च दूराध्वदिने दिने॥३४॥ तेभ्यो न दत्वा पुरुषो योऽन्नं भुंक्ते
गृहाश्रमी॥ स पापं केवलं भुंक्ते पुरीषं चाऽन्यजन्मनि॥३५॥ अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते॥ सदा
त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति॥३६॥ अल्पं वा बहुना वा शाकेन पत्रेण वा॥ आतिथ्यं स्वयमं तेनैव पूजयेत्स्व
त्या गृहस्थोऽतिथिमादरात्॥३७॥ अन्नाच्छादनदानेषु पात्रे नैव विचारयेत्॥ अन्नस्य क्षुधितः पात्रं वि
स्त्रो वसनस्य च॥३८॥ इत्येष पंचयज्ञानां विधिः संक्षेपतो मया॥ प्रोक्तो गृहस्थाश्रमिणां योऽनुष्ठेयो हि सर्व
था॥३९॥ अकृत्वा यो द्विजो मोहान्नित्यं पंच महामखान्॥ भुंजीत चेत्स मूढात्मा तिर्यग्योनिं प्रपद्यते॥४०॥ स ॥२७॥

पंचसूनाजनितेन सूनादोषेण लिप्तो यमयातनाश्च॥ हित्वानुदेहे जनने द्विजन्मा स्याधित्ततस्तानि दधित
नित्यम्॥४१॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे गृहस्थध
र्मेषु स्नानादिकर्मविधिनिरूपणनामा नवमोऽध्यायः॥९॥ श्रीनारायणमुनिरुवाच॥ श्रुतिस्मृत्युदितः
सम्यक्साधुभिश्च सेवितः॥ तमाचारं निषेवेत गृही नान्यं तु कंचन॥१॥ स्नानसंध्यापरो नित्यं सत्यवादी जितें
द्रियः॥ अनसूयो मृदुः शांतो लोभमोहविवर्जितः॥२॥ सावित्रीजाप्यनिरतो गोब्राह्मणहिते रतः॥ मातापित्रोर्हि
ते युक्तो देवब्राह्मणपूजकः॥३॥ दांतो यत्नात्क्षमायुक्तः परद्रोहविवर्जितः॥ यथोचितं वर्णं च सेवेत गृ
हाश्रमी॥४॥ न धर्मार्थवर्जितं काममर्थं वा मनसा स्मरेत्॥ स्त्रीद्रव्यापि निमित्तं धर्मं सर्वथा नैव हापयेत्॥५॥
त्रिवर्गे नातिकृतेश्चेण भजेत गृहमेध्यपि॥ अस्पृश्यां तपतितां द्रव्यं से विभजेत्सदा॥६॥ मृगांश्च पक्षिणो
ऽन्यांश्च क्रूरजीवान विद्विज॥ पश्येत्सुतं स्वमात्मानं नास्ति भेदो विचारतः॥७॥ पितरौ भ्रातरः पुत्राः स्नुषा दा
तास्तथा स्त्रियो॥ यं ह दृष्टुं मदिष्टेदु रनुमोदत निर्ममः॥८॥ गृहोचिताः क्रियाः कुर्वन्निषेवेत महामुनिन्॥ त
त्रं गायत्री धनाढ्यो स्यादनासक्तो गृहे स्वपि॥९॥ ये चाऽधिकारसंपन्नाः संपन्नाश्च धर्मदिनाभि॥ यथावि
धि यजेयुस्ते यज्ञैर्नानाविधैर्हरिम्॥१०॥ अश्वमेधादियज्ञानां निषिद्धत्वात्कलाविह॥ कर्तव्यास्तु विष्णुयाग

॥स.श्री.पं. महारुद्रादयो मखाः ॥११॥ पशुहिंसाविहीनाः सात्त्विकानां मखक्रियाः ॥ देवानां च हरेस्तत्तैर्यथैवं तृप्तिमितु अ०१०॥
॥१९॥ ता ॥१२॥ नास्त्यहिंसासमो धर्मो लोकेऽस्मिन्कोऽपि पावनः ॥ नास्ति हिंसासमं पापं तथाऽन्यन्नास्ति भूतले ॥
१३॥ पापसाम्ये पृथग्दोषस्त्वहिंसाविधिभिः श्रीयज्ञकरणं ॥ नृपकर्गं तत्सर्वयैसम्यग्भोजनैश्च सदक्षिणैः ॥१४॥ दृष्ट्वा
ग्निचक्रं कर्त्तव्यो होमारंभोऽन्यथास्तिकरः ॥ क्रूरग्रहसुखे पाताद्राकृतेः स्यान्महद्भयम् ॥१५॥ कृतेश्च ब्राह्म
णैस्तत्र यजमानेन तत्क्रिया ॥ ब्रह्मचर्यादिनियमाः पालनीयाः प्रयत्नतः ॥१६॥ एते सुनियमा श्रेष्ठा यद्यो
कीय योचितम् ॥ प्रायश्चित्तं न कुर्याच्चेत्स यज्ञो निष्फलो भवेत् ॥१७॥ यथोक्ता दक्षिणा तस्याद्यत्र यत्र न
वैदिकाः ॥ विप्रसंश्रीणाने यज्ञस्तस्मात्सोऽपि मखोऽफलः ॥१८॥ आत्मस्तुतेर्यथानोस्युर्नैर्भिर्विप्रमुखेकृतेः ॥ ह
रिस्तथैव तथा नो कृतैर्यज्ञैरविभिरैः ॥१९॥ अयमेव महान्यज्ञः सर्वयज्ञोत्तमोत्तमः ॥ ऋतुराजसितो चैतो
ऽस्मिन्पद्दि व्रतपर्णरताम् ॥२०॥ प्रीतेषु ब्राह्मणेष्वेव प्रीतोऽस्त्वं तं भवेद्धरिः ॥ त्रैलोक्यं हरिणा प्रीतं तस्मा
न्नाऽत्र संशयः ॥२१॥ विप्रा विष्णोः प्रिया यस्मात्तथा नैवं निजं वपुः ॥ प्रियाणामपि च विबुधानां च देवी रमा तथा
॥२२॥ येन संपूजिता विप्रास्तेन संपूजितो हरिः ॥ येनापमानिताः स्युश्च तेनाऽपमानितः ॥२३॥ अविद्यो
वा सविद्यो वा ब्राह्मणो भूतले नृणाम् ॥ पूजनीयो भोजनीयो नाऽपमान्यः कदाचन ॥२४॥ मानयब्राह्मणां ॥१९॥

स्तस्माद्धरीनिर्मत्सरः सदा ॥ देशकालविशेषेण कुर्याद्धर्मं विशेषतः ॥२५॥ समासं तं यत्र लभेत देशः पुण्यत
मो हि सः ॥ जन्मविद्यो यत्र यत्र सतां चित्वरणं तथा ॥२६॥ तपो विद्यादयो येताय च सुब्राह्मणोत्तमाः ॥ ह
र्यर्च्चापूजनं नत्या यत्र च सान्निध्यं तरम् ॥२७॥ नद्यः पुराणप्रथिता यत्र गंगादयस्तथा ॥ सरांसि पुष्कर
ादीनि क्षेत्राण्यपहाश्रितानि च ॥२८॥ तपःस्थानानृषीणां च वर्षर्द्धेऽपि च कुलाचलाः ॥ एते पुण्यतमा देशाः
पुण्यकर्मोचिताः सदा ॥२९॥ सहस्रगुणितं पुण्यमेषु स्यादितरस्य जात ॥ तस्मात्पुण्येषु तीर्थेषु कुर्या
त्पुण्यं विशेषतः ॥३०॥ प्रादुर्भावाद्विचरणान्निवासाच्च हरेर्द्विज ॥ परिग्रहान्मुनीनां च तीर्थानां पुण्यता
स्मृता ॥३१॥ तीर्थयात्रां चिकीर्षुः प्राग्विधायोपोषणं गृहे ॥ गणेशं च पितॄन्विप्रान्साधूञ्छक्त्यान्प्रपूजयेत्
॥३२॥ कृत्वाथ पारणं गच्छेत्तीर्थं नियमवान्ग्रही ॥ न परीक्ष्या द्विजास्तीर्थे नोऽस्मा[illegible]न्नार्थिनोऽखिलाः ॥
३३॥ तीर्थप्राप्तेः पूर्वदिने मुंडनं चाप्युपोषणम् ॥ कुर्यात्संप्राप्य तीर्थं तु श्राद्धं ब्राह्मणतर्पणम् ॥३४
यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ॥ विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते ॥३५॥ अक्रोध
नो दृढमतिः सत्यवादी जितेंद्रियः ॥ आत्मोपमश्च भूतेषु प्राप्नुयात्तीर्थजं फलम् ॥३६॥ तिर्यग्योनीन जा
यते न कुदेशे च तीर्थकृत् ॥ न दुःखी स्यात्स्वर्गभाक् च मोक्षोपायं स विंदति ॥३७॥ अश्रद्दधानः पापात्मा ना

॥स॰जी॰पं॰ ॥२५॥

क्तिको ऽच्छिन्नसंशयः ॥ हेतुनिष्ठश्च पंचैनेन तीर्थफलभागिनः ॥ ३६ ॥ ब्रह्मचर्यं विहीनो यस्तीर्थयात्रां त अ॰१०॥
माचरेत् ॥ न स तत्फलमाप्नोति प्राप्नोत्येव तु किल्बिषम् ॥ ३७ ॥ अन्यस्थाने कृतं पापं पुण्यक्षेत्रे विनश्य
ति ॥ पुण्यक्षेत्रे कृतं पापं वज्रलेपो भवत्यलम् ॥ ४० ॥ इत्याद्यानि नियम्यैव तत्स्नात्वा तीर्थेषु सद्गृही ॥ दानं द
द्याद्यथाशक्ति ब्राह्मणान्भोजयेत्तथा ॥ ४१ ॥ वयोऽधिका मातृतुल्याः समाना भगिनीसमाः ॥ कनिष्ठाः
कन्यकातुल्याः पश्येन्नारीः स निर्मलः ॥ ४२ ॥ कृतपात्रः पुनर्देहं सम्यक्श्राद्धमाचरेत् ॥ ब्राह्मणान्भो
जयित्वा च यथायात्रायाः फलमाप्नुयात् ॥ ४३ ॥ अथ स्वक्षेत्राणि पुण्यानि स्वस्ववित्तानुसारतः ॥ श्रद्धया पु
ण्यकाले तु कुर्वीत कृतकृत्यं गृही ॥ ४४ ॥ मासि मासि पदे कुर्याच्छ्राद्धमापस्माक्षिकम् ॥ स्वपित्रोश्च पितृव्यादे
चैव वसतीवा पृथक् ॥ ४५ ॥ दिनक्षये व्यतीपाते पुत्रे चायनद्वये ॥ द्वादश्यामनुराधायाः श्रवणस्य च सं
गमे ॥ ४६ ॥ एकादश्यां वा द्वादश्यां तु त्रयसंगमे ॥ कृत्तिकासु कृतनवम्यां च सप्तम्यां च तपःसिते ॥ ४७ ॥ अ
क्षयाख्यतृतीयायामेकास्वष्टिकास्वपि पद्दर्शे च कपिलाख्यायां योगे नाडींदिवाभिधे ॥ ४८ ॥ राकायाम
मावस्यां वा तन्मासाख्यक्षसंगमे ॥ दिने स्वजन्मर्क्षयुते मन्वादिषु तिथिष्वपि ॥ ४९ ॥ युगादिषु विख्यो श्र
प्रादुर्भावदिनेषु च ॥ इंदुक्षयेऽर्कसंक्रांतौ चंद्रसूर्यग्रहे तथा ॥ ५० ॥ स्नानं दानं जपो होमः श्राद्धं ब्राह्मणा ॥१९॥

भोजनम् ॥ एतेषु कुर्याद्यत्किंचित्सुपुण्यं स्यादक्षयं हितम् ॥ ५१ ॥ अमावास्याऽथ सोमेन सप्तमी भानुना स
ह ॥ चतुर्थी भूमिपुत्रेण सोमपुत्रेण चाऽष्टमी ॥ ५२ ॥ चतस्रस्तिथयस्त्वेताः सूर्यग्रहणसंमिताः ॥ आ
स्कदानं जपो होमो भवेत्कोटिगुणं कृतः ॥ ५३ ॥ गर्भाधानादिसंस्कारत्रयकालेऽथ योषितः ॥ जातकर्मा
दिषु तथा संस्कारेषु फलतस्य च ॥ ५४ ॥ प्रेतकर्माणि पित्रोश्च मृता दैवार्षिके तयोः ॥ कुर्यात्पुण्यं यथाशा
क्ति स्वस्य चाभ्युदये सति ॥ ५५ ॥ श्रोत्रियाय कुलीनाय विनीताय तपस्विने ॥ वृत्तस्थाय दरिद्राय प्रदानं दे
यं हि सर्वदा ॥ ५६ ॥ यथा तपः सत्ययुगे च त्रेतायुगे द्वापरे यज्ञपूजा ॥ हितायन्नृणां मुदितात्तथैव च
कलौ युगे ॥ ५७ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे गृह
स्थधर्मेषु देशकालपात्रविशेषनिरूपणनामा दशमोऽध्यायः ॥ १० ॥ श्रीनारायणमुनिरुवाच ॥ स
र्वेषामिह दानानामन्नदानं विशिष्यते ॥ अन्नाद्धि प्राणिनां प्राणास्त्वन्नदः प्राणदः स्मृतः ॥ १ ॥ अन्नमम्
नमित्याह पुरा कल्पे प्रजापतिः ॥ अन्नमाश्रित्य वर्त्तन्ते च यतो लोका न संशयः ॥ २ ॥ ब्राह्मणायाभिरूपा
य योऽदद्यादन्नमर्थिने ॥ स निधत्ते निधिश्रेष्ठं पारलौकिकमात्मनः ॥ ३ ॥ ब्राह्मणं क्षत्रियं वैश्यं शूद्रं वा
ऽप्यक्षुधातुरम् ॥ दृष्ट्वा स्वयमुपोष्यापि योऽन्नं दत्ते स धर्मवित् ॥ ४ ॥ कृतपातककर्माऽपि यो दद्यादन्नम

र्थिने ब्राह्मणाय विशेषेण न स पापेन लिप्यते ॥५॥ अन्नाभावे तु भिद्यंते शरीरे पंचधातवः ॥ बलं च
जवतीः पीडयंत्यन्नदानितः ॥६॥ अन्नेन वर्त्तते सर्वं यत्किंचित्स्थावरजंगमम् ॥ त्रिषु लोकेषु धर्म्मा
र्थमन्नं देयमतो बुधैः ॥७॥ अन्नदस्य मनुष्यस्य बलमोजो यशांसि च ॥ पुण्यं च वर्द्धते शश्वत्त्रिषु लोकेषु
सुव्रत ॥८॥ भवनान्यन्नदातॄणां प्रकाशंते त्रिविष्टपे ॥ तरुणादित्यवर्णानि स्थावराणि चराणि च ॥९॥ प्रासा
दाः पांडुराः शुभ्राः शय्याश्च कनकोज्ज्वलाः ॥ अन्नदातास्ताः प्रपद्यंते तस्मादन्नप्रदो भवेत् ॥१०॥ जस्पे॰
वाप्यः युतं विप्रान्सहस्रं शतमेव वा ॥ सदन्नैः पायसाद्यैश्च शक्तितो भोजयेत्तु यः ॥११॥ दिव्यं विमानमा
रूढस्सौवर्णं सूर्यवर्चसम् ॥ गीयमानो देवगणैः स स्वर्गे वसति ध्रुवम् ॥१२॥ तथा च भूमिदानं च म
हादानं प्रकीर्त्यते ॥ सर्वान्कामानवाप्नोति भूमिदानेन मानवाः ॥१३॥ अपि गोचर्ममात्रां यः पक्कध्या
नभूतां महीम् ॥ विप्राय साधवे दद्यात्तस्य पुण्यमनंतकम् ॥१४॥ एको वृषः शतं गावो यावत्संशेरते सु
वि ॥ गोचर्ममात्रा सा भूमिरुच्यते परिमाणतः ॥१५॥ सम्यग्मेधादिकं पुण्यं सद्यः प्राप्नोति निश्चितम् ॥१६
सुवर्णरजतं वस्त्रं मणिमुक्तावसूनि च ॥ सर्वमेतन्महाप्राज्ञो ददाति वसुधां ददत् ॥१७॥ पंच पूर्वा॰
न्पुरुषान्स्वं च पंच परानपि ॥ एकादशमदन्भूमिं परिपाति ह मानवः ॥१८॥ सर्वोपस्करसंयुक्तं दद्दे वेश्म

द्विजाय यः ॥ दद्यात्सहस्र विधिवत्सलोकं स चानुयात् ॥१९॥ प्राकारा यत्र सौवर्णा गृहाण्युच्चैस्तराणि च
॥ नानारत्नैर्भूषितानि तानि प्राप्नोति वेश्मदः ॥२०॥ कुटुंबिने ब्राह्मणाय सुशीलां गां ददाति यः ॥ सवत्सां
वस्त्रसंयुक्तां सुरूपां च पयस्विनीम् ॥२१॥ हेमशृंगीं रूप्यखुरीं मुक्ताहारविभूषिताम् ॥ सदक्षिणां विधा
नेन विष्णुलोकं स चानुयात् ॥२२॥ सुवर्णं दक्षिणोपेतं ब्राह्मणाय ददाति यः ॥ स प्राप्नोति समासिंस स
र्वदोषैः प्रमुच्यते ॥२३॥ माघमासे तिलान्यस्तु ब्राह्मणेभ्यः प्रयच्छति ॥ ताम्रपात्रभृतान्सोपि यमलोकं
न पश्यति ॥२४॥ निदाघकाले पानीयं यः प्रयच्छत्युपानहौ ॥ छत्रं च वर्षाकाले यः स्वर्गलोकं प्रयांति ते
॥२५॥ एकादशीव्रते कृत्वा द्वादश्यां भोजयेत्तु यः ॥ विष्णुभक्तान्द्विजान्साधून्विरक्तांश्च विशेषतः ॥२६॥
सर्वेषामपि यज्ञानां प्राप्नोति विफलं स च ॥ तस्मिन्प्रीते हरिर्दत्ते सर्वं तन्मनसेप्सितम् ॥२७॥ द्वादश्यां मार्ग
शीर्षस्य केशवं तु प्रपूजयेत् ॥ तद्भक्तान्भोजयेत्तस्य फलं स्यादश्वमेधजम् ॥२८॥ पौषे नारायणं नत्वा
पूजयित्वा विभोजयेत् ॥ द्वादश्यां ब्राह्मणांस्तस्य वाजपेयफलं भवेत् ॥२९॥ माधवं यः समभ्यर्च्य द्वादश्यां मा
घमासि च ॥ भोजयेद्ब्राह्मणांस्तस्य फलं स्याद्राजसूयजम् ॥३०॥ गोविंदं फाल्गुने भक्त्या मासि यो द्वादशी
दिने ॥ प्रीणयेद्ब्राह्मणांस्तस्य फलं स्यादतिरात्रजम् ॥३१॥ विष्णुं भक्त्या समभ्यर्च्य द्वादश्यां मधुमासि च ॥ त

भक्त्या ब्राह्मणान्साधून्स्वशक्त्या प्रीणयेत्तु यः ॥ ३२ ॥ पौंडरीकस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ दिव्यं लो- 
कमवाप्नोति देहान्ते देवदुर्लभम् ॥ ३३ ॥ द्वादश्यां पूजयित्वा यो माधवं मधुसूदनम् ॥ भोजयेद्ब्राह्मणांस्तस्य
त्वग्निष्टोमफलं भवेत् ॥ ३४ ॥ त्रिविक्रमं पूजयित्वा ज्येष्ठे द्वादशीदिने ॥ भोजयेद्यो द्विजान् याति चाक्षयम
नन्तं फलम् ॥ ३५ ॥ संपूज्य वामनं भक्त्या द्वादश्यां शुचिमासि यः ॥ विप्रांश्च भोजयेत्तस्य फलं सौत्रामणिया
गजम् ॥ ३६ ॥ श्रावणे श्रीधरं यश्च समभ्यर्च्य द्वादशीदिने ॥ भोजयेद्ब्राह्मणान्सोऽपि याति विश्वजितः फलम् ॥
३७ ॥ हृषीकेशं भाद्रपदे द्वादश्यां च समर्च्य ॥ ब्राह्मणान्भोजयेत्तस्य सौत्रामण्याः फलं भवेत् ॥ ३८ ॥ आश्वि
ने पद्मनाभं यः समभ्यर्च्य द्वादशीदिने ॥ विप्रान्संतर्पयेत्सोऽपि सौमिकं फलमाप्नुयात् ॥ ३९ ॥ द्वादश्यां कार्ति
के चैव दामोदरं द्विजान् ॥ भोजयेद्यः स चाप्नोति सर्वमेधफलं पुमान् ॥ ४० ॥ द्वादशी वैष्णवी प्रोक्ता
तिथिर्नारायणस्य च ॥ तस्यां यस्तु हुतं कुर्यात्तद्भवेदक्षयं खलु ॥ ४१ ॥ दानानि च यथाशक्ति दद्याद्विप्राय तद्
दिने ॥ तत्तद्दत्तं चितेऽभीष्टं भक्त्यानन्तं प्रीणयेद्धरिः ॥ ४२ ॥ एवंविधो गृही दिव्यं किंकिणीजालमण्डितम् ॥ अर्क
प्रभं समारुह्य विमानं याति तत्परम् ॥ ४३ ॥ अपथ्यं त्विह माहारं रोगिणे रोगशान्तये ॥ ददानो रोगर
हितो दीर्घायुर्जायते नरः ॥ ४४ ॥ वेदशास्त्रपुराणानां वा भारतं वा ददाति यः ॥ अक्षयं तद्भवेत्पुण्यं सर्वपापक्ष- ॥ २१ ॥

यो भवेत् ॥ ४५ ॥ शीतकाले च वस्त्राणि कम्बलानूर्णपटांस्तथा ॥ ददाति यो ब्राह्मणेभ्यः स निःसंकटमे
धते ॥ ४६ ॥ यद्यदिष्टतमं लोके यच्चापि दयितं गृहे ॥ तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ॥ ४७ ॥ द्वाद
श्यां चैत्रशुक्लेन श्वेतवस्त्रप्रदो नरः ॥ चैत्रे प्रतिदिनं वा यः सोऽक्षयं स्वर्गमेति हि ॥ ४८ ॥ चैत्रारम्भे स्वर्णदः शु
क्लेऽत्रोपानत्प्रदस्तथा ॥ छायाप्रदः शुचौ मासि श्रुतदीपमवाप्नुयात् ॥ ४९ ॥ पुराणदाता नभसि प्रौष्ठपादे च
गोप्रदः ॥ इषे भूदाता पुरुषः कुलमुद्धरते निजम् ॥ ५० ॥ ऊर्णामूर्जे च ज्वलनं मार्गशीर्षे चेन्धनपर्वतम् ॥ फाल्गु
ने मकरपिण्डं यो दद्यात्करवीसरा ॥ ५१ ॥ न दानं पशवे दद्यान्न भयान्न च लोभतः ॥ परलोकहितायैव देयं पा
त्राद्द्विजाय तत् ॥ ५२ ॥ पात्रभूतोऽपि यो विप्रः प्रतिगृह्य प्रतिग्रहम् ॥ असत्सु विनियुंजीत तस्मै देयं न कर्हिचि
त् ॥ ५३ ॥ दानकाले तु संप्राप्ते विप्रस्यासन्निधौ सति ॥ संकल्प्य मनसा तत्तु जलमध्ये जलं क्षिपेत् ॥ ५४ ॥
दातुः फलं दशगुणं भवेद्देवेक्षणे सति ॥ गृहीतुरपि विप्रस्य न दोषः स्यात्प्रतिग्रहे ॥ ५५ ॥ विद्या चैव दरिद्राय
लक्ष्मीं भ्रष्टाय चार्थिने ॥ यद्दीयते तदक्षय्यं फलं जायते विशेषतः ॥ ५६ ॥ अक्रोधना धर्मपराः सत्यन्ति
त्याद्मेरताः ॥ शरणाः साधवो विप्रास्तेभ्यो दत्तं महाफलम् ॥ ५७ ॥ अमानिनः सर्वसहा निःस्पृहा विजितें
द्रियाः ॥ सर्वभूतहिता मैत्रास्तेभ्यो दत्तं महाफलम् ॥ ५८ ॥ सांगांश्चतुरो वेदानधीते यो द्विजर्षभः ॥ स्वकर्म-

निरतः शास्त्रतः सत्सात्वं स प्रकीर्त्यते ॥ ५९ ॥ स्ववृत्तेर्भक्त्या यद्दानं ददाति धनवान् गृही ॥ सहस्रगुणितं सद्य
स्तद्भवेत्सैव निश्चितम् ॥ ६० ॥ प्रज्ञाश्रुतामांश्रीजनवृत्तेन च समन्वितः ॥ तारयत्येव हि कुलं स एकोऽपि
द्विजत्तमः ॥ ६१ ॥ विद्यया विपुलोपेतं ब्राह्मणं साधुसंमतम् ॥ ईदृशाय च सत्कृत्य सद्भावेन प्रपूजयेत ॥ ६२ ॥
निष्फलं न च सत्स्वेतच्चारचारणतस्करे ॥ कुवैद्ये कितवे धूर्ते जडे मल्ले च बंदिनि ॥ ६३ ॥ मायार्जितेनैव ध
नेन कुर्याद्दानं यथाशक्ति गृही द्विजः ॥ न त्वेकत्र याचितो निजपोष्यवर्गनाश्य आयजेद्धनेन चापि ॥ ६४ ॥
इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे गृहस्थधर्मेषु दानविधिनि
रूपणनामैकादशोऽध्यायः ॥ ११ ॥ श्रीनारायणमुनिरुवाच ॥ स्वविभवानुसारेण गृहस्थो हरिमंदिरम्
कारयेत्सुदृढं भक्त्या सुधांशिल्पसमेतलम् ॥ १ ॥ यथा यथातितरां कारयेन्मंदिरं गृही ॥ तथा तथा फ
लोत्कर्षो ज्ञातव्यस्तस्य स्फुटं ॥ २ ॥ मंदिरं कारयेदूर्ध्वं प्राचीसाधनपूर्वकम् ॥ पुरस्तस्यैकतो मंचं कारये
त्तार्क्ष्यमंडपम् ॥ ३ ॥ मंदिरं चाभितः कार्या धर्मशाला मनोहरा ॥ पांथवैष्णववासार्थं प्राकारेणाभि
वेष्टिता ॥ ४ ॥ उद्यानं कारयेत्तत्र फलपुष्पद्रुमान्वितम् ॥ मिष्टनिर्मलपानीयां वापिकां च सदोदकाम् ॥
५ ॥ मध्ये श्रीवासुदेवं तु मंदिरे स्थापयेद्यदा ॥ आग्नेय्यां मं विकांसूर्यं नैर्ऋते स्थापयेत्तदा ॥ ६ ॥ ईसाणे ॥ २२ ॥

स्थापयेच्छंभुं चेशाने सात्मजं शिवम् ॥ महोत्सवेन तन्मूर्तिः स्थापनीयाथ यथाविधि ॥ ७ ॥ हरेरुपासनातंत्रा
णि पुराणोक्तानि तेन वै ॥ पंचरात्राभिधानानि सप्तरात्राभिधानि च ॥ ८ ॥ व्यस्तानि तानि मुनिभिः काले
न द्विविधेन च ॥ पंचविंशतिसंख्यान्यानि तेषां नामानि मच्छृणु ॥ ९ ॥ हयग्रीवं वैहायसं च पौष्करं गार्ग्य
गालवम् ॥ प्राज्ञादं नारदीयं च षष्ठीप्रश्नं शौनकं तथा ॥ १० ॥ शांडिल्यं मैमस्सुरं तार्क्ष्यं वाशिष्ठं ज्ञानसागरम् ॥
स्वायंभुवं च विश्वोक्तं सनत्कुमारं कापिलं तथा ॥ ११ ॥ नारायणीयमात्रेयं नारसिंहं तथारुणम् ॥ बौधायनं
च सानंदमष्टांगं तार्क्ष्यं तथान्तिमम् ॥ १२ ॥ एतेष्वागमतंत्रेषु नोक्तमार्गेस्त्वैवं विधिम् ॥ मंदिरे तत्प्रतिष्ठां च पू
जनं च समाचरेत् ॥ १३ ॥ विष्णोः शंभोश्च दुर्गाया गणपदेवीनां च तदात्मनाम् ॥ कारयेन्मंदिरालयं चेद्वै भवेत्सति
सद्गृही ॥ १४ ॥ चैत्रफाल्गुनवैशाखज्येष्ठमासाः शुभावहाः ॥ सर्वदेवप्रतिष्ठायां चैत्रं नेच्छंति केचन ॥ १५ ॥
प्रतिष्ठायां तथा विष्णोर्माघमासो न चोचितः ॥ दक्षिणं चायनं तद्वन्निषिद्धं देवकर्मणि ॥ १६ ॥ माघफाल्गु
नवैशाखज्येष्ठाषाढेषु पंचसु ॥ मासेषु शुक्लपक्षे च शिवस्थापनमुत्तमम् ॥ १७ ॥ देवालयं कारयति धर्म
शालां च यः पुमान् ॥ स तारयति संसारादात्मनः सप्तपूरुषान् ॥ १८ ॥ यावत्संख्यिकास्तत्र चिता देवालयादि
षु ॥ तावत्संख्य सहस्राणि तत्कर्ता स्वर्गमावसेत् ॥ १९ ॥ श्रीमतो वासुदेवस्य कारयात्युत्तमं तु यः ॥ मंदिरं

॥स॰ जी॰ पं॰ कल्पं तं रम्यं समोक्षं प्राप्नुयाद्ध्रुवम् ॥२०॥ मध्यमं कारयेद्यस्तु पुमांस्तन्मंदिरं नवम् ॥ स वै वैकुंठमाप्नोति लो श्री॰ १२॥
॥२३॥ के लोकनमस्कृतम् ॥२१॥ कनिष्ठं मंदिरं यस्तु कारयेत्तस्य वा हरेः ॥ स्वर्लोकमाप्नोति स पुमानपि निश्चि
तम् ॥२२॥ फलं यद्धनी स्वेष्टतमेन यत्तु प्राप्नोति तन्मंदिरं कर्मणा ततः ॥ प्राप्नोति हि स्वल्पधनः कनिष्ठं तत्का
रयित्वा प्रयतः स्वशक्त्या ॥२३॥ प्रतिष्ठय यः सार्वभौमं सप्तनाभुवनत्रयम् ॥ पूजादिना ब्रह्मलोकं त्रिभिर्लु
साम्यमाप्नुयात् ॥२४॥ यः कारयति तद्धाम निर्द्वन्द्वः प्रीतये हरेः ॥ कुलानि द्वात पुरुषान्वैकुंठे निवसन्ति सो
॥२५॥ कुड्यादिभिर्विशीर्णं पतितं वा जीर्णोद्धारं च कारयेत् ॥ देवालयमगादेष्टं यस्तस्य फलकृतं महत् ॥२६॥ तेमाने
वैष्णवं स्तत्रय स्थूलवानुलेपयेत् ॥ दीपं च तत्र यः कुर्याद्धि स्फुलोकं च यांति ते ॥२७॥ तथा कूपांश्च वापीश्च तडा
गानि च येन वा ॥ कारयेत्तस्य यत्पुण्यं तेषां तद्भवति ध्रुवम् ॥२८॥ वर्षाकाले तडागे तु सलिलं यस्य तिष्ठति ॥
अग्निहोत्रसमं तस्य फलमाहुर्मनीषिणः ॥२९॥ शरत्काले तु सलिलं तडागे यस्य तिष्ठति ॥ गोसहस्रप्रदान
स्य फलं स लभते नरः ॥३०॥ हेमंतकाले सलिलं तडागे यस्य तिष्ठति ॥ स वै बहुसुवर्णस्य यज्ञस्य लभते फ
लम् ॥३१॥ यस्य वा शिशिरे काले तडागे सलिलं भवेत् ॥ तस्याग्निष्टोमयज्ञस्य फलं भवति कथ्यते ॥३२॥ वसं
तकाले सलिलं तडागे यस्य वर्त्तते ॥ सोतिरात्रस्य यज्ञस्य फलं प्राप्नोति मानवः ॥३३॥ निदाघकाले पानीयं त ॥२३॥

डागे यस्य तिष्ठति ॥ फलं स वाजिमेधस्य यज्ञ लभते पुमान् ॥३४॥ स कुलं तारयेत्सर्वं येन खाते जलाशये
गावः पिबंति सलिलं साधवश्च नराः सदा ॥३५॥ सर्वाण्यपि च सत्त्वानि तृषार्तानि पिबंति यत् ॥ जलाशा
ये तस्य पुण्यमप्रमेयं हि कीर्त्तने ॥३६॥ तडागमभितो रोपयाश्छाया वृक्षा वटादयः ॥ तेनात्र कीर्तिश्च भवेत्
स्वर्गोक्षयः परत्र च ॥३७॥ आरामाश्चापि कर्त्तव्याः शुभवृक्षैः फलशोभिनाः ॥ जलाशयस्यापकंठे गृहस्थेन
स्वर्गार्थिना ॥३८॥ फलोपयोगिनः सर्वे तथा पुष्पोपयोगिनः ॥ आरामे पुष्पमारोप्य पितृदेवोपभोगदाः ॥३९॥
अश्वत्थमेकं न्यग्रोधमेकं दशतिंतिडीकं कपित्थं बिल्वामलकीत्रयं यो ॥ च पंचाम्रवाप्यान्नरकं स नैयात् ॥४०॥
उद्दिश्य विष्णुं पुरुषो नरः कुर्यात्प्रपूर्णं परित्यं फलं तं तु भक्त्या ॥ अनेन तामेति तदेव सद्यः कुर्यात्ततो नक्रि समेत
त ॥४१॥ यस्य हेमप्रतिमां सेवाप्रसर्वैर्नाभिधानतः ॥ गृहस्थैः स्वग्रहाः पूजा राजभिस्तु विशेषतः ॥४२॥ दुःखितो
यस्तु यस्य स्वास्थ्यस्तस्य सपत्नतः ॥ तुष्टो ग्रहः फलं दत्ते रुष्टः पीडयति ध्रुवम् ॥४३॥ रविणा सत्तमेस्थो न
रावणो विनिपातितः ॥ अष्टमेन शशांकेन हिरण्यकशिपुर्हतः ॥४४॥ अंगारे कनिरोधेन नमुचिश्च हतो
रणे ॥ पांडवा धृतकर लोबुधेनापि नियोजितः ॥४५॥ गुरुणा जन्मसंस्थेन हतो राजा सुयोधनः ॥ षष्ठेनोश
नसा युद्धे हिरण्याक्षो निपातितः ॥४६॥ ज्ञाने शनैश्चरेण सौदासो नरमांसेनियोजिताः ॥ राहुणा पीडितो राजान

॥स.जी.पं.५॥ लोभतो भीतो महितस्ते ॥ ४७ ॥ केतुना पीडितस्थाग्र्यः मूर्छासंग्राममजित्तया ॥ एवं बहुविधा भूपा गृहस्थैर्विहिंसिताः ॥ ॥अ०२२॥
॥२४॥ ४८ ॥ सोऽतिविंदो विदित्वैव उञ्छस्थानस्थितानृषीन् ॥ शांतिस्तेषां प्रकर्तव्या दानेन दत्त्वा यथाविधि ॥ ४९ ॥ माणि
क्यं तरणेः सुजातममलं मुक्ताफलं शीतगोर्माहेयस्य च विद्रुमं मरकतं सौम्यस्य गारुत्मतम् ॥ देवेज्यस्य च पु
ष्परागमसुरामात्यस्य वज्रं शनेर्नीलं निर्मलमन्ययोश्च गदिते गोमेदवैदूर्यके ॥ ५० ॥ धेनुः शंखोऽरुणरुचिर्वृ
षः कांचनं पीतवस्त्रं श्वेतस्त्वश्वः सुरभिरसिता कृष्णजीर्णं हि ने च लोहम् ॥ सूर्यादीनां मुनिभिरुदिता दक्षिणा
स्तु ग्रहाणां स्यानेर्दानैरेवं नवभिरिति ते ग्रहाः स्युः प्रसन्नाः ॥ ५१ ॥ देवब्राह्मणवेदानां गुरुवचःसंपादनात्सर्वसा
धूनामपि सेवनाच्छांतिर्हि नं सच्छास्त्रसंशीलनात् ॥ ५२ ॥ होमादध्वरदर्शनाच्च विमलो भावाज्जपाद्दानतो नो कु
र्वंति कदाचिदेव पुरुषस्यैते ग्रहाः पीडनम् ॥ ५३ ॥ यतीनां च वनस्थानां वर्णिनां रंकदेहिनाम् ॥ साधूनां पान्थकानां
च पोषणं गृहिणां हितम् ॥ ५४ ॥ अनेनैव पुराणेषु हेतुना हि गृहाश्रमः ॥ इतराश्रमतः श्रेष्ठः कीर्तितो मुनिभि
र्द्विज ॥ ५५ ॥ अतिथौ स्वगृहे प्राप्ते समुत्थायादरेण तम् ॥ नमस्कारासनं दत्त्वा पूजयेच्च यथोचितम् ॥ ५६ ॥ वाक्यैः
सुमधुरैः कृत्वा स्वागतात्युग्यथा भोजयेत् ॥ तस्मिंस्तुष्टे विजानीयां तुष्टं त्रैलोक्यमित्यहम् ॥ ५७ ॥ यद्येवं गृहिणा न
स्यात्किमर्थं क्रियते सदा ॥ गृहांधकूपे विषमे पतित्वा तेन भूतले ॥ ५८ ॥ पशुपक्षिमृगाद्यो पिजीवा बहवः ॥२४॥

संसुद्रेऽनराहितोके ॥ यद्भितारक्षावृत्तिमानुष्यरक्षी स्याद्विजातस्यं किंगतस्तदा न किंस ॥ ५९ ॥ इति श्रीसत्संगि
जीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे गृहस्थधर्मेषु पूर्तकर्मादिविधिनिरूप
णनामा द्वाविंशोऽध्यायः ॥ २२ ॥ श्रीनारायणमुनिरुवाच ॥ ब्राह्मणस्य गृहस्थस्य विशेषं कथयाम्यथ ॥ सदा
शुचिः शुद्धदेहः स्वकर्मनिरतः सदा ॥ १ ॥ शांतो दांतस्तितिक्षुश्च निःसंदेवेदार्थचिंतकः ॥ स्वधर्मेन समेत्क्वापि
दुःसंगेन समाचरेत् ॥ २ ॥ मुक्तांबरधरो नीचकेशश्मश्रुस्तपःप्रियः ॥ नातिसूक्ष्मपटो नित्यमनालस्यो
ऽस्त्वनिंदकः ॥ ३ ॥ स्नानसंध्यापरो नित्यं ब्रह्मयज्ञपरायणः ॥ सावित्रीजाप्यनिरतः श्राद्धकृन्मुच्यते गृही ॥ ४
॥ विभागशीलः सततं क्षमायुक्तो दयापरः ॥ गृहस्थस्तु समाख्यातो न गृहेण गृही भवेत् ॥ ५ ॥ आहुतं च
हुतं चैव प्रहुतं प्राशितं तथा ॥ ब्राह्मं हुतं पंचमं च नित्यं यज्ञानिमांश्चरेत् ॥ ६ ॥ जपोऽहुतो होमः प्रहुतो भौ
तिको बलिः ॥ प्राशितं पितृसंतर्पि हुतं ब्राह्मं द्विजार्चनम् ॥ ७ ॥ पंचयज्ञानिमान्कुर्वन्ब्राह्मणो नावसीद
ति ॥ एतेषामननुष्ठानात्पंचसूनाघमाप्नुयात् ॥ ८ ॥ आत्मार्थं भोजनं यस्य रत्यर्थं यस्य मैथुनम् ॥ वृत्त्यर्थं य
स्य चाऽधीतं निष्फलं तस्य जीवितम् ॥ ९ ॥ न शब्दशास्त्राभिरतस्य मोक्षो न चैव रम्यावसथप्रियस्य ॥ न भो
जनाच्छादनतत्परस्य न लोकचित्तग्रहणे रतस्य ॥ १० ॥ एकांतशीलस्य सुसंदेवनस्य सर्वेंद्रियप्रीतिनिवर्त्त

कस्य ॥ स्वाध्याययोगेमतमानसस्य मोक्षो ध्रुवं नित्यमहिंसकस्य ॥११॥ तस्मान्नित्यं व्रतस्थः स्यादग्निसेवापरा
यणः ॥ नमस्कश्रुतपस्वाध्यायो ब्राह्मणो वीजितेंद्रियः ॥१२॥ न धर्मस्यापदेशेन पापं कृत्वा व्रतं चरेत ॥ व्रतेन
चैव स्त्रीविशूद्रांगत्र्यूंते ब्रह्मवादिनभिः ॥१३॥ पाषंडिनो विकर्मस्थान्वामाचारान्कुरद्रुहः ॥ वेदनिंदारता
न्मर्त्यान्दूरतः परिवर्जयेत ॥१४॥ अन्नं तात्यारशांश्चुतथाः भक्ष्यस्याभक्षणात् ॥ श्रौतधर्मपरित्यागात्कु
लं विप्रस्य नश्यति ॥१५॥ कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च ॥ कुलान्यकुलतां यांति ब्राह्मणातिक्र
मेण च ॥१६॥ परंनिंदां न कुर्वीत नास्याधापरोभवेत ॥ अपापं पापिनं नैव प्राणांतेऽपि प्रकीर्त्तयेत ॥१७
॥ स्नात्वा पुंड्रं मृदा कुर्याद्धुत्वा वह्निं तु भस्मना ॥ देवानभ्यर्च्य गंधेन जलेनैव न जले स्थितः ॥१८॥ स्नानं संध्यात
र्पणाद्धि जपहोमस्वराध्ययनम् ॥ भोजनात्याक प्रकुर्त्तव्यं सायं संध्याकृती विना ॥१९॥ आसनस्यहि द्विशेषु पं
क्तुशकामा यनेष्यते ॥ कृच्छ्रपतनपसिवेद्र्येता ऽनंतकलायच ॥२०॥ त्याकर्षणं शत्रुनिबर्हणं च कृषिवा
णिज्या पशुपालनं च ॥ शुश्रूषणं चापि तथाऽर्थहेतोरकार्यमेतत्परमं द्विजस्य ॥२१॥ न राज्ञः प्रतिगृह्णी
याद्वर्तमानादशस्त्रसल्पे ॥ स्वधर्मनिष्ठात्तस्मात्तु प्रतिगृह्णन्न दोषभाक् ॥२२॥ नोत्पवृद्धौ स तच्छुद्धिः स्या
द्धवानुस्मृतितः ॥ तत्तस्य सर्वं तपसो विमोक्षो हि नायते ॥२३॥ नाद्याच्छूद्रस्य विप्रोऽन्नं नरदन्नं न कर्या ॥२५॥

रतः ॥ गणान्नं गणिकान्नं च हीनजातेषु सर्वतः ॥२४॥ अतिथीनां च सर्वेषां प्रेष्याणां स्वजनस्य च ॥ सा
मान्यं भोजनं नित्यं गृहस्थस्य प्रशस्यते ॥२५॥ आर्द्रिकः कुलमित्रं च स्वगोपाल च नापितः ॥ एतेन शू
द्रेषु भोज्यान्नाद्यश्चात्मानं निवेदयेत ॥२६॥ भूमौ वर्जीत पात्रस्य कृत्वा चाश्नीयाद्यन्नेन ततः ॥ प्राणाग्निहोत्र
पूर्वं तु वाग्यतो भोजनं चरेत ॥२७॥ स्नात्वा तोयवरुणः शाकं तु कृतोऽग्निर्हरेच्छ्रियम् ॥ तं तु नानस्यांतक
श्वा पुत्रस्याप्यन्नोन त्रिगुणस्मृतम् ॥२८॥ अन्नं मध्ये प्रति शाकं दक्षिणे घृतपायसम् ॥ शाकादिपुरतः स्या
पंचभक्ष्यं भोज्यं च वामतः ॥२९॥ एकपंक्त्युपविष्टेषु यस्तेषु यत द्विकोऽप्यपचान्भवेत ॥ सर्वं यांति तदधं तु
अंपंक्तिभेदी न वेत्कृतः ॥३०॥ अग्निना भस्मना चैव स्तंभेन सलिलेन च ॥ द्वारेण चापि मार्गेण पंक्तिः पं
क्तिर्विभिद्यते ॥३१॥ पितृदेवमनुष्येभ्यो दत्त्वाऽश्नास्यमृतं गृही ॥ स्वार्थं पचन्नघं भुंक्ते केवलं स्वोदरंभरः
॥३२॥ दत्तस्तत्तस्य यत्तार्थं नैवेद्यं चाश्नीत वाड्वः ॥ यांति ते चैव सर्वे मेवदेयं तद्यकर्मणि ॥३३॥ प्रतिग्रहे स्व
नि चक्रिध्वजि वेश्यानराधिपाः ॥ दुष्टा दशगुणाः पूर्वात्पूर्वादेते यथाक्रमम् ॥३४॥ अजिनं मृतशय्यां च मे
षीं चोभयतोमुखीम् ॥ कुरुक्षेत्रे च ग्रहणे नीलं वृषः पुरुषोऽन चेत ॥ जो हंति ताश्च महिषी तेजं च वर्णमे
व च ॥ तिलधेनुं मणिं श्चेति घोराः स्म सप्रतिग्रहाः ॥३६॥ न वाहमवधिं कृत्वा न द्यादस्त चतुर्थयम् ॥ न त

न प्रतिगृह्णीयात्प्राणैः कण्ठगतैरपि ॥३७॥ कृष्णाजिनप्रतिग्राहि हिरण्यानां क्रयविक्रयी ॥ नवश्राद्धस्य भो
क्ता च न भूयः पुरुषो भवेत् ॥३८॥ अहन्यहनि जायन्ते जीवा क्रौञ्चाचारानिषेवणात् ॥ अज्ञीरवृत्त्या बुद्ध्या च पू
र्वजन्म स्मरेद्द्विजः ॥३९॥ यथा दारुमयो हस्ती यथा चर्ममयो मृगः ॥ तथा विप्रोऽनधीयानस्त्रयस्ते नाम
धारिताः ॥४०॥ न विद्या न तपो यस्य समादत्ते प्रतिग्रहम् ॥ अधो गतिमवाप्नोति दात्रा सह स तु द्विजः ॥४१॥
अन्नं पंच हिरण्यं च गामश्वं पृथिवीं तिलान् ॥ अविद्वान्प्रतिगृह्णानो भस्मी भवति काष्ठवत् ॥४२॥ शक्तः
प्रतिग्रहीतुं यो वेदवृत्तो जितेन्द्रियः ॥ दीयमानं न गृह्णाति स्वर्गस्तस्य न दुर्लभः ॥४३॥ भूर्जन्मं ब्राह्मणो
त्वन्नं सर्वमासार्द्धमेव वा ॥ नश्यो ना वणिजा येत ससमे तद्विदुर्बुधाः ॥४४॥ कृपणानामथवा भिक्षां ब्राह्म
णो वृत्तिकर्शितः ॥ सच्छूद्राणां गृहे कुर्यान्न स पापेन लिप्यते ॥४५॥ विशुद्धान्वयसंजातो निवृत्तो मद्यमां
सतः ॥ द्विजभक्तो वणिग्वृत्तिः सच्छूद्रः स प्रकीर्तितः ॥४६॥ रजनीमध्ययामौ द्वौ कृतसिषेंच पद्धविः ॥ तत्र
स्वयंसरस्थैश्च ब्राह्मणो नावसीदति ॥४७॥ अपेयं न पिबेत्कापि नाभक्ष्यमपि भक्षयेत् ॥ न गंधमपि गृ
ह्णीयाद्ब्राह्मणो मद्यमांसयोः ॥४८॥ भवेदस्नानतः कापि गंधस्याग्रहणं यदि ॥ तर्हि स्नात्वा स्मरेद्विष्णुं सायं
संध्यावधि स्वरेत ॥४९॥ जायाया आत्मनश्चापि पुत्रस्य दुहितुस्तथा ॥ यथोचितं यथाकाले संस्कारान्विधि

नाचरेत ॥५०॥ कन्याया विक्रयो नैव कर्तव्यः कापि केनचित् ॥ ब्राह्मणेन विशेषेण यत्कर्तुः पातिरौर
वम् ॥५१॥ भक्षितं वाल्लुमात्रं यत्कन्याविक्रयजं धनम् ॥ स कुलं तदहीतारं नरकं नयति ध्रुवम् ॥५२
॥ यदा वरं च देकन्यामामजं कुलोद्वहेति च ॥ निर्वाहार्थं च कन्याया वै पम्पादेश काजयोः ॥५३॥ वरद
तात्तु जकारा पयाराक्लिस्व कारितैः ॥ अलंकारैर्युतारे याः कन्याये तेऽखिला अपि ॥५४॥ एवं कृते
न दोषोऽस्ति भीष्मस्याह धर्मजम् ॥ स्वार्थं नाः एवं गपितन्नासत्त्वं धर्म एष सनातनः ॥५५॥ अष्टव
र्षा भवेद्गौरी नववर्षा तु रोहिणी ॥ दशवर्षा भवेत्कन्या तत ऊर्ध्वं रजस्वला ॥५६॥ पितृगेहे तु या कन्या रजः प
श्येद संस्कृता ॥ भ्रूणहा तत्पिता ज्ञेयो वृषली सापि कन्यका ॥५७॥ कुलं शीलं सनाथत्वं विद्या वित्तं वपु
र्वयः ॥ एतान्गुणान्वरे दृष्ट्वा काले दद्यात्सुतां ततः ॥५८॥ समीपस्थो गतिः दूरस्थो धनो दुलश्च निर्धनः ॥ वृ
त्तिहीनश्च मूर्खश्च वर्जनीयाः क्षपद्वराः ॥५९॥ रविक्षेत्रगते जीवे जीवक्षेत्रगते रवौ ॥ विवाहं न तत्र कुर्वंति
कन्या वैधव्यमेति यत् ॥६०॥ गोदाभागीरथीरथ्यामध्ये नो दारः सिंहगे गुरौ ममध्यास्थे सर्वदेशे शुभ यामि
न गते रवौ ॥६१॥ भागीरथ्युत्तरे कूले गौतम्या दक्षिणे तथा ॥ विवाहो व्रतबंधश्च सिंहस्थे नैव दुष्यति ॥६२॥
आरम्यसप्तमेवर्षे विवाहः सार्द्धवर्णिकः ॥ दशरोषविहीने हि काले तु स्मा शुभो मतः ॥६३॥ विवाहश्चौ

॥स॰जी॰प्र॰ ५ जपन्नवेधयज्ञे पद्माभिषेकश्च तथैव राज्ञाम् ॥ सीमंतयात्राकृतथैव स्नाने नैमित्तिके यः खलु पातकं वैः अ॰ १४॥
॥२७॥ ६४ ॥ विशेषधर्माः कथिता मयेत्थं नृपस्य गृहस्थाश्रमिवाडवस्य ॥ तज्जीविकावृत्तिमनो वदामि समासतस्तां
शृणु विप्रवर्य ॥ ६५ ॥ **इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे गृ-**
**हस्थधर्मेषु ब्राह्मणस्य विशेषविधिनिरूपणनामा त्रयोदशोऽध्यायः ॥ १३ ॥ श्रीनारायणमुनिरुवाच ॥**
जीविकावृत्तयः पूर्वं कथिता या मयाऽनघ ॥ ताभिरेव समुत्पाद्यद्रव्यं वै निस्सहायम् ॥ १ ॥ समाश्रित्य द्विजो
नित्यं सवर्णानुसारिणीम् ॥ वृत्तीः संपादयेद्द्रव्यं नीचसेवां तु नाचरेत् ॥ २ ॥ गृहस्थस्य द्विजो ह्येच शालीनं
संचयस्तथा ॥ वार्त्ता चेति चतस्रोऽत्र जीविकावृत्तयो मताः ॥ ३ ॥ उत्तरोत्तरं दीनास्ता स्वविद्याद्द्विजोत्त
मः ॥ देशकालौ स्वसामर्थ्यं दृष्ट्वैकां वृत्तिमाश्रयेत् ॥ ४ ॥ क्षेत्रपत्यक्तकणिशाकणादानं शिलोञ्छनम् ॥ अ
याचितं तु शालीनं संचयो याजनादिकम् ॥ ५ ॥ वार्त्ता कृष्यादिका वृत्तिः प्रोक्ताः समास्तत्त्विमाः ॥ तथापि वि
द्यावकर्षोऽपि द्रव्यं प्रायः प्रतिग्रहम् ॥ ६ ॥ द्रव्यकन्याप्रदाने च नियमाभ्यासस्तथा ॥ प्रसन्नाद्देवताद्द्रव्यं द
त्तेव न गृह्णां क्वचित् ॥ ७ ॥ मणिस्वर्णाद्याकरेभ्यः कश्चित्प्राप्नोति धनम् ॥ ब्राह्मणीणां प्रसादेन कश्चिदाकस्मिकं
तथा ॥ ८ ॥ एतत्सर्वं गृहस्थस्य द्रव्यं न्यायागतं मतम् ॥ धर्मकार्ये च तद्देवविहितं द्रव्यमुत्तमम् ॥ ९ ॥ क्षत्रियस्य ॥२७॥

नरेन्द्रस्य राजनीत्यागतं धनम् ॥ धर्म्योपयुक्तं कथितं नाऽस्य द्वित्यापि विधिर्द्विजोः ॥ १० ॥ कुटुंबपोषणाशक्तः
स्ववर्णोत्तमपापदा ॥ स्वावरस्य तदा वृत्तिं गृहस्थी यान्न लंघ्नापदि ॥ ११ ॥ तत्रापि ब्राह्मणो हिंस्राक्षात्रवृत्तिं वि
हाय च ॥ वैश्यवृत्तिं भजेदेव सीदन्नाऽपितां भजेत् ॥ १२ ॥ सीदन्वैश्यस्तु शूद्रस्य भजेद्वृत्तिं न चापदि ॥ कार्व्वा
दिवृत्तिमाश्रित्य तरेदापदमात्मनः ॥ १३ ॥ सर्वोपायद्विनिर्मुक्तः प्रायश्चित्तं विधाय च ॥ स्वां स्वां मे वोत्तमां वृ
त्तिं पुनः सम्यगुपाश्रयेत् ॥ १४ ॥ कलौ युगेऽत्र विप्राणां क्षत्रियाणां च मानेद ॥ स्ववर्णवृत्त्योत्तमपानि दृष्टेनैव तु
संभवेत् ॥ १५ ॥ वैश्यवृत्तिं समाश्रित्य कुटुंबातिथिपोषणम् ॥ कुर्वीयातां ततस्तौ तु जधर्म्यकार्येषु तत्परौ
॥ १६ ॥ कृषेरभावे वाणिज्यं तदभावे कुसीदकम् ॥ कर्त्तां पापीयसीं वृत्तिं कुसीदं ब्राह्मणस्त्यजेत् ॥ १७ ॥ कुश्चित
शीदतश्चापि विनिर्विंशकैः प्रगृह्यते ॥ चतुर्युगान्त्यास्युगं कुसीदाख्यमतः स्मृतम् ॥ १८ ॥ उत्तमर्णोद्धनेकोपि वि
प्रः प्राणापदं वीना ॥ गृहस्थी यान्नैव धर्मार्थैन च कामस्कवासये ॥ १९ ॥ निर्द्धनस्य गृहस्थस्य ब्राह्मणस्य वि
शेषतः ॥ नोत्तमर्णसमं दुःखमन्यत्किंचन विद्यते ॥ २० ॥ पंचमेऽनिषिद्धे वाणाकपत्रोशानं वरम् ॥ न तु उत्तमर्णे
कदंनं नृपतेरपि कर्हिचित् ॥ २१ ॥ वैश्यवृत्ति स्वतस्तं कौ ब्राह्मणः कृषिमाश्रयेत् ॥ कलौ युगे स्वयं कृष्याकर्तुं
वैपातुमक्षमः ॥ २२ ॥ द्विजोत्तमस्याऽऽपदि वैश्यवृत्तिः स्वजीविकार्थं विहितोत्तमैव ॥ नारायणो नारदमेव

॥स॰जी॰पं॰ पारस्कादेषु गणोद्विजवर्यपूर्वम् ॥२३॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकर प्र॰२५॥
॥२९॥ णे धर्मोपदेशे गृहस्थधर्मेषु जीविकावृत्तिनिरूपणनामा चतुर्दशोऽध्यायः ॥१४॥ सुव्रत उवाच ॥ इति
श्रुत्वा हरेर्वाक्यं प्राप्तसंशयमात्मनि ॥ पप्रच्छ तं स नृपते ब्राह्मणस्तत्प्रियः पुनः ॥१॥ ब्राह्मण उवाच ॥ ब्राह्मण
स्य कृषिः पूर्वं निषिद्धा भगवंस्त्वया ॥ पुनश्च विहिताऽत्रेति संशयं छिंधि मे प्रभो ॥२॥ श्रीनारायणमुनिरु
वाच ॥ ब्राह्मणस्य निषिद्धा हि कृषिकर्म्म न संशयः ॥ अनन्यगतिकत्वात्तस्मात्प्रतं विहितं द्विज ॥३॥ न द्विजोऽ
ण्यादिवृत्तिर्हिंसकत्वात्स्मान्वरितुं कर्जौ ॥ न च यस्त कृषिक्षेत्रे कोनाऽध्येनाऽपि धनी क्वचित् ॥४॥ न च कश्चिद्धि
शुद्रोऽत्र दाताऽपि पुरुषोनुवि ॥ कृषिस्ततोऽभ्यनुज्ञाता पराशरमुनेर्मतात् ॥५॥ स्ववृत्तिं न जेद्द्विजो नीचापि प्र
तिग्रहम् ॥ कुर्यात्ततः कृषिरियं भोक्ताश्चैयस्करी मया ॥६॥ कृषिलब्धेन धान्येन पितृन्देवांश्च ब्राह्मणान् ॥
स्तर्पयेत्तेन ते तुष्टास्तद्दोषं नाशयंति हि ॥७॥ देवेभ्यश्च पितृभ्यश्च दद्याद्भागं तु विंशकम् ॥ त्रिंशांतमं च विप्रेभ्यो य
:स तुष्येन्न कर्षकः ॥८॥ अत्यजन्स्वानि कर्माणि ब्राह्मणो निसकानियत् ॥ कृषिकर्म प्रकुर्वीत क्षत्रियश्च त
थापदि ॥९॥ हीनांगं दुर्बलं जंघालं रोगिणं क्षुधितं तथा ॥ हलांगं स्थविरं वांधमनडुहं न चारयेत् ॥१०॥ स्थि
रांगं निर्जितं तसांडं धंदंतविवर्जितम् ॥ पुष्टांगं सवर्ज्जमनतं वृषभं वाहयेद्द्विजः ॥११॥ वाहयेद्द्विसमध्यावत्कुर्या ॥२९॥

च्छायां त्रीक्ष्मानतः ॥१२॥ हीनांतिरिक्तं कर्तव्यं नेव किंचित्प्रमाणतः ॥ न निर्दयस्कषको धावजीवर्द्धान्क
शाचन ॥१३॥ न सीरं क्षीरवृद्धस्य न विच्चपितुमंदयोः ॥ द्विजः क्वापि कुर्वीत कुर्वन्स्यात्रिदमापुयात् ॥१४
गोमिश्च वृषभैस्त्व गृहिणां हि गृहाश्रमः ॥ वर्तते तावश्चतांस्तस्माद्विनोपत्नेन पालयेत् ॥१५॥ वनेषु च
तृणाम्भः स्थाल्लवस्पनुदिने पयः ॥ कृविविधिर्द्वचतो विलो गावः पूज्याः सदा नृणाम् ॥१६॥ यदंगेषु स्थितिषु
लोकेषु सर्वे देवाश्च संति हि ॥ ताः पूजनीयाः सर्वेषां सर्वे रक्षेताक गृहाश्रमी ॥१७॥ गौरवधमानदोग्ध्याश्च व
त्सांश्च संयिनी ॥ प्रसूताश्च दशाहान्याक रोगिणी च द्विवत्सतः ॥१८॥ दक्षिणाभिमुखा गाव उत्तराभिमुख
स्ता वृषा ॥ बंधनीयाश्च वृषभान नाकृच्छ्रत्यंजखादिभिः ॥१९॥ गावाजिवृषणाणां यीस्कृतीक्ष्णाजोदरानक
म् ॥ सर्वदा स्थापनीयं च दामबंधविमोक्षकृत् ॥२०॥ योगाः पूजयेते मत्यावदत्तेषां पयस्त्वस्याद्वि ॥ सोऽक्षुमे
धादियज्ञानां प्राप्नोति सहस्राफलम् ॥२१॥ नाशयंति च ये पापाः क्रोशयंति च ताश्च ये ॥ नरकान्मोप्रपद्यंते
कोटिवर्षाणि ते न तु ॥२२॥ गवांपुत्राजने पुण्यं श्रीकंदरत्गणतःत ॥ पालने वृषभाणां च पुण्यं किल्न म
हर्षिभिः ॥२३॥ कृत्वा गोवृषपालनेदं विधीश्वरापत्तिनास्तितः ॥ चांडालस्यवर्णौऽसौ दिवि पितौ च कर्मणि ॥२४
उत्साहयंति सस्यान निर्म्मरयंति वहंति च ॥ आनंदयंति जीवांश्च पूज्याद्विषभास्ततः ॥२५॥ न भारस्विन्ना

जलं यस्तु रन्ध्रैः परिकिंचने ॥ स यंत्र रेति शुक्लानि तृणानि चकं रंगरम् ॥२६॥ वृक्षाणां रहृशात्त तेजो कानां 
वृद्धिहेतवः ॥ पाजना याः प्रयत्नेन पोषणीयाश्च सर्वदा ॥२७॥ गृहे वृक्षान्प्रयत्नेन रक्षेत्तृणानीयादिभिर्गृ
हे ॥ नाः नु वेज प्रपुली याजयेत्तेऽरवादिषु ॥२८॥ पशूनां पाजने शाकोदकान्यनिनेस्वयम् ॥ वनं गत्वा
तपः कुर्यान्मनुलान्कोशयेद्दया ॥२९॥ धर्म्ममिवं विदित्वैव पोषयेन्नालयन्नृपान् ॥ वपेत्सर्वाणि बीजानि
सर्व्वदा पीनसी दृति ॥३०॥ शाल्मीक्षुशणकर्पासवार्त्ताकादीनि वापयेत् ॥ न तत्स्थानं च तत्कालं विदित्वा
धर्म्मशास्त्रतः ॥३१॥ धनवापी चाग्रवापी गोपीपीबीजसंग्रही ॥ प्रभाते क्षेत्रगामी च कर्षको नावसीदति
॥३२॥ प्रथमं कृषिकर्त्ता तु विधानं शास्त्रसंमतम् ॥ कृपोगवर्ज्जितं कुर्यात्स्नपनं शुभवासरे ॥३३॥ सीतायाः
स्थापनं कृत्वा परागारमृषिस्मरन् ॥ दधिदूर्वाक्षतैः पुष्पैः शमीपत्रैश्च पूजयेत् ॥३४॥ नीराजनं च नैवेद्यं दत्वा
कुर्यात्प्रदक्षिणाम् ॥ सक्षेत्रपाल्यमुख्येभ्यो बलीन्दद्यात्ततो गृही ॥३५॥ रक्तश्रृंगौ सवृषभौ कुंकुमेनाक्तते
लया ॥ भूषयेत्पुष्पमालाभिस्ततः संयोजयेद्धलम् ॥३६॥ संपूज्य सीरफालाग्रे मावारजतेन च ॥ मंत्र
मेतं समुच्चार्य कुर्वीत क्षेत्रकर्षणम् ॥३७॥ सीते त्वं सोम्येकुमारि त्वं देवि रेवेः श्रियै च्छिन्ने शक्तिस्त्वं यथा
सिद्धतया मे सिद्धिदा भव ॥३८॥ एष एव विधिर्ज्ञेयो वापने लवने तथा प्रवेशने च धान्यानां खले गंत्रा प्रवा 

हणे ॥३९॥ यत्नतः पालयन्नेव वृषभौ कर्षणं चरेत् ॥ अपालयन्वाहयंस्तु कुंभीपाके पतेद्ध्रुवम् ॥४०॥ अ
नार्य्यमस्तृणमाहारं वृषमाकर्षयन्तु यामर्द्धं नीवति चाः स्नेन तैजोकं समाचरान्तरम् ॥४१॥ पालयन्निरतस्तांस्तु
कर्त्तव्यं कर्षणं द्विजैः ॥ यथोक्तेन विधानेन लोगजादेश्च पोषणम् ॥४२॥ शक्तिस्तनो विनानाम सीतायाः स्था
पनं विना ॥ विनाः प्रमुक्षणारक्षाभ्यां कृषिकर्म्म न सिद्ध्यति ॥४३॥ सीमोल्लंघनं भूमिं च वृक्षच्छायाप्रक्षिप्तिं तथा
॥ भूमिं निस्थात यूपां च कृषिकृन्नैव कर्षयेत् ॥४४॥ नोषरां वाहयेद्भूमिं नैवाग्रम शर्करान्विताम् ॥ वाहयेन्ना
प्रदत्तां च न नदीपुलिनं तथा ॥४५॥ यदि तां वाहयेद्भूमिं लोभेनापि च वा द्विज ॥ नरकं घोरतामिस्रं प्राप्नुयात्स न
संशयः ॥४६॥ एकांगुलामपि धरां परकीयां यदा हरेत् ॥ तेन पापेन पुरुषो रौरवं नरकं व्रजेत् ॥४७॥ महरे वा
हयेत्क्षेत्रं न चैवास्तमितेके तथा ॥ वाहयेन्न पथि क्षेत्रं वाहयेन्न दुःखभाग्भवेत् ॥४८॥ अनवरोधभांस्तिग्मांश
तावगाहनक्षमाम् ॥ निम्नां च वाहयेद्भूमिं दयन्दुःखमाविश्रामं पिदात्रं चैव जलम् ॥४९॥ महतीं च वृतिं कुर्यात्क्षे
त्रस्य परितो दृढाम् ॥ यथा पशुमृगाद्याश्च प्रविशेयुर्न कर्हिचित् ॥५०॥ ज्ञात्वा क्षेत्रगुणान्सम्यक्तत्स्थाने
यथोचितम् ॥ बीजानि वापयेज्ज्ञीरी विज्ञो कृषको भवेत्तथा ॥५१॥ अमावास्यादिने चैव गृही कुर्वीत कर्षणम्
कुर्वन्पातयते पितॄन्नरके च पतेत्स्वयम् ॥५२॥ सर्व्वसत्वोपकाराय सर्व्वयज्ञादिसिद्धये नृपस्य कोशवृद्धये च

॥स०जी०पं०॥ जायते कृषिकृन्नरः ॥५३॥ अतः क्षुधा पीडितानां सत्त्वानां तृप्तये द्विजः ॥ दद्यान्मुष्टिं मुष्टिमन्नं कृषिदोषो ॥अ०१५॥
॥रू०॥ पशान्तये ॥५४॥ यावतोऽन्नकणान्क्षेत्रे प्राणिनो भक्षयंति च ॥ तावतः पातकात्क्षेत्री मुच्यते नात्र संशयः
॥५५॥ अन्नदानेन कृषिकृत्कर्षितोषाद्विमुच्यते ॥ ततः सीतामखं कुर्यात्किंचित्सस्ये खलागते ॥५६॥ खलस्य
परितः कुर्यात्सौ चामतिघनां वृतिघनां वृतिम् ॥ एकद्वारां खगेशादेर्दुःप्रवेशां सुरक्षिताम् ॥५७॥ त्रिसंध्य
मर्च्चयेच्छ्रीं तां परां रात्र्यामविस्मरन् ॥ आमानि श्रीक्षयेत्तेषां रक्षां कुर्याच्च भस्मना ॥५८॥ प्रेतभूतादिना मानि
नवदेत्तु खलेऽगृहीं सूतिकागृहवत्तत्र कुर्वीत परिरक्षणम् ॥५९॥ प्रशस्तदिनपूर्वाह्णे धीमान्धान्यं प्रकल्पये
त ॥ पत्नेत् खलभिक्षाभिः कालि रौहिणएव हि ॥६०॥ देवान्महेंद्रप्रमुखान्सोमपादीन्पितॄंस्तथा ॥ सनकादीन्मनु
ष्यांश्चापुर्हि ब्राह्मणं दद्यात्क्रमशः ॥६१॥ खलयज्ञे विवाहे च संक्रांतौ ग्रहणे तथा ॥ पुत्रे जाते व्यतीपाते दत्तं भवेत्तिवा
क्षयम् ॥६२॥ पंचमः सप्तमो वापि नवमो द्वादशोऽथवा ॥ ज्ञात्वा देयो धान्यभागः सीरिणा तु खलकर्तृ ॥६३॥ ये के
विदागतास्तत्र पुमांसस्तिथिवद्द्विजाः ॥ तोष्याकाशः सीरिभिः सर्वैः कृषिकैर्गृहमेधिभिः ॥६४॥ मूकांधकारवोऽ
नैच पतितानीचयोनयः ॥ दीनानाथाः क्लीबा वृद्धकुष्ठिनो दद्रुणा तथा ॥६५॥ अंधाश्च बधिराः स्रकाः एवंगा
श्चांडालजपुक्कसाः ॥ अन्नार्थिनश्च ये केचिच्छक्त्याते भोजनमर्पयेत् ॥६६॥ वाचा मधुरया तांश्च विसृज्याऽथ निजे ॥२०॥

गृहे ॥ आनीय धान्यं कुर्वीत नवान्नेष्टिं यथाविधि ॥६७॥ राज्ञे दत्त्वा च षड्भागं देवतानां च विंशकम् ॥ विंशांश
मं च विप्रेभ्यः कृषिकर्त्ता न दोषभाक् ॥६८॥ वदंति कृषयः केचित्कृष्यादीनां विदूये ॥ आत्मसंध्यावदानेन तस्य
र्वेषां शुद्धिरुद्भवेत् ॥६९॥ प्रतिग्रहाच्चतुर्थांशं वणिग्भ्यो भागतृतीयकम् ॥ कृषितो विंशकं भागं ददतो नास्ति पा
तकम् ॥७०॥ कृषेरन्यतरा वृत्तिर्नोस्ते व स्फुरा कलौ ॥ न स्फुटं कृषितोऽन्यत्र यदि धर्मेण कर्षति ॥७१॥ अवस्त्रत्वं
निरन्नत्वं कृषितो नैव जायते ॥ अनातिथ्यं च दुःस्थं च दुःखस्य त्वं गोमतो न कदाचन ॥७२॥ त्रैवर्णिकानां कृ
षिकर्मणो यो विधिः स ते विप्रवरेरितोऽसौ ॥ पराशरस्यैव कृषेर्मतेन द्विजैस्तथैवाचरणीय एषः ॥७३॥ इति
श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे गृहस्थधर्मेषु कृषिकर्मविधान
रूपणो नाम पंचदशोऽध्यायः ॥१५॥ श्रीनारायणमुनिरुवाच ॥ मातापित्रोर्गुरूणां च पूजावक्ष्यमसामम ॥ या
द्विजानां गृहस्थानामिहामुत्र सुखप्रदा ॥१॥ पुंत्वं तेऽनुजानीयुः सधर्मरतिनिश्चयः ॥ एत एव त्रयो विद्या
स्त्रयो देवास्त्रयोऽग्नयः ॥२॥ त्रिष्वेतेषु प्रमाद्यन्स पत्नी त्रीलोकान्सजयेद्ध्रुवम् ॥ नैवतान्कोऽप्यवमन्येत नित्यं
त्यानुसरेद्द्विजः ॥३॥ तेषामनादराः सर्वाः सत्क्रियाः स्युर्हि निष्फलाः ॥ न चायं न परो लोकः शुभस्तदेवमानिनः
॥४॥ श्रोत्रियेभ्यो दशाभ्यस्य सदाचार्योऽधिको मतः ॥ तेभ्यो दशभ्य एकः स्यादुपाध्यायोऽधिकः किल ॥५॥ तेभ्यो

॥स॰ती॰पं॰ दशाभ्यश्च पिता गौरवेणातिरिच्यते ॥ पितुर्दशगुणं माता पूजनीया गरीयसी ॥ ६ ॥ गुरुर्गरीयान्पितृतो मातृत- अ॰४६॥
॥३१॥ श्चेति मे मतः ॥ शरीरमेव सृजतः पितरौ धर्मकारणम् ॥ ७ ॥ गुरुस्तु ज्ञानदानेन शिष्यं संसारबंधनात् ॥ वि-
मोचयति तेनासौ गरीयानुच्यते ततः ॥ ८ ॥ दोषपुत्का अभिच्छंते हपणीपालसूनुना ॥ नताश्चानर्जनीपावा-
पूजनीया हि सर्वथा ॥ ९ ॥ उपदेशोऽनिंद्यज्ञानं दत्वा पीयूषतम्यच्छति ॥ तस्मै न गुरुवे द्रुह्येत् ज्ञानन्नस्य रुते बुधः
॥ १० ॥ यतस्य विद्या मा प्रीति वाऽध्यनः कर्म निष्फलम् ॥ योनार्चयति तस्यासावुत्तं सर्वं हि निष्फलम् ॥ ११ ॥ गु-
रोरनादरं कुर्याद्यः पुमान् दर्पमोहितः ॥ स्तृणाट्स्याधिकं पापं ज्ञासुपाऽऽसन्नसंशयः ॥ १२ ॥ प्रजापतिं प्रीणाप-
ति पितरं प्रीणयन्पुमान् ॥ मातरं प्रीणयन्पृथ्वीं प्रीणयत्येव पूरुषः ॥ १३ ॥ ब्रह्मैव पूजितं तेन गुरुर्येन प्रपूजितः ॥ मा-
तृतः पितृतः श्रेष्ठः पितृस्मात्तु परमो गुरुः ॥ १४ ॥ मातरं पितरं तस्माद् गुरुं चानुसरेत्सदा ॥ यत्नात्परं जायते पुं सोनिष्कृ-
तिर्नास्ति तस्य हि ॥ १५ ॥ पित्रादिभिस्त्रिभिर्न्नैव गरहस्य संवदेत्क्वचित् ॥ तथा स्त्रीभिर्मातुलेन दासैश्चातिथिभिः
सह ॥ १६ ॥ दुहिता जातु रक्तौ ज्ञातिसंबंधिबांधवैः ॥ भ्रात्रा दुहित्रा पुत्रेण जामीनाऽर्थयात्तथा ॥ १७ ॥ गृहस्थ एतैः
संवादनं कुर्वीत कदाचन ॥ एतैर्जितस्त्रजयति सर्वांल्लोकान्न संशयः ॥ १८ ॥ स्वहितार्थी द्विजन्मा च नित्यं सच्छा-
स्त्रसेवनम् ॥ कुर्यात्तदर्थज्ञानेन तु सतः श्रेयस्तद्धितः ॥ २० ॥ यः पठेत्तां श्रुतिं सम्यक् ज्ञात्वां वाऽरुषिभाषितम् ॥३१॥

ऽदर्पेऽनभिज्ञाय सम्बवेदस घातकः ॥ २१ ॥ यतेरन्नं नभोक्तव्यं ज्ञातैः कंचगतैरपि ॥ गोमांसेन समन्न समं तत्
तु स्करा विंदु समं जलम् ॥ २२ ॥ यतीनां कांचनं दत्वा तांबूलं ब्रह्मचारिणाम् ॥ चौराणामभयं दत्वा दाता पि
नरकं व्रजेत ॥ २३ ॥ यतिभ्यः श्रद्धया दद्याद्भिक्षां पात्रमपूरणीम् ॥ सर्वं रसैरुपेतां च तत्तुल्यं स्याद्दर्नतकम् ॥
२४ ॥ यो व्याधितानां भिक्षूणां कुर्यात्स्थानेषु भैक्षवान् ॥ यथाविधिभिः परिचरेत्तस्य पुण्यमनंतकम् ॥ २५ ॥ य-
तिं दृष्ट्वा समुत्थाय नत्वा पाद्यासनादिभिः ॥ मानयेद्यो गृही नैव तस्य पुण्यं निरर्थकम् ॥ २६ ॥ भिक्षमाणो ब्र-
ह्मचारी यतिस्त्यागी द्विजोऽपि वा ॥ येनाप्यमानितो भिक्षामदत्वा स तु ब्रह्महा ॥ २७ ॥ माता पिता गुरुः पत्नी स्वस्रा-
पत्यानि चाश्रिताः ॥ अभ्यागतोऽतिथिश्चाग्निः पोष्यानीसमीनव ॥ २८ ॥ दीनानाथवशिष्टेभ्यो दातव्यं भूति-
काम्यया ॥ अदत्तदानां जायंते परभाग्योपजीविनः ॥ २९ ॥ न्यायागतेन द्रव्येण कर्त्तव्यं पारलौकिकम् ॥ दानं
च विधिना देयं काले पात्रे च भावतः ॥ ३० ॥ विधिहीनमपात्रे च यो ददाति प्रतिग्रहम् ॥ न केवलं हि तद्याति
शेषं तस्य विनश्यति ॥ ३१ ॥ अनृतेन क्षरेद्यज्ञस्तपो विस्मयतः क्षरेत् ॥ क्षरेत्कीर्त्तनतो दानमानमायुर्द्विजाव-
मानतः ॥ ३२ ॥ नयो दृष्टांस्तपो दृष्टा ज्ञात्वा तु स्तोऽरश्नमयो विलम् ॥ मानयेद्दिनयेनैव गरीयांनिर्मत्सरः सदा ॥ ३३ ॥ वि-
प्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः ॥ वैश्यानां धनधान्याभ्यां मितरेषां तु जन्मतः ॥ ३४ ॥ पुरःप्रविश्य संक्रमणा

संवासस्त्रणं भोजने ग्रहणे वा सनेत्राऽपि विविक्तायां न स्त्री कुर्यात्कदाचन ॥ ३५ ॥ आज्ञालोपातिक्रमे दोषो मूर्खवि
प्रेन विद्यते ॥ त्वजं तमपि मुक्तजनं द्विमरुन निकषे ॥ ३६ ॥ यो मानयेद्गुरुजनान्विनयेन विद्वान् साधुं स्व
सोऽत्र जन्मनि महतीं हि कीर्तिम् ॥ मृत्वा परत्र च निजेप्सितभूरिसौख्यं प्राप्नोति वै गृहिजनो द्विजवर्य लोके ॥ ३७ ॥
इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे गृहस्थधर्मेषु गुरुजनसन्मान
निरूपणनामा षोडशोऽध्यायः ॥ १६ ॥ श्रीनारायणमुनिरुवाच ॥ वर्णाश्रमस्थसदाचारं गृहस्थानां हितावह
म् ॥ त्वद्विजवर्य ते यस्मात्सदाचारस्तु संमतः ॥ १ ॥ आचारवर्तनो मनुजा जन्मेते आयुरश्व मौख्यम ॥ धर्मं तथात्र
क्षयमुत्तमां शालोकमत्रापि विदुर्जनपूजनतां च ॥ २ ॥ आचारेण सदा विप्रा वर्तन्ते ये जितेन्द्रियाः ॥ स ब्रह्म सपुरमे
वेति च रेतसोऽमुत्र चेह च ॥ ३ ॥ आचारः परमो धर्म आचारः परमं तपः ॥ आचाराद्वर्धते ह्यायुराचारात्पापसं
क्षयः ॥ ४ ॥ रागविद्वेषरहिता अनुतिष्ठन्ति यं नु वि ॥ विद्वांसस्तं सदाचारं धर्ममूलं विदुर्बुधाः ॥ ५ ॥ अथ यमे धर्मस
र्वस्व यं माश्च नियमामता ॥ अतस्तेष्वेव कर्तव्यः प्रयत्नः सर्वथा बुधैः ॥ ६ ॥ सत्यं क्षमार्जवं ध्यानमानृशंस्यम
हिंसनम् ॥ दमः प्रसादो माधुर्यं मृदुतेति यमा दश ॥ ७ ॥ शौचं स्नानं तपो दानं मौनेज्याध्ययनं व्रतम् ॥ उपोषणं
मस्त्रवयं दशैते नियमाः स्मृताः ॥ ८ ॥ कामं क्रोधं मदं मोहं मात्सर्यं लोभमेव च ॥ अमून्वड्वैरिणो जित्वा सर्व

त्र विजयी भवेत् ॥ ९ ॥ धर्ममेव सदा रक्षेत्परलोकसहायकम् ॥ नान्यः कोऽपि सहायोऽस्ति न नस्याऽमुत्र तं वि
ना ॥ १० ॥ गृहे योऽर्थो निवर्तेत श्मशानात्सुत्र बान्धवाः ॥ सुकृतं केवलं कर्म गच्छन्तमनुगच्छति ॥ ११ ॥ अनभ्यासा
त्तु वेदानां सदाचारस्य वर्जनात् ॥ आलस्यादन्नदोषाच्च द्विजान्मृत्युर्जिघांसति ॥ १२ ॥ ततोऽभ्यसेत्प्रयत्नेन सदाचा
रं सदा द्विजः ॥ तीर्थानि यत्ऽभिवांछन्ति सदाचारस्य मागमम् ॥ १३ ॥ ब्राह्मे मुहूर्ते उत्थाय चिंतयेदात्मनो हितम् ॥ रज
न्यार्श्चेति मो या मो मुहूर्तौ ब्राह्म उच्यते ॥ १४ ॥ तपांसि नामुहूर्तेऽपि रजन्या ब्राह्मणसंज्ञिता ॥ तत्र निद्रा तु पानृणां
सा पुण्यक्षयकारिणी ॥ १५ ॥ सस्ना प्रसादतस्तत्र नरोऽपस्माऽपनुत्तये ॥ प्रायश्चित्तं प्रकुर्वीत पादकृच्छ्रं द्विजः स्वयम्
॥ १६ ॥ ध्यात्वा ततः स्वहृदये समुरुं प्रणमेद्धरिम् ॥ भक्तानां तस्य नामानि कीर्तयन्प्रणमेन्मुदा ॥ १७ ॥ तं हि भूती
स्तथा देवान्महर्षींश्चापि संस्मरेत् ॥ पुण्यक्षेत्राणि गंगाद्याः सरितः प्रणमेत्स्व ॥ १८ ॥ प्रातः स्मरामि नवनीति
महान्निशान्तं सीनारायणं गरुडवाहनमम्बुनाभम् ॥ ग्राहाभिभूतवरवारणमुक्तिहेतुं चक्रायुधं तरुणवारि
जपत्रनेत्रम् ॥ १९ ॥ प्रातर्नमामि मनसा वचसा च मूर्ध्ना पादारविंदयुगलं परमस्य पुंसः ॥ नारायणस्य नरका
र्णवतारकस्य पारायणप्रवरविप्रपरायणस्य ॥ २० ॥ प्रातर्नमामि नजलाम नर्यंक रं ते प्राकसर्वजन्मकृतपा
पभयापहत्यै ॥ यो ग्राहवक्त्रपतितांघ्रिगजेंद्रघोरशोकप्रणाशनकरो धृतशंखचक्रः ॥ २१ ॥ श्रीकृत्य मि

॥स॰जी॰पं॰६ दयुर्णमातः प्रातः पंचेन्नरः॥ शौकत्रयपवित्रस्तंदाहात्मपदे हरिः॥२२॥ ततः पुमान्समुत्थाय कुर्याद्विण् अ॰२७॥
॥३३॥ मूत्रकर्म च॥ नैर्ऋत्यां शरविक्षेपमितां भूमिमतीत्य वै॥२३॥ अन्तर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा॥ कुर्या
न्मूत्रपुरीषे तु शुचौ देशे च निर्जने॥२४॥ दिवासंध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः॥ कुर्यान्मूत्रपुरीषे तु रात्रौ
चेद्दक्षिणामुखः॥२५॥ छायायामन्धकारे वा रात्रावहनि वा द्विजः॥ यथासुखमुखः कुर्यात्प्राणबाधाभयेषु
च॥२६॥ बहिर्ग्रामान्न गन्तव्यं निशि उत्सर्गकर्मणि॥ कार्यं गृहसमीपे हि तथा रोगी जनेन तत्॥२७॥ मलोत्स
र्गविधिं कृत्वा प्राप्य यां दिशि वा पुमान्॥ भृदीं शुनाचरेच्छौचं विशुद्धेऽप्य जलाशये॥२८॥ न तिष्ठन्वा स्फनो
विप्रगोवह्न्यर्केन्दुसन्मुखः॥ न फालकृष्टभूभागे न मार्गे न नदीतटे॥२९॥ गवां मध्ये धान्यमध्ये जीर्णदेवा
लये क्वचित्॥ चिरामूत्रशीवर्ने नैव कुर्यात् स्त्रीसन्मुखस्तथा॥३०॥ शानेहस्तं परित्यज्य मूत्रं कुर्याज्जलाशया
त्॥ शतहस्तं पुरीषे तु तीर्थे नैतच्चतुर्गुणम्॥३१॥ प्रह्ल्ही यान्नमृदं मार्गान्नोषरात् द्विरदस्य जादिपि॥ शौचो
च्छिष्टं समजं तुं च तथा वल्मीकसंभवा॥३२॥ एका लिंगे गुदे तिस्रो दश वामकरे मृदः॥ देयाः सप्तोभयोर्द्वे स्त्री
स्तिस्रस्तु पादयोः॥३३॥ एतदर्धं तु नारीणां शूद्राणां चापि कीर्तितम्॥ कुर्यान्निशीथ्यं विप्रोऽपि पथि शूद्रव
दाचरेत्॥३४॥ कुर्याद्द्वादशगंडूषान् पुरीषोत्सर्जने द्विजः॥ मूत्रोत्सर्गे तु षट् कुर्याच्चतुरो वापि धर्मवित्॥ ॥३३॥

३५॥ पीतशेषं शौचशेषं नाचामेदुदकं द्विजः॥ पात्रान्तरस्याभावेन किंचित्त्यक्त्वा तदाचरेत्॥३६॥ एतच्छौचं
गृहस्थानां द्विगुणं ब्रह्मचारिणाम्॥ त्रिगुणं वनिनां प्रोक्तं यतीनां तु चतुर्गुणम्॥३७॥ आर्त्तः कुर्याद्यथ
याशक्ति शक्तः कुर्याद्यथोदितम्॥ शौचमित्यस्य यत्नेन देशकालानुसारतः॥३८॥ कृते मूत्रपुरीषेऽपि य
द्दि नैवोदकं भवेत्॥ तदा यत्नोदकाप्तिः स्यात्तदा स्नायात्सचेलकः॥३९॥ अरण्येनुदके रात्रौ व्याघ्राकु
लेपथि॥ कृत्वा मूत्रं पुरीषं च द्रव्यहस्तो न दुष्यति॥४०॥ कर्त्तव्यं यत्नतः शौचं शौचमूला द्विजातयः॥ शौचाचा
रविहीनानां सर्वाः स्युर्निष्फलाः क्रियाः॥४१॥ तस्माच्छुद्धिर्द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा॥ मृदम्बुभ्यां भवेद्बाह्यं
भावशुद्धिस्तथान्तरम्॥४२॥ न शुद्ध्येद्बाह्यशौचेन शौचमाभ्यन्तरं विना॥ तस्मादुभयथा शौचं यः करोति स शु
ध्यति॥४३॥ स्त्रिपाण्डजं चतुष्पथे स्पर्शतिशेरतस्य च॥ अवाप्य वक्तुः किं शौचे मृल्लैश्च नदीजलैः॥४४॥
मुखस्य शुद्धये कुर्यात्प्रत्यहं दन्तधावनम्॥ अजेतुनातु काष्ठेन कनिष्ठाग्रसमेन च॥४५॥ द्वादशांगुलमानं
नजाईं विप्रस्य कीर्तितम्॥ एकैकांगुलह्रासं च क्षत्रादीनां क्रमान्मतम्॥४६॥ प्रतिपद्दर्शषष्ठीषु व्रतादे
श्राद्धवासरे॥ संक्रान्तावपि काष्ठेन न कुर्याद्दन्तधावनम्॥४७॥ अज्ञाने दंतकाष्ठस्य निषिद्धेन तथाहनि॥
अपां द्वादशगंडूषैर्विदध्याद्दन्तधावनम्॥४८॥ यस्तु गंडूषसमये तर्जन्या दंतधावनम्॥ करोति स तु मूढा

त्या मुच्यते पापकर्मणा ॥४९॥ नवावश्यकर्माणि द्विजानां प्रतिवासरम् ॥ स्नानं संध्या जपो होमः स्वाध्यायो 
देवतार्चनम् ॥५०॥ वैश्वदेवं तथातिथ्यं नवमं पितृतर्पणम् ॥ हीनः कर्मभिरेतैस्तु ज्ञेयश्शूद्रसमएव सः
५१॥ उत्साहमेधासौभाग्यरूपसंपत्प्रवर्तकम् ॥ मनःप्रसन्नताहेतुः प्रातःस्नानं प्रशस्यते ॥५२॥ प्रातःस्ना
नेहरसंहोदारिद्र्यं ग्लानिमेव च ॥ अशुचित्वं च दुःस्वप्नं तुष्टिं पुष्टिं प्रयच्छति ॥५३॥ न जाड्यं येन कृत्वापि भूरि
जं तु समाकुले ॥ आपद्यपि न कर्तव्याः स्नानशौचादिकाः क्रियाः ॥५४॥ जडाजाड्ये निमज्जेपि नीचजात्युपसे
विते ॥ स्नानादिकाः क्रिया नैव कर्तव्याः परापि क्वचित् ॥५५॥ नीचजातिसंबंधी वृक्षो वा सायवस्यजम् ॥ उ
पजितमपि क्वापि सेवी कर्तव्यं द्विजातिना ॥५६॥ अन्नं वा सस्यजं वापि तुष्यस्यान्त्यस्य तत्त्वतः ॥ जात्यादिकम
शुद्धं वस्त्री कार्यं नैव कर्हिचित् ॥५७॥ संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ॥ यदन्यत्कुरुते पुण्यं न त
स्य फलं भाग्भवेत् ॥५८॥ विधियज्ञाः पाकयज्ञा ये चान्ये वह्निहोमखाः ॥ सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोड
शीम् ॥५९॥ धनोपार्जनसक्तो यो नादधात्यनलं द्विजः ॥ सायं प्रातर्न वा होमं कुर्यात्स नरकं व्रजेत् ॥६०॥ प
पाठ्यं नित्यं वेदं तदंगं वापि भारतम् ॥ पुराणं वा हरेः स्तोत्रं पठेत्सब्रह्महा द्विजः ॥६१॥ योन पूजयेते नित्यं
भक्त्या देवं जगत्प्रभुम् ॥ स राक्षसमलं तं जन्म तं ततः शूकरतां द्विजः ॥६२॥ माध्याह्निकं वैश्वदेवं गृहस्थः स्वयमान्न 

येत् ॥ पत्नी सा जैव जीन्दराग्नौ शान्ते मंत्रवर्जितम् ॥६३॥ अकृत्वा वैश्वदेवं तु भुंजते ये द्विजाधमाः ॥ इहलोके
ऽन्नहीनाः स्युः काकयोनिं व्रजंत्यपि ॥६४॥ निष्पावान्कोद्रवान्माषान्नारकीश्चणकांस्तथा ॥ तैलपक्वं ल
वणं युञ्ज्याद्वैश्वदेवे विवर्जयेत् ॥६५॥ कृतेन जीयते पापं स्वाध्यायात्कीर्तिमेति च ॥ देवार्चनेन लभते दिव्यं
लोकमभीप्सितम् ॥६६॥ अन्नार्थिनि समायाते पात्रापात्रं न चिंतयेत् ॥ अपि श्वपाके शुनि वान्नेन निष्फ
लं भवेत् ॥६७॥ यो न तर्पयते पितॄनुदकांजलिभिर्द्विजः ॥ तदंगरुधिरं ते च पिबंति प्रत्यहं ननु ॥६८॥ प्रागेव
भुक्तेः शृणुयात्पुराणं वेदसंहितामात्रमसौ शृणोतु ॥ सायं तु भुक्त्वा निशि वाऽपराह्णे द्विजोऽनुघस्रं शृणु
याद्गृहस्थः ॥६९॥ समागमं वाप्युत नक्तिभाजां यथावकाशं प्रतिवासरं सः ॥ कुर्यात्सतां धर्मपरायणानां
सद्बुद्धिलब्धिस्तत एव परस्मात् ॥७०॥ इति श्रीसर्वांगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे
धर्मोपदेशे सदाचारे शुद्धिज्ञानामाह्निकविधिनिरूपणनामा सप्तदशोऽध्यायः ॥१७॥ श्रीनारायणास्तु
निरुवाच ॥ प्रातःकृत्यं विधायैव प्रणमेद्गुरुदेवनम् ॥ स्वहीकुर्यात्स्वगुरवस्तस्मै दद्यात्स्वभाशिषः ॥१॥ आ
चार्यस्य सुपाध्यायं मातरं गुरुम् ॥ धर्मवृद्धं च योरुद्रमभीवंदेत सर्वथा ॥२॥ लौकिकं वैदिकं वापि
ज्ञानमाध्यात्मिकं तथा ॥ आददीत न तस्तु पूर्वमेवाभिवादयेत् ॥३॥ पार्श्वं द्विरिं नैच पतितं नास्ति कंपाप

दूषितम्॥ साधून्जो हं हन्न घं चनन नमेदुरुमप्यसौ॥४॥ धावंतं च प्रमत्तं च स्नातं मुत्सर्गकर्मणं च॥ कुर्वंतं देव 
पार्वं च वमंतं नाभिवादयेत्॥५॥ जपयज्ञव्रतस्थं च समाभित्सुं च कुशाञ्जानजान्॥ उदपात्रं च भैक्षं च वहं
तं नाभिवादयेत्॥६॥ देवतानां प्रतिमां च दृष्ट्वा यन्ति रहस्तं वैरमेवम्॥ सद्यः कुर्यान्नमस्कारं प्रायश्चित्तं च यथा
भवेत्॥७॥ एवं योग्याणि पत्र्याधामाणापोपांस्त्र प्रणमेदुरुम्॥ उदक्यां सूतिकां नारीं तानं वंदेत पापिनीम्॥८॥
अभिवादनशीलस्य नित्यं वृद्धोपसेविनः॥ चत्वारि सम्प्रवर्धंते आयुः प्रज्ञा यशो बलम्॥९॥ कायेन त्रिवि
धं कर्म वाचा चापि चतुर्विधम्॥ मनसा त्रिविधं चेति दश कर्मपथांस्त्यजेत्॥१०॥ प्राणिनो हिंसनं स्तैन्यं प
रदाराभिमर्शनम्॥ एतानि त्रीणि कायेन सर्वथा परिवर्जयेत्॥११॥ असत्प्रलापं पारुष्यं पैशुन्यमनृतं
तथा चत्वारि वाच्यानि कर्माणि वर्जयेच्च प्रयत्नतः॥१२॥ अभिध्यानं परस्वस्य परस्याऽनिष्टचिंतनम्॥ वेदवादे
ष्वनास्तिक्यं मनसा त्रीणि संत्यजेत्॥१३॥ अगावप्युचितं कार्यमातिथ्यं गृहमागते॥ छेत्तुमप्यागते छायां
नोपसंहरति द्रुमः॥१४॥ न निषिद्ध तिथौ भार्यामुपगच्छेत्पुष्पिणीम्॥ अन्यत्राप्यरजस्कां नैव व्रतस्थां नैव रोगि
णीम्॥१५॥ व्रतस्था याः स्वभार्या या यो गृही काममोहितः॥ व्रतभंगं कारयति कुंभीपाके स पच्यते॥१६॥ नग्नु
नेक्षेत स्त्रैताकं पत्नीं दुरु जनं तथा॥ न भक्षयेद्द्विजो धीमान् कलिंगं कदाचन॥१७॥ उदीतं च न वीक्षेत नाऽस्तं 

यांतं न मध्यगम्॥ न राहुणोपसंसृष्टं नवां तुच्छं दिवाकरम्॥१८॥ देवतायतनं विप्रं धेनुं मधु मृदं घृतम्॥ ना
ति वृद्धवयोवृद्धं विद्यावृद्धं तपस्विनम्॥१९॥ अश्वत्थं चैत्यवृक्षं च गुरुं जलं भृतं घटम्॥ सिद्धान्नं दधि सिद्धार्थ
गच्छन् कुर्यात्प्रदक्षिणम्॥२०॥ वृद्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणाम्॥ मत्तोन्मत्तत्यागिनां च पंथा
देयो हि वर्त्मनि॥२१॥ अध्वनीनं श्रोत्रियं च त्यागिनं क्षुधितं तथा॥ भोजयेत्सरया प्रीत्या सामानयेच्च यथोचित
म्॥२२॥ यस्य कोशगतं लब्धं वेदाभ्यासेन जीर्यते॥ स तारयति दातारं दशपूर्वान्दशावरान्॥२३॥ संभोज्य
भक्तानतिथीन्ग्रामांतादनुव्रजेत्॥ सर्वत्र विनयः कार्यः सद्भक्तेषु विशेषतः॥२४॥ परपाकरुचिर्न स्यात्
निंद्यामंत्रणादृते॥ वाक्पाणिपादचापल्यं वर्जयेच्चातिभोजनम्॥२५॥ चतुरस्रं त्रिकोणं च वर्तुलं चैसनुक्र
मात्॥ विप्रादीनां मंडलं कार्यं पात्राधस्तात्तु भोजने॥२६॥ प्राणाग्निहोत्रविधिना दद्याद्दर्वीषडाहुतीः॥ स्वाहां
तैः प्रणवाद्यैश्च साक्षात्प्राणादिनामभिः॥२७॥ तर्जनीमध्यमांगुष्ठैः प्राणस्याहुतिरीरिता॥ कनिष्ठानामि
कांगुष्ठैरपानस्याहुतिः स्मृता॥२८॥ मध्यमानामिकांगुष्ठैर्व्यानस्य परिकीर्तिता॥ मध्यमानामिकामाभि
रुदानस्याहुतिर्मता॥२९॥ समानस्य तु सर्वाभिराहुतिश्चांतरात्मनः॥ एतादृतैः स्पृष्टेन्नैवाग्रे सेद्दसन
पाद्विजः॥३०॥ यतिवृद्धव्रतस्थब्रह्मचारिगर्भिण्यातुरबालकान्॥ संभोज्यातिथिभृत्यांश्च भुंजीयातां तु दंपती

३१॥ कृत्स्नगर्भोपि यं जन्मदिने चैकादशीषु च ॥ शिवरात्र्यां च नाश्नीयात् गृहस्थोऽन्नं विनाऽऽपदम् ॥ ३२॥ व्रते पैते
षु च क्वापि वैद्यं वैश्यां व्यवहारिकम् ॥ कर्मणैव व्रतं कुर्यात् पारणं चापदं विना ॥ ३३॥ नाश्नीयाद्भार्यया सार्द्धं नैना
मीक्षेत चाश्नतीम् ॥ क्षुवंतीं जृंभमाणां च न चासीनां यथासुखम् ॥ ३४॥ नाञ्जयंतीं स्वके नेत्रे न चाऽभ्यक्ताम
नावृताम् ॥ न पश्येत्प्रसवंतीं च स्त्रियं क्वचित् ॥ ३५॥ न संध्ययोर्न दिवसे न निशायां तथामयोः ॥ शयीत
नाऽशुचिः क्वापि नाश्नीयात् संध्ययोर्द्वयोः ॥ ३६॥ रामं स्कंदं हनूमंतं वैनतेयं वृकोदरम् ॥ शयने यः स्मरेन्नि
त्यं दुःस्वप्नं न पश्यति ॥ ३७॥ स्त्रीधर्मिण्या नाभिवदेन्न रहस्युपरस्त्रिया ॥ एकाकिनीं व्रजंतीं च भाषयेन्न पर
स्त्रियम् ॥ ३८॥ नाचक्षीत धयंतीं गां नेंद्रचापं च दर्शयेत् ॥ नैकः स्वपेत् क्वचिच्छून्ये नैकश्च पथि व्रजेत्
॥ ३९॥ अपेयं न पिबेत् क्वापि नैवाऽभक्ष्यं च भक्षयेत् ॥ अदेयं नैव दद्याच्च कुर्यान्नाऽकार्यकर्म च ॥ ४०॥ अभा
षान्नैव भाषेत न विक्रीणीत गर्हितान् ॥ असत्यानि सृजेन्नैव पतिताद्यैर्न संविशेत् ॥ ४१॥ काणानंधांश्च
कुब्जांश्च केकराक्षान् कुणींस्तथा ॥ खंजान्मूकांश्च बधिरान्नाल्पांश्चापि क्षिपेत्क्वचित् ॥ ४२॥ देवपत्नीर्विप्रवक्त्रा
श्वाशिरवोक्ष्णोर्विष्णुतार्क्ष्ययोः ॥ अंतरा नैव गच्छेच्च स्त्रियोश्च गुरुशिष्ययोः ॥ ४३॥ दानेऽथाचमने होमे भोजने
देवतार्चने ॥ स्वाध्याये गुरुदेवाग्रे प्रौढपादो भवेन्नहि ॥ ४४॥ आसनारूढपादश्च जानुनी वापि न द्वयोः ॥ कृत्वोश्च



कृतपादो यः प्रौढपादः स उच्यते ॥ ४५॥ आत्मनाम गुरोर्नाम नामाऽतिकृपणस्य च ॥ आयुःकामो न गृह्णी
याज्ज्येष्ठापत्यकलत्रयोः ॥ ४६॥ गुरुं तपस्विनं वृद्धं विद्यावृत्तं च सद्गुणम् ॥ नाभाषयेद्देवं च त्वंकारेणान्
राधिपम् ॥ ४७॥ परक्षेत्रे चरंतीं गां सूचयेन्नैव पूरुषः ॥ अपायितोदकान् क्वापि बध्नीयान्न पशून्स्त्रि ॥
४८॥ नरदेवगुरोर्विप्रैः प्रोदीयमानं न निवारयेत् ॥ नात्मश्लाघां प्रकुर्वीत परनिंदां च वर्जयेत् ॥ ४९॥ न शास्त्रस
र्पैः क्रीडेच्च न कूपोत्थं वनं चरेत् ॥ न पादक्षाजनं कुर्यात् सार्द्धं नैव पुमान् क्वचित् ॥ ५०॥ अग्नौ न प्रक्षिपेदग्निं न
गुरोर्दुष्कृतं वदेत् ॥ कृष्णन्मरणमात्मनो वा न स्वयं चावपेत्स रन् ॥ ५१॥ प्रत्यक्षं जलवाणं नैव गृह्णीयाद्ब्राह्मणेभ्यकुधी
: ॥ सूर्यं प्रत्यग्न्यस्मरेद्विद्युदुराचारस्य दर्शने ॥ ५२॥ श्रुतिस्मृतिविरुद्धं च पाखंडं हैतुकं तथा ॥ अनीश्वरं च पश्यन्
स्पृष्ट्वा स्नानं न दूरतः पुमान् ॥ ५३॥ श्वस्पृष्टं शाकुनोच्छिष्टं केशकीटादि कृपाहतम् ॥ भार्योच्छिष्टं गवाघ्रातमन्नं नै
व च भक्षयेत् ॥ ५४॥ मद्यमांसादिसंस्पृष्टं न चास्पृश्यमुदक्यया ॥ अन्नं नाऽद्याच्च शाकादि विज्ञातं परिवर्जये
त् ॥ ५५॥ नैव सृष्टं च नछिद्रान्मार्गलाघातहंतया ॥ शय्यासनेन न चाऽकामेस्य स्यादुत्कृष्टनी नयी ॥ ५६॥ न चाऽ
मंगलशीलः स्यान्नैवाऽमंगलवागपि ॥ न चाऽधर्मोपदेशेन द्रव्यं कस्यचिदाहरेत् ॥ ५७॥ न वंचयेत्कर्म कृ
तं साधयित्वाऽर्थमात्मनः ॥ न जीवनयोश्रियं कांचिन्मादकं नैव भक्षयेत् ॥ ५८॥ न धर्मस्यापदेशेन पापं

॥म.जी.वं०॥ गोपयेत्तथा ॥ कृच्छ्रमन्यस्य साधोश्च पुरतस्तन्निवेदयेत् ॥५९॥ आयश्चित्तं यथाशक्ति कुर्याद्दुष्कर्मणो द्रुतम् अ०४८॥
॥३७॥ कुर्वीतात्महितं नित्यं सर्वभूतानुकंपनम् ॥६०॥ वयसः कर्मणोऽर्थस्य श्रुतस्याऽभिजनस्य च ॥ देहस्य वाचो
बुद्धेश्च योग्यं कर्म समाचरेत् ॥६१॥ प्रत्यक्षमथ देवस्वं प्राणान्तेऽपि न चाहरेत् ॥ अधिकं कालकूटाद्धि तद्विषं प
रिचक्षते ॥६२॥ अदत्तं कस्यचिद्वस्तु गृह्णीयान्नैव किंचन ॥ नहिस्तेयसमं पापमन्यज्जीवातिदुःखदम् ॥६३॥
काष्ठं फलं तृणं पुष्पं प्रकाशं वै हरेत्क्वचित् ॥ केवलं धर्मकृत्स्यार्थे मन्यथा पापितो भवेत् ॥६४॥ मिथ्यापवादं
कस्यापि न ब्रूयात्कर्हिचित्सुमान् ॥ ध्रुवं पतति पूर्वादि यावच्चंद्रदिवाकरौ ॥६५॥ सत्यमेव सदा ब्रूयादन्यजो
ऽनृतेन चित् ॥ नास्ति सत्यसमं पुण्यमित्युवाच प्रजापतिः ॥६६॥ अश्वमेधसहस्रं च सत्यं तुल्यया धृतम् ॥ पुरा
विरंचिना तच्च सत्यमेवाऽतिरिच्यते ॥६७॥ स्त्रीपुनर्मणीवृत्त्यर्थे विवाहे प्राणसंकटे ॥ गोविप्रगुरुकार्यार्थे नानृ
तं चापि दुष्यति ॥६८॥ मृदुमेव सदा ब्रूयान्मृदुमेव विचिंतयेत् ॥ मृदुरेवेह संसर्गं कुर्यान्मानमदुपूरुषैः ॥६९॥ नो
हृतोऽन्यतमं तेषु नाविनीतेषु कर्हिचित् ॥ कुर्यान्मैत्रीं न चाऽज्ञानैर्नैव नोपाधिदूषितैः ॥७०॥ न चातिव्ययशी
लैश्च न लुब्धैर्नाऽगतैर्वैरिभिः ॥ नाऽसत्यवादिभिः कुर्यान्मैत्रीं लोकनिंदकैः ॥७१॥ न धूर्तसंसर्गैर्नन्मूर्खैर्नैनैव चोपा
गमिभिः क्वचित् ॥ सहासीत न नित्सैः स्वैश्च न च दैवपरैर्नरैः ॥७२॥ कुर्वीत साधुभिर्मैत्रीं सदाचारावनैर्विभिः ॥ वि ॥३७॥

द्यावित्तवयसैः पन्नैर्नित्यमनुद्योगमात्मिभिः ॥७३॥ नाऽगाधां च वगाहेत न प्रदीपं गृहं विशेत् ॥ नारोहेद्वृक्षशि
खरं दंतान्संघर्षयेन्न च ॥७४॥ चतुष्पथं चैत्यतरुं श्मशानोपवनानि च ॥ दुष्टस्त्रीसन्निकर्षं च वर्जयेन्निशि
सर्वदा ॥७५॥ अप्यर्थहानिः सोढव्या वैरेणार्यागमं त्यजेत् ॥ नोच्चासनं गुरोरग्रे सेवेत कदाचन ॥७६॥ ग्रामं न
तियः कुरून्सर्वान्वै भूनमत्सरी ॥ भीतां स्त्रामाया एकल्कसर्वशक्त्या स्यात्कं फलम् ॥७७॥ जिह्वा भार्या सुतो भ्राता
मित्रदासाः समाश्रिताः ॥ यस्यैते विनयाढ्याः स्युस्तस्य सर्वत्र गौरवम् ॥७८॥ नोद्वहेन्न तिर्यग्दूरं वा वीक्षमाणश्च प
र्यटेत् ॥ युगमात्रं महीपृष्ठं नरो गच्छेद्विलोकयन् ॥७९॥ अन्वयेऽसति सर्वस्वं भार्यां च शरणागतम् ॥ कुलवृत्तिं
च पुत्रांश्च दद्यान्नापद्यपि क्वचित् ॥८०॥ ऋणशुद्धिं स्ववंशीयं च वस्तूनां क्रयविक्रयौ ॥ कन्यादानं गुणोत्कर्षं गो
पयेन्नैव बुद्धिमान् ॥८१॥ संस्कारान्नेन नभुञ्जीत प्रेतश्राद्धमेव च ॥ श्राद्धं कृत्वा परश्राद्धे भोक्तुं नैव व्रजेत्तथा ॥८२॥ तीर्थ
त्रिकत्रिपोन्नमात्रादानं त्रिरात्रिषु ॥ नारोहेच्च गवां पृष्ठे बाहुभ्यां न नदीं तरेत् ॥८३॥ नाऽधार्मिके वसेद्ग्रामे न पाषं
डीजनाकुले ॥ पीडिते दुष्टराज्ञा च जीविकारहिते तथा ॥८४॥ यत्र राजा धर्मनिष्ठः श्रोत्रियः सज्जनान्दी ॥ ऋणप्रदा
ता वैद्यश्च उरे तत्र वसेद्गृही ॥८५॥ पौराः स्कसंहता यत्र सन्ततं न्यायवर्तिनः ॥ यत्राऽऽमजसरिणीलोकवासस्तत्र रक्ष्याव
ह ॥८६॥ नोत्साहे पेडीमनस्वि दत्तानेश्च कदाचन ॥ करजैः करजच्छेदं तृणच्छेदं च वर्जयेत् ॥८७॥ शुभायन यदायसां

॥ स॰जी॰पं॰५ ॥
॥ ३८ ॥

न स्वां त्यजेत्स्वकर्म यत्नतः ॥ अद्वारेण न गच्छेच्च स्ववेश्म परवेश्मनोः ॥ ८८ ॥ कीर्तिन्यासः स्वैर्न धर्मघ्नैः मिलितासीनकः अ॰ २९ ॥
चित्सुमान् ॥ न शयीत तथा न स्नायान्नग्नो जलमाविशेन्न तु ॥ ८९ ॥ न स्पृशेद्दिनभित्ते न खानि स्वानि त्वनातुरः शुत्यु
त्यन्यपितो मानि यस्पर्शाद्धस्तं निर्मदेत्तत् ॥ ९० ॥ पादधौतोदकं मूत्रमुच्छिष्टान्नोदकानि च ॥ निष्ठीवनं च श्लेष्मा
णं गृहाद्दूरे विविक्षिपेत् ॥ ९१ ॥ कण्डूयनं च शिरसो बाहुभ्यां न समाचरेत् ॥ आताडनं कराभ्यां च क्रोशनं केश
लुंचनम् ॥ ९२ ॥ पूर्वाह्णे विपरिस्थमात्मानं नावमानयेत् ॥ सदोद्यमवतां यस्मात्छिद्यो विद्या न दुर्लभाः ॥ ९३ ॥ सत्यं
ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ॥ प्रियं च नानृतं ब्रूयादेवं धर्मोऽस्ति मानवः ॥ ९४ ॥ नागाङ्जलिं पिबेत्त
क्षीरं न वा भोदीर्घधारया ॥ न तिष्ठन्तु वामदेशस्य च भोजनावसरे विना ॥ ९५ ॥ चपटे कदा फं हे यन्तपाकामेतोकाः
विकम् ॥ गोपीयूषस्तथा वल्लीं रात्रौ च दधिभोजनम् ॥ ९६ ॥ मद्यं नैव च पातव्यं नित्यं त्रैवर्णिकैर्नृभिः ॥ न भक्षणीयं
मांसं च हिंसा नरकादायतः ॥ ९७ ॥ यो जन्तून्मात्मतुल्यं यं हि वस्तिज्ञानदुर्लभम् ॥ दुराचारस्य तस्येह नाऽमुत्राऽपि
कल्याणं भवेत् ॥ ९८ ॥ हेना स्तुर्मनासंस्कृतान्मीकाके ना चविक्रयी ॥ उपहर्त्ता घातपिता हिंसकोत्युष्टधामतः ॥ ९९
॥ आर्जवं च त्वोस्तयाद्यो ऽनृशाः स्तुर्यद्युनिस्कृपाः ॥ तुंभिः स्त्रीभिर्न भक्ष्यास्ते सूक्ष्मजीवान्तसंभवात् ॥ १०० ॥ न स्व
र्गकाम्यया कुर्यात्तीर्थे स्वपि कदाचन ॥ आत्मघातं गृहस्थस्तु क्रोधाद्दिना दिभिः ॥ १०१ ॥ ब्राह्मणं कृशाङ्गं ॥ ३९ ॥

कृष्णवाकृशा तमनामयम् ॥ वैरूप्यं स्वं समागम्य स्पृहं से नोपमेव च ॥ १०२ ॥ पैशुन्यं परदारांश्च क्रोधं द्रोहं नयाः
नृतम् ॥ स्तैन्यं द्वेषं च दंभं च सर्जेन्मायां च हरतः ॥ १०३ ॥ जन्मर्क्षे मे पुनर्मन्त्रग्रहच्छिद्रं च वेचनम् ॥ आयुर्धनं चा
पमानं छिद्रं यं चेति कगोपयेत् ॥ १०४ ॥ स्तुतिन्द्रदेवदेवानां नृपसाधुतपस्विनाम् ॥ पतिव्रतानां नारीणां निन्दां कु
र्यान्न कर्हिचित् ॥ १०५ ॥ न मनुष्यस्तुतिं कुर्यान्नात्मानमवमानयेत् ॥ वाचो वेगं जिह्वावेगं च वर्जयेत् ॥ १०६ ॥ संकु
टे महति प्राप्ते यस्य कस्यापि देहिनः ॥ यद्दीयते धनं तस्मादिहाऽमुत्राऽप्यनन्तकम् ॥ १०७ ॥ मातापितृविहीनं यो मौ
ञ्जीपाणिग्रहादिभिः ॥ संस्कारयेत्स्वजैरर्थैस्तस्य श्रेयस्त्वनन्तकम् ॥ १०८ ॥ अग्निहोत्रैर्न तच्छ्रेयो नाग्निष्टोमादिभि
र्मखैः ॥ यच्छ्रेयः प्राप्यते मर्त्यैरेकस्मिन्द्विहितेकृति ॥ १०९ ॥ योऽत्युना यस्य विप्रस्य विवाहं कारयेत्सुती ॥ गृहस्थो
स्यमवाप्यायः श्रेयोऽस्य यं स्वर्गमेति च ॥ ११० ॥ कुग्रामे वसतिं कुर्यात्सुमित्रे भ्रमं माचरेत् ॥ कुभार्यायां वसेन्नैहे स्क
च्छिष्यं बोधयेदिह ॥ १११ ॥ कुराज्ये राज्येत्युनयं कुतः स्यात्कुमित्रे मे श्रेयस्वहितं कुतः स्यात् ॥ कुभार्यया निर्वृतता
कुतः स्यात्कुशिष्यबोधेन यशः कुतः स्यात् ॥ ११२ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रक
रणे धर्मोपदेशे सदाचारेषु दैवपितृपादेय कर्मनिरूपणनामा [illegible]शोऽध्यायः ॥ २९ ॥ श्रीनारायणमुनिरुवाच ॥
स्वप्ने दुर्जनस्पर्शे वमथु कर्मणि मैथुने ॥ सद्यः स्नानं प्रकुर्वीत शवादिस्पर्शनेन वा ॥ १ ॥ वेदवाक्यमनानुस्मृत्य बौद्ध

दीपमालिकानषि॥ कृत्वा स्नानं विजोक्यार्कनामानि निजपेद् रे॥२॥ शिरोरम्भुक्षणाप्रोक्तं बालस्याचमनं स्मृतम्
॥ रजस्वलादिसंस्पर्शे स्नानमेव कुमारके॥३॥ आ कूचंडाकरणाद्बालः आज्ञानाच्छिशुः॥ कुमारकस्तु विज्ञेयो
यावन्मौञ्जीनिबंधनम्॥४॥ खज्ञक्षेत्रगतं धान्यं कूपवाप्यादिषूदकम्॥ स्पर्शाद्दुष्टमपिग्राह्यं पञ्चगोष्ठगतं पयः
॥५॥ आपस्नु सक्तवो धाना दधि तक्रं घृतं पयः॥ शूद्रहस्तादपिग्राह्यं छदिनेनेत्यब्रवीन्मनुः॥६॥ शुचीच्छुकारुह
स्तस्यं वपणं पण्यप्रसारितम्॥ नैक्ष्यं च प्रोक्षणाच्छुचि स्मृतिः स्मा शास्त्रमयस्य तम्॥७॥ धान्यानां वायुनाशुद्धि
घृतादीनां च चक्रिणां॥ कालेन गजदंतादेर्भवेच्छुद्धिश्च चर्मणाम्॥८॥ शुद्धिश्च यज्ञपात्राणां भवेदुष्णोदकेन वै
॥ काष्ठानामथ्यतंतूनां वाससामुदकेन च॥९॥ अल्पे जलाशये शुद्धिस्त्वरेहेणे वनवोदकम्॥ दशाहेने वम
हति गजमावेदिनातरे॥१०॥ नैपो लेखाच्चौं बुसेकाम्बरं सुभेतृञ्जलेपनात्॥ अमेध्यलिंग मृत्तो येगधापह
रणोनवै॥११॥ कृष्णकौशेयकुतपट्टक्षौमदुकूलकाः॥ एते शुद्धा भवंत्येव शौचयण प्रोक्षणादिभिः॥१२॥ नृलि
कामुपधानं च पुष्परक्तांवराणि च॥ शोषयित्वातपे किंचित्मुकुरैस्तैनमार्जयेत्॥१३॥ पश्चात्सु वारिणा प्रोक्ष्य
विनियुंजीत कर्मणि॥ अपि कृत्स्नतिमालिन्ये शोधयेत्तानि वारिणा॥१४॥ उदुंबरस्य चाजेन्द्रिन क्षारेणात्रपुसीसयोः
॥ भस्मांबुभिः कांस्यसरीतैः शुद्धिश्च मृज्जलैः॥१५॥ शुध्येत्तु नस्मानाकांस्यं न चेन्मद्यैन जेपितम्॥ करामूत्रादिसं



स्पर्शं शुध्येदुर्लेखनेन वै॥१६॥ ताम्रमम्लेन शुध्येच्च न शेचेदामिषलेपनम्॥ आमिषेणातु पक्त्रिसंनतुदशाहे
न शुध्येति॥१७॥ गवा घ्रातानि कांस्यानि शूद्रपाकोपहतानि च॥ शुध्यंति दशभिः क्षारैः शूद्रोच्छिष्टानि यानि
च॥१८॥ भुतोत्थ्यम्बराशिश्चे च्यादिनोपहतस्तदा॥ अग्रमात्रं समुद्धृत्य शेषः स्यात्प्रोक्षणाच्छुचिः॥१९॥ र
जोऽग्निरश्वो गौश्छाया रश्मयो विप्लुषो मही॥ वायुर्जलं मक्षिका द्याः दुष्टसंगाददोषिताः॥२०॥ दर्भाः कृष्णाजि
नं मंत्रो गावोऽग्निर्ब्राह्मणास्तिजाः॥ नैते निर्माल्यतां यांति नियोक्तव्याः पुनः पुनः॥२१॥ दर्भाः पिंडेषु निर्माल्यं
ब्राह्मणाः प्रेतभोजने॥ मंत्रः शूद्रेषु निर्माल्यं सेव्या सिपुकृताशनः॥२२॥ अद्भिर्गात्राणि शुध्यंति मनः सत्येन
शुध्येति॥ विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति॥२३॥ द्विविधस्याशौचस्य शुद्धिं वक्ष्यामि तेत्वपा॥ व
र्णाश्रमोचितां वित्रसंक्षेपाद्दृष्टिसंमताम्॥२४॥ जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते॥ दशाहं सूतकेनस्य
कर्मानर्हत्वलक्षणम्॥२५॥ पुत्रस्य जननी शुध्येद्देहविंशतिवासरैः॥ कन्यायाः जननी शुध्येन्मासेनैकेन निश्चितम्
॥२६॥ सपिंडानां च सर्वेषां दशाहे सूतकं मतम्॥ त्रिरात्रं सोदकानां च मुनिभिः परिकीर्तितम्॥२७॥ सूतके सूतिकाव
र्जं संस्पर्शो न निषिध्यते॥ संस्पर्शे सूतिकायास्तु स्नानमेव विधीयते॥२८॥ प्रथमे दिवसे षष्ठे दशमे दिवसे तथा
॥ त्रिष्वेतेषु पितुर्नास्ति सूतकं पुत्रजन्मनि॥२९॥ अतो न विद्यते दोषः कर्तुं जातककर्मणा॥ तस्मान्नो भूहिरण्या

॥स॰ज्ञी॰पं॰७॥ द्विरात्रेण च प्रतिग्रहात्तु नाम ॥ ३०॥ दशाहं शावमाशौचं सपिंडेषु विधीयते ॥ सोदकानां तु सर्वेषां त्रिरात्रं तदुदीरितम् अ॰१७॥
॥४०॥ ३१॥ दशाहाभ्यंतरे बाले प्रमीते तस्य बांधवैः ॥ शावाशौचं न कर्तव्यं सूत्याशौचं विधीयते ॥ ३२॥ आदंतजन्मनः स्ना
नमाद्याहाद्दहनमुच्यते ॥ चौलोत्तरं त्रिरात्रं च पंचमाब्दात्परं तथा ॥ ३३॥ अहस्त्वदत्तकन्यानां दत्तायास्त्रिदिनत्रयम्
आशौचं च व्रतादेशाद्द्विजानां स्वस्वजातितः ॥ ३४॥ दिनानि दश विप्रस्य द्वादशाक्षत्रियस्य तु ॥ विशः पंचदशा
शौचं मासं शूद्रस्य कथ्यते ॥ ३५॥ सामान्यतो दशाहं वा चातुर्वर्ण्यस्य तत्स्मृतम् ॥ आपत्काले तु नियमो दशाहस्यापि
नास्ति कवे ॥ ३६॥ त्रिरात्रमातुराशौचमाचार्ये संस्थिते तथा ॥ मातामहे च दौहित्रे स्वपत्न्यभगिनीसुते ॥ ३७॥ मातु
लस्य च मातुल्याः श्वश्र्वाः श्वशुरयोरपि ॥ ज्ञाना तु भगिन्याश्च त्रिरात्रं स्वगृहे मृते ॥ ३८॥ अन्यथा पक्षिणी प्रोक्ता त
था पितृष्वसुर्मृतौ ॥ मातृष्वसुः श्यालकस्य तथा सन्मित्रशिष्ययोः ॥ ३९॥ निजदेशाधिपादीनामेकाहाशौचमुच्यते
स्वलेऽपि स्मृतिसंबंधे स्नानं वासोयुतं मतम् ॥ ४०॥ त्रिधा विभज्य रजनीं माद्यभागद्वये मृतौ ॥ जन्माशौचे दिनं पूर्वं ग्राह्य
मंत्येत्पश्चोत्तरम् ॥ ४१॥ इत्थं केचिद्बुधाः प्राहुस्तथा केचिन्महर्षयः ॥ निशीथात्प्राक् पूर्वदिनं प्राग्वा सूर्योदयाद्दिदु ॥ ४२॥
साग्नेर्दाहदिनादेव निरग्नेर्मृतिवासरात् ॥ आशौचं दिवसंख्यापि विज्ञेयाग्रहीर्न्यभिः ॥ ४३॥ सूते तन्निदशाहोर्ध्वं
पुनर्नास्त्येव सूतकम् ॥ शावाशौचे तु वित्तेयात्रवस्यैन्स्यं दिनोत्तमम् ॥ ४४॥ आत्रिमासात्त्रिरात्रं स्यात्षण्मासावधि प ॥४०॥

क्षिणी ॥ एकाहं नवमासांतमूर्ध्वं स्नानेन शुध्यति ॥ ४५॥ देशांतरमृते केचित्स्नानमात्रं महर्षयः ॥ रहुंत्विचतथात्रैते प
नो वैस्नानमेपि च ॥ ४६॥ महानद्यंतरं यत्र गिरिर्वा व्यवधायकः ॥ वाचो यत्र विभिद्यंते तद्देशांतरमुच्यते ॥ ४७॥ स्वदे
शे परदेशे वाप्यूर्ध्वं संवत्सरादपि ॥ मातुः पितुः स्त्रियाः पत्युः पूर्णमाशौचमुच्यते ॥ ४८॥ युद्धे मृतस्य नाशौचं गो
द्विजार्थे मृतस्य च ॥ प्रातस्यपी दुर्मरणमप्रमादेन तस्य च ॥ ४९॥ जननैतननेनेचेत्स्यान्मरणमरणं तथा ॥ पूर्वशेष
ण शुद्धिः स्यादुत्तराशौचकर्जनम् ॥ ५०॥ दशाहिके पतेदन्यत्सूतकं दशमेऽह्नि चेत् ॥ रात्रिशेषे द्व्यहाच्छुद्धिर्याम
शेषेण वै त्र्यहात् ॥ ५१॥ शावाशौचे समुत्पन्ने सूतकं तु यदा भवेत् ॥ शावेन शुध्यते सूतिः स्तन्न सूतिः शावशोधनी
॥ ५२॥ स्वल्पशौचस्य समध्ये तु दीर्घाशौचं भवेद्यदि ॥ न पूर्वेण विशुद्धिः स्यात्स्वकालेनैव शुध्यति ॥ ५३॥ सूतकांत
रसंजाता वपि तु त्रादिनाहिजः ॥ नवश्राद्धानि देयानि यथाकालं यथाक्रमम् ॥ ५४॥ आदंतज्जन्मशुद्धोपि कुर्यादेव
देशौग्र्हति ॥ कर्तुस्तत्कालिकी शुद्धिरशुद्धः पुनरेव सः ॥ ५५॥ कृत्विभिर्वकुर्यैवाः त्रसूतकाशौचविस्तरः ॥ कृतोलि
नतोलेयो विशेषोऽस्य स्तकसम्मते ॥ ५६॥ नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम् ॥ नाशौचं कीर्तितं सद्भिः शा
वेसोसं च सद्व्रत ॥ ५७॥ मातुः पितुर्गुरोश्चैते निजाश्रममरणं ततः ॥ कुर्युः सवसनं स्नानं नत्वयस्मस्य कदाचन ॥ ५८॥
व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे ॥ आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥ ५९॥ आरंभो वरणं यज्ञे सं

॥म·जी·पं·६॥ कन्यो व्रतसत्रयो ॥ नांदीश्राद्धविवाहादौ श्राद्धे पाकपरिक्रिया ॥६०॥ सूतके वर्त्तमाने च श्राद्धमात्मनि मनीषिभिः ॥श्रो०२१८॥
॥४१॥ कर्त्तव्यं सूतकांते तद् मासिकं वा यथाविधि ॥६१॥ आरब्धं तस्य सर्वस्य सूतके पि न सूतकम् ॥ स्वस्य कालेत्वि
दं सर्वं सूतकं परिकीर्तितम् ॥६२॥ सूतके कर्मणां त्यागो नित्यानामपि कथ्यते ॥ प्रारब्धानि तु काम्यानि कर्त्त
व्यानि यथाविधि ॥६३॥ संध्यां तु मानसीं कार्यां कुशवारिविवर्जिताम् ॥ विप्रो दशाहं मासीत वैश्वदेवविवर्जि
तः ॥६४॥ यो नैकर्मणि तत्काल स्नानं शुद्धिमवाप्नुयात् ॥ अस्पृश्यः पुनरेवस्याः स्नानं त्वन्येन कारयेत् ॥६५॥ ल
वणं फलपुष्पादौ घृतं तैलं पयस्तक्रं च ॥ पणिपुंवेदं सर्वं पुनः दीयोन्सूतसूतके ॥६६॥ आतुरे स्नान उत्पन्ने दश
वारमनातुरः ॥ स्नात्वा स्नात्वा स्पृशेदेनमातुरः शुद्धिमाप्नुयात् ॥६७॥ ज्वराभिभूता या नारी रजसा च परिप्लुता
: ॥ नो चापि स्वयं स्पृशेदन्या नारी स्नाया पुनः पुनः ॥६८॥ राजा च राजकीयाश्च सत्रिणो व्रतिनस्तथा ॥ स्नानाच्छौचा
स्त्वस्व कार्येषु विच्छेदो दयी विता ॥६९॥ द्विविधा शौचमित्युक्तं संस्पर्शोपेक्षणं यादिनः ॥ तथैव चात्र विज्ञेयं त
तीयं गाहु सूतकम् ॥७०॥ सर्वेषामेव वर्णानां सूतकं राहुदर्शने ॥ स्नात्वा कर्माणि कुर्वीत श्रृतमन्नं विवर्जयेत
॥७१॥ आरनालं पयस्तक्रं दधिस्नेहाश्रपाचितम् ॥ मणिस्थस्योदकं चैव न तिलदर्भैर्न दुष्यति ॥७२॥ सूर्यग्रहे तु ना
श्नीयात् पूर्वं यामचतुष्टयम् ॥ चंद्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरान्विना ॥७३॥ ग्रस्तोदये च सूर्यस्य पूर्वरात्रौ न भो ॥४१॥

जनम् ॥ ग्रस्तोदये विधोः पूर्वं नाह्निभोजनमाचरेत् ॥७४॥ ग्रस्तास्ते समतीतिग्मांशोरहोरात्रमुपोषणम् ॥ कु
र्यात्परेह्नि शुद्धांशुं कृत्वा ततः कुर्वीत भोजनम् ॥७५॥ ग्रस्ते चास्तं गते त्विंदौ नाला मुक्त्वा च धारणम् ॥ स्नानं होमा
दिकं कुर्यात्पुनर्नीतेरुदये पुनः ॥७६॥ बालवृद्धातुराणां च रवीदोर्ग्रहणे सुराः ॥ याम एको वर्जनीयो भोजनादा
वपि क्रमम् ॥७७॥ अनातुरोग्रहकाले यो भुंक्ते स तु नराधमः ॥ प्राजापत्येन शुद्धेद्वैवे धकालेग्रहणे च ॥७८॥
रविग्रहः सूर्यवारे सोमे सोमग्रहस्तथा ॥ चूडामणिरिति ख्यातः स योगः पुण्यवृद्धिकृत् ॥७९॥ वारेष्वन्येषु
यत्पुण्यं ग्रहणे चंद्रसूर्ययोः ॥ तत्पुण्यं कोटिगुणितं योगे चूडामणौ स्मृतम् ॥८०॥ ग्रहस्यमाने स्मृतं स्नानं ग्र
स्ते होमः करार्चनम् ॥ मुच्यमाने च पादानं मुक्ते स्नानं विधीयते ॥८१॥ मुक्तौ यस्तु न कुर्वीत स्नानं ग्रहणे
सूतके ॥ स सूतकी भवेत्तावद्यावदन्यो दयरोग्रहः ॥८२॥ शीतं तु भूमौ दकात्पुण्यमपारक्यं परोदकात् ॥ भूमि
स्थमुद्धृतात्पुण्यं ततः प्रस्रवणोदकम् ॥८३॥ ततोऽपि सारसं पुण्यं ततः पुण्यं नदीजलम् ॥ ततो महानदीतो
यं पुण्यं पुण्यमतो गांगं बुधिः ॥८४॥ यथासंभवतः स्नानं कर्त्तव्यं स्वस्य शुद्धये ॥ दाने देयं यथाशक्ति गोभूहेम
तिलादिकम् ॥८५॥ भूरिदो मेदिनीपीडाः सर्वत्र सुखिनोऽन्नदः ॥ भवेच्च कीर्तिमान्भूमौ रूपवान् रूप्यदो भवे
त् ॥८६॥ दीपदो निर्मलाक्षश्च गोदाता स्वर्गगो भवात् ॥ स्वर्णदाता न दरीपातु पुष्टिजदः स्याच्छक्तत्राताः ॥८७

केयमदोऽस्तु त्त्रुसौधःस्यादुरुस्थ्युंऽजोकनाक ॥ हयदो दिव्ययानस्य लक्ष्मीवान्नृपसद्मदः ॥ ७८ ॥ कन्याया
ःश्चिबिकादाता स्वर्पर्येकतद्दोपि च ॥ भवेत्ततः सर्वदैव दानं दातव्यमशक्तितः ॥ ७९ ॥ श्रद्धया प्रतिगृह्णाति
श्रद्धया यो ददाति च ॥ तावुभौ स्वर्गिणौ स्यातामन्यथा विफलं द्वितम् ॥ ८० ॥ चन्द्रसूर्यग्रहे यस्तु श्राद्धं विधि
वदाचरेत् ॥ तेनैव सकला पृथ्वी दत्ता भवति निश्चितम् ॥ ८१ ॥ रात्रौ श्राद्धं न दद्याद्धि अस्ति ग्रहणेऽशिनः कि
ल ॥ श्राद्धे चिनोऽग्रहणे श्राद्धादि विहितक्रिया ॥ ८२ ॥ एवं सदाचारविधिर्मया तुभ्यं प्रदर्शितः ॥ ऽनुष्ठानमस्य
तानो हि सर्वेषां स्वर्गदायकः ॥ ८३ ॥ श्रीविष्णुभक्त्या सहितं यएतं नित्यं सदाचारमिहानुतिष्ठेत् ॥ स प्राप्नु
यात्कीर्तिमतीवशुद्धामन्ते च गोलोकपरं द्विजेन्द्र ॥ ८४ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशा
स्त्रे पञ्चमप्रकरणे धर्मोपदेशे सदाचारेषु श्राद्धविधिनिरूपणनामा एकोनत्रिंशोऽध्यायः ॥ २९ ॥ श्रीनारा
यणमुनिरुवाच ॥ श्राद्धानि च यथाशक्ति यथाकालं यथाधनम् ॥ यथाविधि न कुर्वीत गृहस्थो नियमा
न्वितः ॥ १ ॥ नित्यं पित्र्यं श्रुतिनिर्दिष्टमोऽन्नदानं च तत्प्रियम् ॥ श्रद्धया दीयते यस्मात्तच्छ्राद्धं प्रकीर्त्यते ॥ २ ॥ नि
त्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिण्डनम् ॥ गोष्ठीश्राद्धं पार्वणं च शुद्धिश्राद्धं तथाऽष्टमम् ॥ ३ ॥ कर्माङ्गं न
वमं श्राद्धं दैविकं दशमं स्मृतम् ॥ यौष्टिकं यात्रिकं चेति श्राद्धानि द्वादशैव तु ॥ ४ ॥ एकोद्दिष्टं पार्वणं च वृद्धि ॥४२॥

श्राद्धं सपिण्डनम् ॥ श्राद्धमेवं चतुर्धैव त्रिवर्गे श्रुतयोऽपरे ॥ ५ ॥ दक्षिणाप्रवणे देशे तीर्थादौ स्वगृहेऽपि च
॥ भूसंस्कारादिसंयुक्ते श्राद्धं कुर्यात्प्रयत्नतः ॥ ६ ॥ तुलसीकाननच्छायापात्रस्थाने न वै द्विज ॥ तत्र श्राद्धं
प्रदातव्यं पितॄणां तृप्तिहेतवे ॥ ७ ॥ शमीपत्रप्रमाणेन पिण्डं दद्याद्यथाशिरे ॥ उद्दरेत्स्वस्य गोत्राणां कुलान्वे
कीर्तरेज्ञानम् ॥ ८ ॥ रविस्तु देशे तथा रात्रौ संध्यायां विप्रवर्जितः ॥ न श्राद्धमाचरेद्धि दान्यां तरिक्षे कदाचन
॥ ९ ॥ आकुंचणा वर्तिं श्राद्धान्नृपयः पितृतृप्तये ॥ देशकालानुकूल्ये हि सतां च श्राद्धसंपदि ॥ १० ॥ अमाम
नुयुगक्रांतिधृतिपातमहालयाः ॥ आर्द्रांतनिधिसंयुक्ता अष्टकाश्चेति तानीतु ॥ ११ ॥ भाद्रकृष्णत्रयोद
श्यां मघास्विंदौ करे रवौ ॥ गजच्छायाभिधो योगस्तत्र श्राद्धं महाफलम् ॥ १२ ॥ महानदीषु सर्वासु तीर्थेषु च ग
यामृते ॥ जीवत्पितापि कुर्वीत तच्छ्राद्धं पार्वणं धर्मवित् ॥ १३ ॥ दर्शश्राद्धं गयाश्राद्धं नापरपक्षिकं ॥ न जीवत्पित
कः कुर्यात्तिलैः कृष्णैस्तर्पणमेव च ॥ १४ ॥ तीर्थयात्राप्रसंगेन गयाप्राप्तौ तु धर्मवित् ॥ तीर्थश्राद्धं तत्र कुर्याच्छ्राद्धा
र्थेन तु तां व्रजेत् ॥ १५ ॥ उदाहे पुत्रजनने पुत्रेष्ट्यां सौमिके मखे ॥ तीर्थे ब्राह्मण आयाते पर्वतेऽजीवतः पितुः
॥ १६ ॥ महालये गयायां च वृद्धौ चान्वष्टकासु च ॥ श्राद्धं द्वादशधा दैवसेशोपं वाहोरुषं विदुः ॥ १७ ॥ विषुवायन
संक्रांतिमन्वादिषु युगादिषु ॥ विहाय पिण्डनिर्वापं श्राद्धं कुर्वीत धर्मवित् ॥ १८ ॥ अन्वष्टकासु वृद्धौ च गया

पौत्रश्चये हनि कार्यं मातुः श्वश्रूकृत्वाऽद्य मातृपतिना सह ॥ १९ ॥ स्वधर्मनिरतो विप्रः श्राद्धे भोजनमर्हति ॥
वेदशास्त्रार्थवेत्ताः पितुराचारेण कर्हिचित ॥ २० ॥ यत्रवेदाश्च पोयत्र यत्र वृत्तिं द्विजाग्रणे ॥ पितृश्राद्धे पुत्रेण
त्वाद्विप्रान्विप्र संमर्च्चयेत ॥ २१ ॥ गायत्रीमात्रसारोपि वरं विप्रः सुयंत्रितः ॥ नायंत्रितश्चतुर्वेदी सर्वाशी पाप
कर्मकृत ॥ २२ ॥ तीर्थेषु ब्राह्मणं नैव परीक्षेत कदाचन ॥ अन्नार्थिनमनुप्राप्तं भोज्यं तं मनुरब्रवीत ॥ २३ ॥ वि
द्यादिगुणसंपन्नोन लभ्येत यदि द्विजः ॥ मातामहादयो ऽप्यर्चास्तदा यदिलक्षणाः ॥ २४ ॥ मातामहो ऽथ
दौहित्रो भागिनेयश्च मातुलः ॥ मातृष्वसेयस्तज्जश्च मातुलेयस्तथैव च ॥ २५ ॥ जामाता श्वशुरश्चैव भार्याभ्रा
ता च तत्सुत ॥ ऋत्विग्गुरुरुपाध्यायश्चाचार्यः श्रोत्रियस्तथा ॥ २६ ॥ कृतव्रताश्च सदाचाररताः एते श्राद्धे सुपाव
ना ॥ उराचाररायदैतस्तु स्साज्ञास्ति ऽपितदा किल ॥ २७ ॥ पुंगानुरूपातोयश्च विद्याचारादिसंयुतः ॥ नर्निग्रहक
र्म कर्त्ता चेच्छ्राद्धेनुस्मरवाऽर्हवा ॥ २८ ॥ हरेर्भक्तो यतिर्यत्र श्राद्धे तुं केतदानुतत्त ॥ परिपूर्णेन वेच्छ्राद्धं विनापि
श्राद्धमपदम् ॥ २९ ॥ योवैयतीननादृत्य भोजयेदितराद्विजान ॥ विशानन्त्यसतो ग्रामे कर्यैत द्यातिराक्षसान
३० ॥ दैवे कर्मण्युदक्संस्थान प्राङ्मुखाननुपवेशयेत ॥ उदङ्मुखान द्विजान पित्र्ये प्राक्संस्थाननुपवेशयेत ॥ ३१ ॥
द्वौ दैवे पितृकृत्ये त्रीनेकैकमुभयत्र वा ॥ भोजयेत्सुसमृद्धोऽपि न प्रसज्जेत विस्तरे ॥ ३२ ॥ सत्क्रियां देशकालौ



च शौचं ब्राह्मणसंपदम् ॥ पंचैतान्विस्तरो हन्ति तस्मात्कुर्यान्न विस्तरम् ॥ ३३ ॥ भिक्षुको ब्रह्मचारी वा भोजना
र्थमुपस्थितः ॥ उपविष्टेषु विप्रेषु कामं तमपि भोजयेत् ॥ ३४ ॥ दंतधावनं तांबूलं तैलाभ्यंगमभोजनम्
रत्यौषधपरान्नं च श्राद्धकृत्सप्त वर्जयेत् ॥ ३५ ॥ पुनर्भोजनमध्वानं भाराध्ययं मैथुनम् ॥ दानं प्रतिग्रहं होमं श्रा
द्धभुक्त्वाष्ट वर्जयेत ॥ ३६ ॥ भोक्ता स्वशिष्यन स्त्रं श्राद्धे ऽरुर्द्धरात्रौ प्रयत्नत ॥ भोजनं च व्यवायं च कृत्वा व पिवि व
र्जयेत ॥ ३७ ॥ श्राद्धं दत्वा च भुक्त्वा च पुमान्यस्तु स्त्रियं व्रजेत ॥ पितरस्तस्य तन्मासे तस्मिन्रेतसि शेरते ॥ ३८
॥ अन्नक्षीरघृतक्षौद्रैरेक्षवैन्यवतर्पिता ॥ प्राप्नुवंत्यक्षयां तृप्तिं सर्वे पितृगणा अपि ॥ ३९ ॥ कृतं त्रेतकमु
कं यत्कचित्तु कलौ युगे ॥ निषिद्धमस्ति निगमे कर्त्तव्यं तन्न कर्हिचित ॥ ४० ॥ पराशरो मुनिश्रेष्ठः प्राहाऽतः
सकलान्मुनीन ॥ अनुव्रतान्कृतव्रतादीन्मुखा यस्य स्मृतिः करोतो ॥ ४१ ॥ अन्नं क्षीरं घृतं क्षौद्रमेक्षवं कालशा
कवत ॥ एतैः कृतर्पितैर्विप्रैस्तृप्यंति पितरो नृणाम् ॥ ४२ ॥ यस्तु प्राणिवधं कृत्वा मांसेन तर्पयेत्पितृन ॥ सो ऽ
विद्वांश्चंदनं त्यक्त्वा कुर्यादंगारलेपनम् ॥ ४३ ॥ क्षिप्त्वा कूपे यथा किंचिद्बालआदातुमिच्छति ॥ पतत्यज्ञानतः
सोपि मांसेन श्राद्धकृत्तथा ॥ ४४ ॥ इति न्यवनान्निसंश्राद्धे मांसं विवर्जयेत ॥ धर्मशास्त्रमुपाश्रित्य वर्त्तमानः
सुधीः पुमान ॥ ४५ ॥ निर्दोषं पायसं तस्माद्दधि धान्यानि च द्विजः ॥ अर्पयेत्सर्वपितृभ्यस्तेन तुष्यंति ते खलु

४६॥ पयो दधि घृतं चैव गवां श्राद्धे तु पावनम्॥ महिषीणां घृतं श्रेष्ठं शार्ङ्गं नैव तु पयः क्वचित्॥ ४७॥ काञ्चनं कुतुप
संज्ञस्तु तथा नेपालकंबलः॥ रौप्यं दर्भास्तिला गावः श्राद्धे दौहित्रश्चेति पावनाः॥ ४८॥ गोत्रनाम्नी समुच्चार्य पिंडप्रक्ष
णदानादिकं चरेत्॥ सकारेणान्वितं कुर्याद्गोत्रं सर्वत्र धीमता॥ ४९॥ गोत्रस्य त्वपरिज्ञाने काश्यपं गोत्रमुच्च
रेत्॥ यस्मादाह श्रुतिः सर्वाः प्रजाः काश्यपसंभवाः॥ ५०॥ पृथिवी दर्विसिता प्रोक्तस्त्वपिता चांतरिक्षसत्॥
अभिधानापरिज्ञाने द्विविधस्तु पितामहः॥ ५१॥ विना किं भित्त्वपत्कं चित्रितान्यादिभिः प्रदीपते॥ तत्सर्वं सं
कल्पे ज्ञेयं विपरीतं निरर्थकम्॥ ५२॥ अक्षय्यासनयोः षष्ठी द्वितीयावाहने तथा॥ अन्नदाने चतुर्थी स्याच्छे
षाः संबुद्धयः स्मृताः॥ ५३॥ विसर्गे श्राद्धकर्मणि विकिरः पंक्तिवारणम्॥ करस्थं द्विरपोशानं पितृपूर्वाति
पट्टसरा॥ ५४॥ स्वागते स्वस्तिवचने गोत्रत्रोधे प्रदक्षिणे॥ अर्घे च दक्षिणादाने पहुसर्वं विधीयते॥ ५५॥
अगस्त्यं भृंगराजं च तुलसी शतपत्रिका॥ चंपकं तिलपुष्पं च पितॄणां वल्लभानि षट्॥ ५६॥ केतकीं क
रवीरं च बकुलं कदंबकं तथा॥ पाटलं चैव जातीं च श्राद्धे यत्नेन वर्जयेत्॥ ५७॥ अनग्निरधनो वापि तीर्थे च
व्यसनान्वितः॥ आमश्राद्धं द्विजः कुर्याद्वृषलस्तु सदैव हि॥ ५८॥ मृताहं च सपिंडं च गयाश्राद्धं महालयम्॥
आपन्नोऽपि न कुर्वीत श्राद्धमामेन वै द्विजः॥ ५९॥ आवाहने स्वधाकारे मंत्राश्चोत्थानविसर्जने॥ अन्यकर्म



एषामन्त्राः प्रयुज्यंते आमश्राद्धविधौ बुधैः॥ ६०॥ आमान्नस्याप्यभावे तु श्राद्धं कुर्वीत बुद्धिमान्॥ धान्याच्चतुर्गु
णेनैव हिरण्येन करोति च वा॥ ६१॥ पुत्रजन्मनि कुर्वीत श्राद्धं हेम्नैव बुद्धिमान्॥ न पक्वेन न चामेन कल्याणम
भिकामयन्॥ ६२॥ समग्रं यत्क्रतावाप्नोति कर्तुं नेन हेम्ना पार्वणम्॥ स तु संकल्पविधिना श्राद्धकाले तदान्व रे
त्॥ ६३॥ आवाहनं स्वधाशब्दमर्घ्याग्नौ करणं तथा॥ विकिरं पिंडदाने च सांकल्पे षड् विवर्जयेत्॥ ६४॥ पिंडमात्रं
प्रदातव्यं मभावे द्रव्यविप्रयोः॥ श्राद्धयाहनि संप्राप्ते भवेन्निरशनोऽपि वा॥ ६५॥ उदकुंभप्रसाद यद्वा द्वादशणा
यफलान्वितम्॥ तृणानि वा गवे दद्यान्न तु श्राद्धं दिनं नयेत्॥ ६६॥ श्राद्धपूर्वं ब्रह्मयज्ञं न कुर्यात्तर्पणं तथा॥ पित्रोः
श्राद्धान्तरं तु द्वयं कुर्वीत बुद्धवत्॥ ६७॥ महालयादिकं यश्श्राद्धं मातृर्ते वसति यो द्विजः॥ पंचमे क्षिप्रकर्तव्यं ममा
वास्यादिनेऽथवा॥ ६८॥ पुष्यनक्षत्रविद्या रेषु वापि कंमासिकानि च॥ मृताहएव कार्याणि पाकेनैव यथाविधि
॥ ६९॥ व्रतोपवासदिवसे श्राद्धमातीययाविधि॥ श्राद्धविधायी पवसे दाघ्रायपितृसेवितम्॥ ७०॥ वैष्णवैस्तु
विशेषेण श्राद्धमेकादशीभवम्॥ द्वादश्यामेव कर्तव्यं पितरौ चेद्भवायतः॥ ७१॥ संन्यासिनो श्राद्धिकादि
पुत्रः कुर्याद्यथाविधि॥ महालये तत्पश्चात्तद्द्वादश्यां पार्वणं हितत्॥ ७२॥ आमश्राद्धं तु पूर्वाह्ले एकोद्दिष्टं तु
मध्यतः॥ पार्वणं त्वपराह्णे प्रात्यातर्वृद्धिनिमित्तकम्॥ ७३॥ महारं मृतमांसेवापि चादेगोन वेत्ति सः॥ मा

र्गमाघेः यवाऽमायां श्राद्धमाह्निकमाचरेत् ॥७४॥ यज्ञोद्वाहप्रतिष्ठासु मेखलाबंधमोक्षयोः ॥ निषेकादौ
चदीक्षायां वृद्धिश्राद्धं समाचरेत् ॥७५॥ वृद्धो तीर्थं च संन्यस्तं तातं च पतितं सति ॥ येभ्य एव पिता दद्यात्तेभ्यो
दद्यात्स्वयं सुतः ॥७६॥ अर्घ्यमावाहनं चैव द्विजांगुष्ठनिवेशनम् ॥ तर्पिते श्राद्धं विकिरं तीर्थे श्राद्धे विवर्ज
येत् ॥७७॥ श्राद्धेष्वेतेषु सर्वेषु प्राप्तास्वपि च योद्विजः ॥ भोजनीयाः प्रयत्नेन यत्पापाच्छ्राद्धसपूर्णता ॥७८॥ ब्रह्मचा
रीस्वपित्रोस्तु कुर्यादेवौर्ध्वदेहिकम् ॥ मासिकाब्दिकार्ये श्राद्धं सर्वं यथाविधि ॥७९॥ संन्यासी तु न कुर्वी
त मातापित्रोरपि क्वचित् ॥ मृतानां चैव चान्येषां तथा श्राद्धं पिंडोदकक्रियाम् ॥८०॥ स्वाधिकारानुसारेण यथा
शक्तिसदैवताम् ॥ नार्चयेद्यः पितृन्काले स पतेन्नरकेध्रुवम् ॥८१॥ आरोग्यः प्रकृतिस्थश्च चिरायुः पुत्र
पौत्रवान् ॥ अर्थवाननर्थभोगी च श्राद्धकर्ता भवेन्नरः ॥८२॥ कुसंततिपितरश्चेति तत्वामनसि योनरः ॥ श्राद्धं न क
रुते तस्य रक्तं कुर्वन्ति पिबंति ते ॥८३॥ यथा गोषु मनष्टासु वत्सो विंदति मातरम् ॥ एवं श्राद्धान्नमुद्दिष्टं मंत्रः प्राप
यते पितृन् ॥८४॥ देवो यदि पिता जातः शुभकर्मानुयोगतः ॥ तस्यान्नममृतं भूत्वा नं तत्रोपतिष्ठति ॥८५
मर्त्यत्वे भोजरूपेण पशुत्वे च तृणं भवेत् ॥ श्राद्धान्नं वायुरूपेण नागत्वे प्यनुगच्छति ॥८६॥ न तद्दत्तं ये वेत्यं श्राद्ध
अंसर्व योनिषु ॥ प्राप्नुते प्राणिभिस्तस्मात्श्राद्धं कार्यं प्रयत्नतः ॥८७॥ इत्येव दैवतमथा समासाच्छ्राद्धस्य म



वोपि विधिर्यथावत् ॥ प्रकीर्तितोऽथ वर्णिगणे सृतेषु धर्मेषु वक्ष्ये कलिवर्ज्यधर्मान् ॥८८॥ इति श्री सत्संगिजीव
ने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे श्राद्धविधिनिरूपणनामा विंश ध्यायः ॥२१॥
श्रीनारायणमुनिरुवाच ॥ धर्माः स्त्रीणां च पुंसां च धर्मशास्त्रेषु भूरिशः ॥ विस्तराद्वर्णितास्संति वर्णाश्रमव
तां पृथक् ॥१॥ युगानुसारिणस्तत्र धर्मास्त्याज्या न चेतरे ॥ भीष्मोऽत्र भारते प्राह युधिष्ठिरमिदं वचः ॥२॥ अन्ये
कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे ॥ अन्ये कलियुगे धर्मा यथाशक्तिकृता हि ते ॥३॥ सामान्य धर्मान्कलियु
गे कतिचित्तेवदाम्यहम् ॥ ये निषिद्धाः पुराणेषु स्मृतिष्वपि च सर्वथा ॥४॥ गोमेधो नरमेधश्च वाजिमेधस्त
थामखः ॥ मद्यपानं सुरापानं सात्म्यमाहुः कलौ युगे ॥५॥ सौत्रामणामपि मखे प्राणेनापि सुराग्रहः ॥ देवा
तिथिवरार्थं च नैव कार्यः पशोर्वधः ॥६॥ मांसदानं पितृभ्यश्च श्राद्धे कार्यं न कर्हिचित् ॥ अग्निहोत्रं च सं
न्यासो न कर्तव्यस्तथा कलौ ॥७॥ क्षतानां द्विजकन्यानामक्षतानां मृते पतौ ॥ पुनर्विवाहकर्मापि न कर्तव्यं क
लौ युगे ॥८॥ न धार्यश्चाबुपानार्थं मृत्तिकायाः कमंडलुः ॥ कृतार्थं भ्रातृजायायां न नियोगश्च देवरः ॥९॥ गृह
कर्मं यथाशास्त्रं योन पालयितुं क्षमः ॥ दीर्घकालं ब्रह्मचर्यं तेन क्वचित् ॥१०॥ देहपातो न वैराग्ये न प्रायश्चित्तं
तुनारशाम् ॥ वानप्रस्थाश्रमश्चापि वर्जनीयः कलौ युगे ॥११॥ आततायि द्विजवधो धर्मयुद्धेपि कर्हिचित्

॥स॰जी॰पं॰५॥ न कर्तव्यस्तथा पत्नी यत्र स्यात्पशुहिंसनम् ॥ १२ ॥ स्वार्थमपि वा देवकीर्त्यां पुंसा च कर्हिचित ॥ न कार्योऽग्नि अ॰२२॥
॥४६॥ प्रवेशश्च भृगुपातस्तथैव च ॥ १३ ॥ महाप्रस्थानगमनं नैव कार्यं हि मानवेन ॥ गंगादिप्रवाहेष्वपि कापि निजं
वपुः ॥ १४ ॥ पञ्चाग्निं च महापापे कृच्छ्रं चित्तेऽपि निष्कृतिः ॥ जपाद्येस्तस्य कर्तव्यान्युपायेन न तु कर्हिचित ॥ १५ ॥
अपवादे दुःसहे च प्राप्ते संभाविते न तु ॥ हन्तव्यं स्वीयं मनुष्येण न तु नाशयं निजवपुः ॥ १६ ॥ तथा स्यात्तु मरणाशक्ते
न गम्यं देशान्तरं दुर्गमम् ॥ न तु कार्यो ह्यात्मघातः पुरुषेणापि योषिता ॥ १७ ॥ दिनत्रये व्यतीतेऽपि धान्यादिप्राप्ति
मन्तरा ॥ चौर्यं तु नैव कर्तव्यं पुरुषेण कलौ युगे ॥ १८ ॥ पितृष्वसृश्वशुरतनयां मातुलस्य सुतां तथा ॥ अस्ववर्णस
स्य कन्यां च नैवोद्वाहयेत्कदाचन ॥ १९ ॥ घृतपक्वं पयःपक्वं कंडुपक्वं च शूद्रतः ॥ नैव ग्राह्यं ब्राह्मणेन सदाचा
रतोऽपि ॥ २० ॥ शिष्येणागुरुपत्नीं च नैव कार्यं गुरोरिव ॥ संन्यासिभिर्न कर्तव्यं चातुर्वर्ण्ये च भिक्षणम् ॥ २१ ॥ गु
रवे दक्षिणा देया शक्त्या न तु न दीक्षिता ॥ अग्निर्णपीत शिष्टाभिः कार्यं नाचमनं तथा ॥ २२ ॥ स्वाशौचस्य न
संकोचो वेदादिगुणयोगतः ॥ कार्यो गयेऽपि च यत्नाद्धर्मं गयस्य शब्दिश्च न कर्हिचित ॥ २३ ॥ इत्यादयः कलियुगे धर्मा
वर्ज्या नयोदिताः ॥ एषां तु विधिवाक्यानि युगान्तरपराणि हि ॥ २४ ॥ तत्राग्निहोत्रसंन्यासौ हि नानां द्विजसत्तमः
धार्मिकाणां विरक्तानां शक्तानां विहितावपि ॥ २५ ॥ वर्णाश्रमविभागः स्याद्यावद्वेदश्च भूतले भवेत्तावत्क ॥४६॥

लौ शास्त्रे दृश्यमेतद्दर्शितम् ॥ धर्मपालनसामर्थ्यं वैराग्यं यथास्य चोत्कम् ॥ तस्मात्तस्मान्निषिद्धं वै सर्वं चैतन्नम
शार्थिभिः ॥ २७ ॥ गृहस्थधर्मास्त्वेते मया सर्वे समासतः ॥ कथितास्ते द्विजश्रेष्ठ पालनीयाः प्रयत्नतः ॥ २८ ॥
गृहस्थेष्वपि येऽन्त्यं मुमुक्षोः क्षणधर्मवेत्ता नाः ॥ स्थितागुरुपदे तेषां धर्माः सामान्यतस्त्विमे ॥ २९ ॥ विशेषध
र्मो यस्तेषां तं च तुभ्यं वदाम्यहम् ॥ कुमानिवेदीतं यत्र पात्राद्युपत्तं च नैव किंचन ॥ ३० ॥ सर्वे ये गृहिणस्त्यागाः स
धवा अपि ताः स्त्रियः ॥ न स्पृश्या नैव भाष्यास्ता नोपदेश्याश्च कर्हिचित ॥ ३१ ॥ विधवापाक्षसंसर्गत्यागः सामान्य
तोऽस्ति हि ॥ विशेषधर्म एतावांस्तेषां द्विजोत्तम ॥ ३२ ॥ राज्ञो गृहस्थाश्रमिणो ये धर्मास्त्विशेषास्तांस्ते
कथयामि सर्वान् ॥ याना श्रितो भूपतिरत्र लोके परत्र चाप्नोति यशश्च मोक्षम् ॥ ३३ ॥ इति श्री सत्संगिजीवने
नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे कलिवर्ज्यधर्मनिरूपणनामैकविंशोऽध्यायः ॥ २१ ॥
श्रीनारायणमुनिरुवाच ॥ नृपासनस्थो राजन्यो नित्यं जयति प्रभोः ॥ धर्मेणायं स एवोक्तो राजेत्यन्वर्थसंज्ञया
॥ १ ॥ देवब्राह्मणभक्तश्च सत्यवादी जितेन्द्रियः ॥ बहुप्रदः प्रसन्नात्मा धर्मनिष्ठो भवेन्नृपः ॥ २ ॥ नातितीक्ष्णो ना
तिमृदुर्भवेद्राजा विचक्षणः ॥ वासं तां करवर्षीमाव्य मानां हितकारकम् ॥ ३ ॥ मृदुर्हि राजा सततं लंघ्यो भवति
मानवैः ॥ तीक्ष्णाच्चोद्विजते लोकः समवृत्तिस्ततो भवेत् ॥ ४ ॥ परीक्षेत नरान्राजा लोभान्पर्शंश्च चापि लक्षणैः ॥ ५ ॥ प

प्रेक्षणानुमानेनतर्थोपमागमैः सदा॥५॥ मृगयाक्षादिस्त्रः परीवादामदस्त्रियः॥ तौर्यत्रिकंकृथाटनंपेशु 
न्यंद्रोहसाहसे॥६॥ वाग्दंडयोश्चपारुष्ये ईर्ष्यासूयार्थदूषणम्॥ त्यजेद्दशदशैतानित्यमनानिस्पृहोर्थवि
त॥७॥ गणाः काममन्याद्यानिद्राण्मान्यश्चकोपजः॥ उभौगणौनिरपेक्षौहात्वासम्मेलनेतयो॥८॥ नाप्रियाणिस्त
प्रियंस्त्रत्काकुर्यात्कर्मेदृतिंतथा॥ राजातथाजेककदृतिंकुर्यात्स्कात्मनःप्रियम्॥९॥ परिहासःपरिजनैःका
र्योराजाननबैन्नराम्॥ अतिसंश्लेषतोयस्मान्मर्यादामुत्सर्जतिते॥१०॥ नतिष्ठतिनिजस्थानेकुर्वस्तुन्वैवदंति
॥विकल्पेनेप्रेम्णास्तत्वोजंघयंसपि॥११॥ स्त्रीरक्षिभिः प्रसज्जंतेनेवहंतेनिर्स्थियंपुरं॥ समानवेषान्नृपते
रभिरोहंतिवाहनम्॥१२॥ बहुनात्रकिमुक्तेनसभायामपिन्नृपतिम्॥ तिरस्कुर्वतिसावंज्ञंनिर्वलानीडयं
तिच॥१३॥ तस्मान्नदृश्योरराज्ञाभवेदुन्नित्तमाचरेत्॥ निस्तीयुतोभवेदीरः शत्रुणांभयवर्द्धनः॥१४॥ स्वाम्य
मात्यसुहृत्कोशराष्ट्रदुर्गबलानिच॥ राज्यांगानिप्रकृतयस्ततोहोस्याधारेकशिक्षयेत्॥१५॥ करार्थंपरधान्यादि
नाशोदुर्गाद्दिनायथा॥ तस्मात्तथाचरेद्राजादेयंकालेचदापयेत्॥१६॥ सत्यान्वेकस्यबेत्काचित्रशास्त्रानुगत
निश्चयः॥ पुरुषार्थानसंबाधसेवेतजितरुद्रनृपः॥१७॥ वर्णाश्रमाणोयेधर्मारक्षितव्याःप्रयत्नतः॥ सर्वत्र
क्षिप्रसम्नेनपरिहार्द्रमकुर्वता॥१८॥ दृढीभूतगजाश्वादियुद्धभूमौश्वजक्षणोः॥ जानीयाच्चतुरंगपात्राकाजाय 

नोस्तथापदि॥१९॥ संधिविग्रहस्थानानिद्वैधीभावःसमाश्रयः॥ स्थानंचेतिगुणाःषट्चकुर्यात्तन्निश्चयंस्व
यम्॥२०॥ शृणुयाद्धर्मशास्त्राणिपुराणानिचनित्यशः॥ स्वपक्षेपरपक्षेचचारांस्तीर्थेषुयोजयेत्॥२१॥
चमूपतिर्द्वारपालःप्रदेष्टांतःपुराधिपः॥ कारागाराधिकारीचद्रव्यार्थयोजकः॥२२॥ कोशाध्यक्षःपु
राध्यक्षःकार्यनिर्माणकृत्तथा॥ धर्माध्यक्षःसमाध्यक्षोदंडपालश्चराष्ट्रपः॥२३॥ दुर्गपालोटवीपालस्ती
र्थानिदशपंचच॥ रक्षेत्स्वपक्षेशत्रूणांचारैर्योबुद्धिमान्नृपः॥२४॥ परपक्षेतथामंत्रियुवराजपुरोहितैः
सहितैश्चैषुतीर्थेषुचारान्संदाप्तियोजयेत्॥२५॥ अमात्यराष्ट्रदुर्गाणिकोशोदंडश्चपंचमः॥ इतिस्वपक्षेमंत्रा
दिविज्ञेयंप्रकृतिपंचकम्॥२६॥ एतस्मिन्द्वाकेवर्गेस्थानंवृद्धिक्षयंतथा॥ निश्चित्यैवोद्यमंकुर्यात्प्रतिपक्षजयायच
च॥२७॥ उपासीतसदावृद्धान्सतांवृत्तेस्थितिनृपः॥ अजोनुपश्चात्सचक्षुःस्मितपूर्वाभिभाषिता॥२८॥ भवेद्भर्त्तांचा
भृतानामन्वीक्षेतभृतानपि॥ स्वयंप्रहर्त्तादातानुविशुद्धात्माश्रवान्भवेत्॥२९॥ सर्वाभिशंकीक्रोधीचयश्चसर्व
हरोनृपः॥ सक्षिप्रमनुजुर्लुब्धःस्वजनैनेवबध्यते॥३०॥ आरोग्याः कुलीनांश्चभक्तानुशूरान्विवेकिनः॥ अ
प्रतार्यान्स्थिरैःशिष्टान्मानिनोमानदांस्तथा॥३१॥ विद्याविदोलोकविदःपरलोकविदोबुधान्॥ स्वधर्मनिष्ठा
न्कुर्वीतसहायान्सपतिःशुचिन्॥३२॥ तेश्चतुल्योभवेद्योगैश्चत्रातासौमितलोऽधिकः॥ प्रतपक्षंवापरोक्षंपक्षंस्वं

॥स-जी-पं०॥ स्तेपुनस्तिष्ठति ॥ ३३ ॥ कैतवानां च गीणो नामवेक्ष्यो नैव सीदताम् ॥ नित्योत्थानं च कुर्वीत सेवां बुद्धिमतां म ॥अ०२२॥
॥४८॥ पि ॥ ३४ ॥ क्षिप्रकारी कृतसादो गंभीरश्च महामनाः ॥ निःशंकं पालयेद्राजा प्रजाः पुत्रानिवौरसान् ॥ ३५ ॥ अगृ
दंडिनवा हृष्टानि र्नयाधार्मिकाः प्रजाः ॥ यस्य राज्ये न वेवुध्यु स राजा राज्यमर्हति ॥ ३६ ॥ प्रजानां रक्षणं राज्ञः पर
मो धर्म उच्यते ॥ कृत्कृतस्य चतुर्थांशं तासां तेनैव विंदति ॥ ३७ ॥ धर्माणां विप्लवे जाते निर्मितो विष्णुना भुवि
पुरा राजा वतस्तेन कर्त्तव्यं धर्मपालनम् ॥ ३८ ॥ अधार्मिकान्दंडयित्वा धृत्वा हत्वा च तस्करान् ॥ धर्ममार्गे स्थाप
नीयाभीषयित्वा प्रजा नित्यशः ॥ ३९ ॥ दंड्यान दंडयन् स्वसनीतिज्ञा स्त्रास्यम्यग्विदित्वा यथपार्हमेव ॥ वेदेषु तु
वैचरितेनिदध्याद्दंडार्हेन दंडनं यातु नैव ॥ ४० ॥ इति श्री मर्कं गि जीवनेनारायणान्वशिते धर्मशास्त्रे पंचमप्र
करणे धर्मोपदेशो राजधर्मप्रशस्त्रास्मनादिनिरूपणं नामद्वाविंशोऽध्यायः ॥ २२ ॥ श्रीनारायणमुनिरु
वाच ॥ नास्तिक्यमनृतं क्रोधं प्रमादं दीर्घसूत्रताम् ॥ अदर्शनं ज्ञानवतामालस्यं पंचवृत्तिताम् ॥ १ ॥ एकचिंत
नमर्थानामनर्थज्ञैश्च चिंतनम् ॥ निश्चितानामनारंभं मंत्रस्यापरिरक्षणम् ॥ २ ॥ मंगलाद्यप्रयोगं च प्रत्युत्थानं च
सर्वशः ॥ एतां स्त्यजेत्प्रयत्नेन राजा दोषांश्चतुर्दश ॥ ३ ॥ बालेन स्थविरेणापि नीरुणा दीर्घरोगिणा ॥ जातिस्य
केनु लुब्धेन तथा लुब्धेजितेन च ॥ ४ ॥ विरक्तेन भयकृता विपणास तस्तचेतसा ॥ अनेक चित्त संचेण देवब्रा ॥४८॥

णगर्हिणा ॥ ५ ॥ देवोपहतकेनापि देवचिंतापरेण च ॥ दुर्भिक्षव्यसनार्त्तेन वसनिनातथा ॥ ६ ॥ स्वधर्मविही
नाम्यामदेशस्थं नरेंद्रभिना ॥ विज्ञात्वा पुरुषैरेतैर्नृपः संधिन चाचरेत् ॥ ७ ॥ कुर्यान्मंत्रंनप ह्रुर्णस्य पेशामदर्थ
मिश्रि ॥ बालेसमुत्सृत्तेनुत्थाय मंत्रमाजोचयेत्कयम् ॥ ८ ॥ कुमारा स्त्रैव योधारः श्रिक्षणीयाः स्वकंपंकृतिः ॥ महर्षि
स्थापि मुर्ख्याणां कीणीयादेकं पंडितम् ॥ ९ ॥ सदा विनयसंपन्नः कुलपुत्रो वहुश्रुतः ॥ अनसूयुरसंकीर्णो
राज्ञा कार्यः पुरोहितः ॥ १० ॥ त्रयैवांगेषु निष्णातं ज्योतिषः प्रतिपादकम् ॥ उत्पातेषु च सर्वेषु कुर्यादैवज्ञमुत्तमम्
११ ॥ राज्ञो वैद्यश्च निपुणो भवेद्विद्वयोधिकः ॥ अष्टांगायां चिकित्सायां कुशलश्चानुरागवान् ॥ १२ ॥ देवंच
मानुषं वुध्वा पंच पंचविधंनयम् ॥ शत्रोः पराजये हेतु नयौ यावौ समाचरेत ॥ १३ ॥ अपकृत्स्नुमुखैभ्यः पर
राष्ट्रंत्यान्नृपः ॥ उपजप्यान्मानिरत्या भिभेदीयेवयथोचितम् ॥ १४ ॥ जितेंद्रियः स्वमात्मानमादौ जित्वा ततो
रिपून् ॥ जेतुं समिच्छेन्नृपतिः प्रमत्तान जितेंद्रियान् ॥ १५ ॥ परराष्ट्रे उवेत्तमुष्टिं ज्ञात्वा जेतुमुपक्रमेत ॥ स्वभोज्यवस्त्र
गंधादीनि स्त्युस्तै रक्षयेन्नरैः ॥ १६ ॥ कोशं कोष्ठागारं चेव हारमायंतयायुधम् ॥ रक्षयेत्कृतकल्याणैर्निजभ
क्तैर्नरैर्नृपः ॥ १७ ॥ आत्मांतरे स्त्रीवातो ज्योरक्षेत्स्वं च सुधीः सदा ॥ पुत्रामात्यादितस्तांश्च रक्षन्सर्वान्नियत्नत्य
॥ १८ ॥ स्वनिक्षसास्यदुर्भिक्षेऽपि संपूरयेद्यथम् ॥ आयेकृद्धिविपादंश्च कोशानिःशोषयेन्नतु ॥ १९ ॥ जातीन्नृ

॥स॰नी॰पं॰ घान् गुरूंल्लाभवणिजः शिल्पिनः स्थितान् ॥ अनीक्ष्या मनुजेन्द्रस्तु स्थापयेद्धनधान्येन दुर्गतान् ॥ २० ॥ हितकामाः ॥स॰२३॥
॥४९॥ स्त्रिपात्रीदानस्तयावाक्यात्कचित्नृपः ॥ स्थापयेन्नाधिकारान्तु विनातद्दोषदर्शनम् ॥ २१ ॥ धर्मकृते बुध
र्मज्ञान पुरुषेषु पंडितामू ॥ स्त्री पुत्रकौ चान्नियुंजीत नीचान्नीचेषु कर्मसु ॥ २२ ॥ लुब्धान्मूर्खांश्च पुरुषान्का
मेऽर्थे च न योजयेत् ॥ अलुब्धान्बुद्धिसंपन्नान्सर्वकार्येषु योजयेत् ॥ २३ ॥ मूर्खो लुब्धि कृतोऽर्थेषु कार्या
णाम विशारदः ॥ प्रज्ञाः क्लिश्नात्युपायेन कामक्रोधसमन्वितः ॥ २४ ॥ संध्यामुपास्य मृगयायां न्निशि चारी दि
ते रहः ॥ परराष्ट्रजनं चापि कुर्वीत स वशे बुधः ॥ २५ ॥ अर्थेन लुब्धं मानेन स्तब्धं भीरुं भयेन च ॥ यायात्तथ्ये
न विद्वांसं वशी कुर्यात्तु योचितम् ॥ २६ ॥ यस्मिन्देशे य आचारो व्यवहारः कुलस्थितिः ॥ तथैव च परिपाल्यो
सौ परराष्ट्रे वशं गते ॥ २७ ॥ वृहंति तत्तडागानि सर्वदेयोदकानि च ॥ स्वराष्ट्रे तत्र तत्राग्र्यनागशो विनिवेशये
त् ॥ २८ ॥ प्रतिग्रामं कृतप्रज्ञा मंत्रपंचस्वनुष्ठितान् ॥ संहतकर्म कुर्वाणान् शूरान्संस्थापयेत्तथा ॥ २९ ॥ यो यांश्च
ग्रामवक्तुर्यान्ग्रामान्नगरवत्तथा ॥ क्रमेण दुर्गं गृह्णीयाद्धोषादीनां नृपः स्वयम् ॥ ३० ॥ क्रियः करक्षिताः कुर्या
त्तां लपेता श्रुतदक्ष ॥ नश्रद्ध्यात्तु नब्रूयाद्रहस्यं न सुरक्क चित् ॥ ३१ ॥ आत्मनश्च परिवांच परीक्षात्रवजाबज
म् ॥ अश्वो संधाय कर्माणि सेवेतन्नृपतिपरैः ॥ ३२ ॥ साधानत्त्यर्थं येनार्यानारभेतमहीश्यान् ॥ कुर्यादिविग्रंवे ॥४९॥

श्यादेर्न कुर्यात्कोश हानि कृत ॥ ३३ ॥ कुर्यात्सर्वाणि दुर्गाणि धनधान्यायुधोदकैः ॥ यंत्रैश्च परिपूर्णानि तथा
शिल्पि धनुर्धरैः ॥ ३४ ॥ नित्यं दृष्टश्च शूरश्च मतिमान्धृतिमाञ्छुचिः ॥ कुलीनश्चानुरक्तश्च कार्यः सेनापतिस्त
था ॥ ३५ ॥ कृत्वा पुरुषकारेण लोकं कर्मसमागतम् ॥ मानयेत्तान्मानाभ्याद धाच्चाधिकेवेतमम् ॥ ३६ ॥ तत्
था विद्याविनीतांश्च शास्त्रशिल्पविशारदान् ॥ यथार्हं वित्तवस्त्राद्यैर्मानयेत्तु तु शेन्नृपः ॥ ३७ ॥ परराष्ट्रे स्था
पनीया बुद्धियुक्ति विचक्षणः ॥ तत्र सवृत्तज्ञानार्थं दद्यात्तद्वेत्तन्नैरहः ॥ ३८ ॥ दृष्टदुष्टान्क्रियं पत्तिर्न निगृह्य स्था
पयेन्नृपः ॥ यथेष्टाचरणायैनं न जोभाद्धिसूमेत्क चित् ॥ ३९ ॥ आदौ दरिद्रं पश्चात्तुं देवात्स्यात्स धनं जन्मम् ॥
मिथ्यापवादैर्नौदुष्टे द्दलेनं स्मादितश्च तम् ॥ ४० ॥ द्दराद्व्याप्यते भ्य स्त्रवणि भ्योलोभकारणात् ॥ कारं यथाक्र
मात्त्याद्धक्षेवेत्तान्मूल्कजीवित ॥ ४१ ॥ नित्यं धर्मार्थविज्ञानां वृद्धानामपुपाद्वचः ॥ पुरुषं कृतकर्माणां सङ्गं
भार्यास्कृवीत च ॥ ४२ ॥ द्व्योपकरणं पत्रं सर्वदा सर्वशिल्पिनाम् ॥ चातुर्मास्यां वरं सम्यक्प्रयच्छेन्नियतं नृ
प ॥ ४३ ॥ रक्षोग्नि व्याघ्ररुक्सर्पभयाद्राष्ट्रं च पालयेत् ॥ पितौं वचौ धान्मूकांश्च यंगान्यंगश्च पालयेत् ॥ ४४
॥ त्साज्यास्त्वनर्थाः पहुत्ता विज्ञेयेण स्कबुद्धिना ॥ मिहाजस्यं न पंकीधो मार्दवं दीर्घसूत्रता ॥ ४५ ॥ अप्येतत्त्वं
नीतिशास्त्रमादौ राज्ञो प्रयत्नतः ॥ नंदिता ह्यानक्षणात्तस्माज्जक्षणं च वदामि ते ॥ ४६ ॥ इतिहासपुराणेलोमाय

चिद्धर्मतत्त्ववित्त ॥ षडंगवेदविद्भक्तो गम्भीरो बुद्धिमान्कविः ॥ ४७ ॥ परावरविभागज्ञो नीतिज्ञः स्मृतिमांस्त
था ॥ प्रमाणैर्धर्मकामार्थमोक्षाणांकृतनिश्चयः ॥ ४८ ॥ भूगोलतत्त्ववित्संधिविग्रहादिविभागवित् ॥ उक्तशे
तरवक्तात्र वदतोपि बृहस्पतेः ॥ ४९ ॥ एकैकसंयोगनानात्वेषमवायेविशारदः ॥ पंचावयववाक्यस्यनिष्णा
तोगुणदोषयोः ॥ ५० ॥ सांख्येयोगेचगांधर्वशास्त्रेयुद्धक्रियास्वपि ॥ निष्णातोयोधनुर्वेदेसराज्ञोऽध्यापको
भवेत् ॥ ५१ ॥ एवंविधात्तुविदुषो राजाऽधीयीत यत्नतः ॥ धनुर्वेदं नीतिशास्त्रं शास्त्राण्यन्यान्यपि स्वयम् ॥ ५
२ ॥ हस्त्यश्वरथसूत्राणि यंत्रं च सर्वशः ॥ प्रयोगं सापसंहारमस्त्राणां च यथाविधि ॥ ५३ ॥ अध्यापकं वसुवि
धैर्वसनैश्चरत्नैः यानैः सदाभरणैः रौप्यकम्कुंडकाभिः ॥ नानाविधोपकारणैः रुचिरैश्च हेमैः संप्रीणये
द्विजनृपः शुभवेश्मनाच ॥ ५४ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोप
देशे राजधर्मेषु चतुर्दशविद्यादिनिरूपणनामा त्रयोविंशोऽध्यायः ॥ २३ ॥ श्रीनारायणमुनिरुवाच ॥ धर्मो
यशस्करो राज्ञां धर्मः स्वर्गप्रदस्तथा ॥ धर्मेणैव जयेच्छत्रून् ततो धर्मरतो भवेत् ॥ १ ॥ वित्तं देशं च पात्रं च म
हायाः कालकर्मणी ॥ षड्गुणं राजनीत्या भवेत्तद्धर्ममाचरेत् ॥ २ ॥ धर्मकामार्थमोक्षाणां विद्या विद्याश्च पा
र्थिवः ॥ त्रयीवार्त्तादंडनीतिस्तुर्या मान्वीक्षिकी तथा ॥ ३ ॥ उपायांश्चतुरः साम वेदं दानं च निग्रहम् ॥ पयो

वित्तं च प्रयुंजीत पंचमं चापुपेक्षणम् ॥ ४ ॥ हीनमध्योत्तमान्संधीन्मीलक्या रथनयद्वैः ॥ विद्यादर्थं जयं ध
र्मं जयं चासुरमित्यपि ॥ ५ ॥ रथा नागा हयाः पत्तिर्विष्टिर्नौचराश्चरास्तथा ॥ देशिकाश्चेति जानीयात्स्वकात्रं
वेदमष्टधा ॥ ६ ॥ वस्त्रे चान्ने परकृते विषयोगं च लक्षणैः ॥ जानीयादभिचारं च दंडमप्रकटं त्रिधा ॥ ७ ॥ मूढन
क्षत्राध्वगुणान्विद्याद्भूमिगुणान्नृपः ॥ मंत्रयंत्रादिना चात्मरक्षणं कुरु कौशलम् ॥ ८ ॥ गारुडं माकरं क्रौं
चं च कूर्मं सूचीमूर्धं महत् ॥ वज्रं च सर्वतोभद्रं मर्दं चेद्र्च शाकटम् ॥ ९ ॥ शृंगाटकादीनित्याविद्याद्व्यूहानि
सर्वशः ॥ संचाकारयेत्स्वसैन्यानि तथैव च नृपोत्तमः ॥ १० ॥ भूमागगाजिनां पुष्टियोगान्विद्याच्च शास्त्रतः
रथनिर्माणादिशिल्पं विद्याच्च युद्धलक्षणम् ॥ ११ ॥ उत्साहादिगुणान्सैन्यशौर्याहनपरीक्षणे ॥ शत्रुं मित्र
मुदासीनं विद्यात्तांश्च लक्षणैः ॥ १२ ॥ बलोन्मूलनरीतिं च प्रयोगं चास्त्रशस्त्रयोः ॥ देशग्रामकुलानां च
धर्मान्विद्याच्च वैदिकान् ॥ १३ ॥ तथा राज्ञो द्वादशानां विद्यान्मंडलसंस्थितिम् ॥ अपराधो चित्तं दंडं जानी
याद्धर्मशास्त्रतः ॥ १४ ॥ धनुर्वेदं नीतिशास्त्रं चाधीयन्नृपतिः स्वधीः ॥ एवमादि विदित्वाऽरीन्जित्वा धर्मंवि
वर्द्धयेत् ॥ १५ ॥ साम्ना दानेन भेदेन सबुद्धा वशयेद्रिपून् ॥ कालेनाप्यतिदीर्घेण सद्यो युद्धं तु नाचरेत् ॥
१६ ॥ वशी भवेयुश्चेन्नैव त्रिभिः सामादिभिर्द्विषः ॥ तदा युद्धं प्रकुर्वीत राजा धर्मेण निर्भयः ॥ १७ ॥ यदि यु

॥स॰जी॰पं॰ दिग्गताः स्युस्तेन राज्ञोन्तर्हि धार्मिकः ॥ वशीकृते महीपाले तदधीने भवेद्धस्य यम् ॥ १९ ॥ युक्त्याबुद्धिब अ॰२४॥
॥५१॥ लेनापि गृहिताः शत्रवो यदि ॥ युद्धे तदा तानानीय स्थानी यस्था परे दंघनाजे पि ॥ २० ॥ दद्यात्तेभ्यो न्नवस्त्रा
णि याव ल्लीवे न्नृपोत्तमः ॥ शत्रवो प्यतिस्थं ते गोभी वैरी कृता यतः ॥ २१ ॥ निगृहीतान्धातयति क्रूरक
र्मा नृपस्तु यः ॥ सब्रसहस्रादिम हापातकैर्युज्यते किल ॥ २२ ॥ यस्तु राजा बुद्धिहीनः सामादीन्नप्रविहा
य च ॥ निर्दयं युद्धपरस्तस्य क्षीयंते सञ्चरा दयः ॥ २३ ॥ कोशश्च नाशमायाति जायते देन्य भाक्ततः ॥ तस्य
च तिस्लेनीन रूपेणत्नन्नकुर्वीत साहसम् ॥ २३ ॥ स्ववित्तस्य तृतीयांशं जीवनाय प्रकल्पयेत् ॥ भागद्वयं तु ध
र्मार्थं मनिस्यं जनवित्तयत्नतः ॥ २४ ॥ धर्मेण पालयेद्राजा प्रजाः श्रीजिन रंजयन् ॥ अदंड्यान्दंडयेन्नैव दंड्याह्यं
न्दंडयेत्ततः ॥ २५ ॥ अनयाः संप्रवर्त्तेरन्भवे देव र्णसंकरः ॥ दुर्भिक्षमादि शीघ्रं यदि राजा न पालये
त् ॥ २६ ॥ असंरक्षन्नयमा राजा यो गृह्णाति करं नितम् ॥ पुजानां ग्राम जेभ्रक्ते स्वपुण्यं च नहातिसः ॥ २७ ॥ आद
दीत करं राजा त्रम्यो धर्मस्य दर्शनः ॥ षड्भागं स दा त्राजस्तांसामेवाभिगुप्तये ॥ २८ ॥ मनीजयंपुरा राजा त
तीजे या श्वत्रजव ॥ जितेंद्रियो हि नृपतिर्बाधितुं शक्नुयात्परान् ॥ २९ ॥ विदवेदांगविद्याप्रभृमीतिज्ञो विप्रमु
ञ्चकिमाम् ॥ दानशीलो यज्ञशीलस्तपस्वी च भवेन्नृपः ॥ ३० ॥ कृतकार्यामरिजनान्धनैर्वस्त्रैश्च पूजयेत् ॥ गु ॥५१॥

संप्रजाः पीड्यतोऽमात्यादीश्च नियंत्रयेत् ॥ ३१ ॥ प्रवर्त्तयेन्नृपो धर्मो यं तं जीको नुवर्त्तयेत् ॥ न कालस्य बलं
राज्ञि राजा कालस्य कारणम् ॥ ३२ ॥ कृतं त्रेता द्वापरं च कलिश्चेति युगानि यत् ॥ राजवृत्तानि वर्त्तेपु रा
जैव युगमुच्यते ॥ ३३ ॥ राजमूलाऽहि प्रोक्ता योगक्षेम कृन्नृपयः ॥ प्रजास्तु व्याधयश्चैव मरणं च भयानि
च ॥ ३४ ॥ यदकृकुरुते पापमरक्षन्भयतः प्रजाः ॥ राजा वर्षसहस्रं तत्फलं भुंक्ते यमालये ॥ ३५ ॥ यस्त्का
कुरुते धर्मं प्रजा धर्मेण पालयन् ॥ दशवर्षसहस्राणि तस्य भुंक्ते फलं दिवि ॥ ३६ ॥ यं हि धर्मं चरंतीह प्रजा
राज्ञा करक्षिताः ॥ चतुर्थं तस्य धर्मस्य भागं राजा संविदते ॥ ३७ ॥ प्रजा हर्तुमशक्य यद्धनं चौरैर्हृतं नृणा
म् ॥ तत्स्वकोशात्प्रदातव्यं नृपेणैवोपजीविनाम् ॥ ३८ ॥ यो राजकोषं न नृपतमाचक्षीत हितेच्छया ॥ श्रोतव्यं
तस्य च रहो रक्ष्यश्चामात्यतोपि सः ॥ ३९ ॥ आततायिघातिनो दांतान्दक्षा चश्शूरान्कुश्रुतान् ॥ कुलीनान्स
त्ससंपन्नानमात्यान्नयेत्सर्वस्य ॥ ४० ॥ कृपणानाथवृद्धानां विधवानां च योषिताम् ॥ योगक्षेमं च वृत्तिं च राजा नि
त्यं प्रकल्पयेत् ॥ ४१ ॥ आश्रमेषु त्रसाविदांश्चैव भोजनभोजनम् ॥ सदैवीया हारे राजा सत्कृत्याभ्यर्च्य निःस्पृह
तः ॥ ४२ ॥ आत्मानं सर्वकार्याणि राष्ट्रं चापि तपस्विने ॥ निवेदयेत्प्रयत्नेन तिष्ठेत्कृतश्च सर्वदा ॥ ४३ ॥ न त्विति
न कुर्वीत विश्वासं राजा कस्मांचिदापदि ॥ तापसेषु हि विश्वासमपि कुर्वंति दस्यवः ॥ ४४ ॥ ग्रामस्याधिप

त्तिं कुर्याद्दशानां च ततः परम् ॥ ग्रामाणां च शतस्यैकं सहस्रस्य च सर्वशः ॥ ४५ ॥ एतत्क्रमेण सर्वेषु स कुर्याद्रा 
ष्ट्रस्य रक्षणम् ॥ यथा जना न सीदेयुस्तथा कुर्यादतंद्रितः ॥ ४६ ॥ तथैव वर्णिनां वृत्तिं शिल्पं चार्थविदां शिल्पि
नाम् ॥ तेषां भयं च निर्वाहं दृष्ट्वा कुर्यात्करान्नृपः ॥ ४७ ॥ श्रुत्वान्यस्य वचः सद्यः कुर्यात्किंचिन्न भूपतिः ॥ विचा
र्य निश्चयं कृत्वा ततः कुर्याद्यथोचितम् ॥ ४८ ॥ उन्मत्तो रक्षुपापीयान्नरः स्यात्प्रियवागिह ॥ अप्रियस्य हि
पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ ४९ ॥ यस्तु धर्मपरो नित्यं हित्वा भर्तुः प्रियाप्रिये ॥ अप्रियाण्यपि पथ्यानि
तेन राजा सहायवान् ॥ ५० ॥ स्वस्याः हितं येन भवेच्च तादृक्प्रियं वदेद्राः पुरुषो वचश्च ॥ जातेऽपि स्वस्मिन् त
स्य तत्तु नृपः सुबुद्धिः शृणुयाद्धितं हि ॥ ५१ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रक
रणे धर्मोपदेशे राजधर्मेषु षड्गुणादिनिरूपणनामा चतुर्विंशोऽध्यायः ॥ २४ ॥ श्रीनारायणमुनिरुवाच ॥ रू
पवर्णस्वरोपेतैस्तितिक्षुरनसूयकः ॥ कुलीनः स्मृतिमान्धीमान्नीतिज्ञश्चानृशंसवान् ॥ १ ॥ मानितोऽमा
नितो वापि न च दुष्येत्कदाचन ॥ शूरो विद्वान्हितैषी यः कार्यो मंत्री स भूभुजा ॥ २ ॥ कुलीनाः शीलसंपन्ना
इंगितज्ञा अनिष्ठुराः ॥ देशकालविधानज्ञाः स्वराधीरा हितैषिणः ॥ ३ ॥ ज्ञानविज्ञानसंपन्नाः प्रकृतिज्ञाः प
रात्मनाम् ॥ सर्वे निष्ठाश्च संतुष्टा येते कार्याः सहाग्रना ॥ ४ ॥ सहायाः साधनोपाया विनागो देशकालयोः ॥ 

विनिपातप्रतीकारः कार्यसिद्धिश्च पंचमी ॥ ५ ॥ पंचांगानीति मंत्रस्य विद्याद्देराजकर्मसु ॥ मंत्रसंवरणं
राज्ञा कर्तव्यं च प्रयत्नतः ॥ ६ ॥ अल्पप्रज्ञैर्दीर्घसूत्रैरलसैरबलैः सह ॥ मंत्रं न कुर्यान्नृपतिर्निंदां तेषां नयेत्
तथा ॥ ७ ॥ विद्यामदमदं हित्वा चाभिजनमदम् ॥ मंत्रं संगोपयेद्राजा यावत्स्यात्तु फलोदयः ॥ ८ ॥ प्रासादे
गिरिशृंगे वा निःशलाके वने रहः ॥ मंत्रं कुर्यान्महीपालः सम्यङ्नीतिरहोविदा ॥ ९ ॥ धन्वभूमिगिरिवृक्ष
जलमर्त्यमयानि षट् ॥ राज्ञो दुर्गाणि तेष्वेकं नरदुर्गं सुदुस्तरम् ॥ १० ॥ नित्यमेव दया कार्या चातुर्वर्ण्ये हितैषि
णा ॥ स्वरक्षिताः प्रजा राज्ञो वर्धयंति यशो महत् ॥ ११ ॥ मद्यद्यूतजीवातकरा धूर्ताः पाखंडिनो विटाः ॥ कुशील
वाश्चारणाश्च निर्यंत्या नृपेण हि ॥ १२ ॥ धनिनो मानयेद्राजा परतस्तेजोकधारकान् ॥ वनस्पतीन्भक्ष्यफ
लोपेतान्च्छेदयेन्नैव कर्हिचित् ॥ १३ ॥ विप्राणां वृत्तिहीनानां कल्पयेज्जीविकां नृपः ॥ आपद्युद्धरेत्तांश्च न कश्चि
द्दुःखमाप्नुयात् ॥ १४ ॥ कृपणानाथवृद्धानामश्रूणि परिमार्जयेत् ॥ हर्षं संजनयन्नाजा न सीदेत्तांपदि क्वचि
त् ॥ १५ ॥ आपत्काले तु नृपतिर्दीर्घसूत्री भवेन्न हि ॥ जयते तेऽर्थे क्षिप्रकारी दीर्घसूत्री विनश्यति ॥ १६ ॥ गोविप्रा
णां हितं कुर्यात्फघोच्चरैश्च तत्कृते ॥ नेअसंपहर्तव्यं सीरविप्रैर्वंचनाचरेत् ॥ १७ ॥ यश्च स्वस्योपकारं णाये
न जीवंती कारुकाः ॥ सर्वस्वहरणेऽपि तन्न राजा हर्तुमर्हसि ॥ १८ ॥ आयुधान्यायुधीयानां वात्यानि वाद्या

॥स॰जी॰पं॰ ॥५३॥

जीविनाम्॥ वेदपानो नहरेद्भूपो वाद्यातो ह्यादिलद्दिदाम्॥ २९॥ जीविकोपकरणाद्वृत्तिर्व्रणां ब्राह्मधाततम्। ऋ॰२५॥
ह्यतिरिच्यते॥ धर्मवित्तरपतिस्कृतांत तोनाचरेत्काचनविप्रसत्तम॥ ३०॥ इतिश्रीसत्संगिजीवनेनारा
यणचरित्रेधर्मशास्त्रेपंचमप्रकरणेधर्मोपदेशेराजधर्मेषुमंत्रादिनिरूपणनामापंचविंशोऽध्यायः॥ २५॥
श्रीनारायणमुनिरुवाच॥ श्रुताध्ययनसंपन्नाः धर्मज्ञाः सत्यवादिनः॥ क्षीनिपिवास्तवादोतादयार्जवस
मन्विताः॥ १॥ शास्त्राः कथयितुंसम्यग्न्यायान्यायौयथातथम्॥ राज्ञासभासदः कार्यारिपौमित्रेचये
समाः॥ २॥ सत्राद्विवाकः समासः सब्रीसणपुरोहितः॥ ससभ्योन्नृपतिःपश्येद्व्यवहारानूयथाविधि॥ ३॥
जोकवेदज्ञधर्मज्ञोःसर्वस्यंचनयोःपिवा॥ यत्रोपविष्टाविप्राःस्युः त्राज्ञसरज्ञीसमा॥ ४॥ चतुष्पाद्व्यवहा
रोयंविवादेषूपदर्शितः॥ भाषोत्तरक्रियासाध्यसिद्धिभिःक्रमवृत्तिभिः॥ ५॥ व्यवहारपदान्यत्रतेयान्य
ष्टान्यष्टादशैवहि॥ ऋणादानंचनिक्षेपस्तथैवास्वामिविक्रयः॥ ६॥ संभूयचसमुत्थानंदत्तस्यानपकर्म
च॥ संविद्व्यतिक्रमः सीमाविवादःस्तेयसाहसम्॥ ७॥ क्रयविक्रयानुशयो विवादःस्वामिपालयोः॥ प्रश्नस्त्र
पारुष्येत्याथपारुष्येदंडवाचिके॥ ८॥ स्त्रीसंग्रहोवेतनस्यादानंद्यूतसमाह्वयः॥ दायभागस्तुस्त्रीपुंसोधर्म ॥५३॥
श्चाष्टादशोतिहि॥ ९॥ तेषांविनिर्णयंकुर्यात्प्रमाणैर्दिव्यमानुषैः॥ प्रोक्तानितत्रमुख्यानिमानुषाणार्थ

सिद्धये॥ १०॥ मानुषाणितुत्रीण्येव कः साक्षिणोलेख्यमुक्तयः॥ प्रमाणानीतिमुनयः सर्वश्रेयस्करणिहि॥
११॥ तुलाग्निंबुविषंकोशोलतंदुलास्तत्समाषकः॥ दिव्यानीतिप्रमाणानिधर्माधर्मार्थमष्टमम्॥ १२॥ यत्रस
भ्योजनः सर्वेदंदंसाध्विति मन्यते॥ सनिःशल्योविवादःस्यात्सशल्यस्त्वन्यथाकिल॥ १३॥ गौरवंलाघवंद
शाविवादस्याधिकारिणा॥ देशकालेततःकुर्यात्प्रमाणैर्निर्णयंनृपः॥ १४॥ यद्येकोमानुषीब्रूयादन्योब्रूया
च्चदैविकीम्॥ मानुषींतत्रगृह्णीयान्नतुदैवीक्रियांनृप॥ १५॥ यद्येकदेशव्याप्तापिक्रियाविद्येतमानुषी॥
साग्राह्यानतुपूर्णापिदैवीकीर्तितानृणाम्॥ १६॥ कुर्याच्चसभ्यसभ्यानांधीबलेनचशास्त्रतः॥ प्रमाणैर्मानुषैर्वि
वादनिर्णयंसन्नृपोत्तमः॥ १७॥ यस्यबुद्धिबलंनास्तिसभ्यानांसत्यवासतु॥ प्रमाणैर्निर्णयंदिव्यैः कुर्याच्छ
नासचाधमः॥ १८॥ बुद्धेःपरीक्षासभ्यानांसत्यमजेयाचनिर्णये॥ विनार्दनंकार्यसिद्धिः प्राणिनांस्यान्न
नित्दिहा॥ १९॥ वक्ताध्यक्षोनृपःशास्तासभ्याःकार्यपरीक्षकाः॥ गणकोगणयेदर्थंलिखेन्न्यायंचले
खकः॥ २०॥ पूर्वामुखस्तूपविशेद्राजासभ्यात्तदुन्मुखाः॥ गणकःपश्चिमास्यस्तुलेखकोदक्षिणामुखः॥
२१॥ येचाश्रण्यचरास्तेषांमरणेपिकरणोभवेत्॥ सेनायांसैनिकानांतुसार्थेषुवणिजांतथा॥ २२॥ केचलंशा
स्त्रमाश्रित्यनकर्तव्योहिनिर्णयः॥ देशजातिकुलाचारानप्राचीनान्नपालयेन्नृपः॥ २३॥ विवादेत्रतिभू

॥स॰जी॰पं॰ गोत्राः समर्थत्वमयोरपि॥ दुष्टस्तु पुरुषो राजन्मानयोर्लक्षणैरिह॥२४॥ स्विन्नगात्रः सृक्किणी लिहन्न सग अ॰२६॥
॥५४॥ द्गदस्वरजरुद्धवाः॥ स्थिरो नैकत्र पादौ स्तो दृशा नो वीक्ष वक्रदृक्॥२५॥ वाचा जद्धे वचि वित्तनंद धरूत्वा भावि
कीतुयः॥ दुष्टः स्मरति वित्ते यो राज्ञा साक्ष्यादिकर्मसु॥२६॥ तत्रापि कश्चित्पुरुषः स्वभावमृदुलोपि च॥ स
भाक्षोभसवजहाकुः परीक्ष्यो नीतिसुवदुः॥२७॥ कुलीनां दानशीलाश्च धार्मिकाः सत्यवादिनः॥ कुलवः
पुत्रवंतश्च धनिनोः यत्तपस्विन॥२८॥ श्रोतस्मार्तक्रियानिष्ठास्त्र्यवराः साक्षिणो मताः॥ यथावर्णं यथाजा
ति सर्वे सर्वेषु वास्मृताः॥२९॥ नैते तु साक्षिणो ग्राह्या राज्ञा धर्मविदा क्वचित्॥ स्त्री बालश्चातिवृद्धोपि म
तोन्मत्ताश्च देविनः॥३०॥ अभिशस्तश्च पतितो धूर्तश्चापि कलेंद्रियः॥ तस्करः साहसी शत्रुः पाषंडी कूटकृ
त्सुहृत्॥३१॥ बंधुस्त्यक्तो रहस्यदोषः सहायश्चारणस्तथा॥ साक्षानर्हा इमे ज्ञेयाः कार्यध्वंसविधायिनः॥३२
॥ ज्ञानन्नप्यब्रुवन्प्रश्ने स्तरकामाकुधाभियात्॥ क्षिपस्यात्मनि पातनान्सहस्रं वा रुणान्नरः॥३३॥ साक्षी वाप्य
ब्रुवन्साक्ष्यं विरुद्धवाप्यनृतं पि पाशान्स॥ सहस्रं दक्षिपति वा रुणान्सो पि चात्मनि॥३४॥ तस्य संवत्सरे पू
र्णे पाश एकः प्रमुच्यते॥ तस्मात्सत्यं तु वक्तव्यं जानता सत्यमंजसा॥३५॥ विद्धो धर्मो ह्यधर्मेण सभां यत्रो
पपद्यते॥ तं निःशल्यं न ये कुर्युस्ते विद्धाः स्युः सभासदः॥३६॥ अर्धं प्राप्नोति धर्मस्य मुख्यः किंजसभापतिः ॥५४॥

कर्तार एकं प्राद्स्मे सभासदः॥३७॥ चित्तयंतु वदेत्तु यें धर्मं सदसि वृत्तते॥ रक्षा भूतेंचते घ्नंति सत्यमत्यपरा
वरान्॥३८॥ ये पातककृतां लोका महापातकिनां तथा॥ अग्निदानां च ये लोका ये च स्त्रीबालघातिना
म्॥३९॥ तान्सर्वान्समवाप्नोति यः साक्ष्येत्यनृतं वदेत्॥ नग्नपत्न्शेषं स्कृतं सदस्यन्पत्तभाषणा
त्॥४०॥ प्राणिनां स्याद्वधो यत्र तत्र साक्ष्येऽनृतं वदन्॥ नदुष्यति पुमान्नूनं प्राप्नोत्येवाऽन्यथाऽघम्॥४१
॥ सम्पामभात्सादिभिः प्रोक्ते देशे पि नृपतिः स्वयम्॥ दद्यादृमविनापैं वणिक्शांर्थं महसानतु॥४२॥ लोभमो
हितामतिश्च नृविवितर्यौः र्थशास्त्रपरएव केवलम्॥ स्मात्क्रतुद्विजनिशाच्युतो नृपास्मादिनपुनिक्रियाधि
र्माश्रुवैः॥४३॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे राजधर्मेषु
अष्टादशव्यवहारनिर्णयनिरूपणं नाम षड्विंशोऽध्यायः॥२६॥ श्रीनारायणमुनिरुवाच॥ धर्मशास्त्रानु
सारेण क्रोधलोभविवर्जितः॥ रिपौ मित्रे च पुत्रे च शिक्षायां स्यात्समो नृपः॥१॥ स्मृत्योर्विरोधे न्यायस्तु
बलवान्व्यवहारतः॥ अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः॥२॥ विरोधो दृश्यते यत्र कर्तुर्वैरं कोपि
क्वचित्॥ अन्योन्यं स्मृतिवाक्यानां तत्र हेतुर्वदामि ते॥३॥ हरिणैव मुनिभिर्दृष्टान्यनाधिकारिणः॥ सात्त्विका
दींस्तत्र तेषां हिताय स्मृतयः कृताः॥४॥ ताश्च येषां श्रोतस्तेषां रोचन्ते तादृशानि हि वचांसि तत्रापि मतं व

॥स॰नी॰पं॰६॥
॥५५॥

लिखेद्धर्मशासनम्॥ ५॥ ततो राजा ससभ्येन विचार्य स्वस्थचेतसा॥ दंडोऽपराधिने देयः शिक्षार्थं धर्म
वृद्धये॥ ६॥ रुद्रस्वरूपो दंडो यम धर्मेण प्रवर्तितः॥ यदस्तु हि विना ज्ञानं राज्ञ एव प्रवर्त्तते॥ ७॥ धर्मेण स
प्रयुक्तस्तु शिक्षार्थं यदि तर्हि सः॥ निःसपत्नं वर्द्धयति राज्यं धार्मिकभूपते॥ ८॥ यदि दंडं न कुर्वीत राजा
तर्हि जनाः स्वपम्॥ यथेष्टं कर्म कुर्वीरन्धर्मध्वंसो भवेत्किल॥ ९॥ देवैर्ब्रह्मादिभिर्भक्त्या प्रार्थितः शंकरः पुरा
ससर्ज रूपं दंडं प्रजानां वीक्ष्य संकरम्॥ १०॥ साक्षाद्रुद्रस्वरूपोसौ नियंतुं जगदीश्वरः॥ आविर्भूतः स
वै सर्वान्मर्यादायां व्यतिष्ठिपत्॥ ११॥ ब्रह्मादिभिः पूजितोसौ क्षपन्नब्धादिभिस्ततः॥ पूजितो ब्राह्मणैः पुत्रैस्त
नैर्द्रादिभिः स्फुरैः॥ १२॥ दिक्पालैः पूजितः सर्वैस्तन्मर्यादास्थिलैस्ततः॥ संप्राप्तो भूतलं तत्र पूज्यते सर्व
राजभिः॥ १३॥ नीलोत्पलदलश्यामस्तु दंडश्चतुर्भुजः॥ अष्टपान्नैकनयनः शंकुकर्णोर्द्ध्वरोमवा
न्॥ १४॥ जटिलद्विजिह्वस्ताम्रास्यो मृगराजतनुच्छदः॥ एवंरूपः सदा पूज्यो दंडः सर्वनियामकः॥ १५॥ सद्य
द्यायुधरूपेण सर्वेषां सर्वकर्मदृक्॥ दंड एव स सर्वात्मा लोके चरति मूर्तिमान्॥ १६॥ देवा दैत्या नरा ना
गाः सप्रजापतयः सदा॥ तद्भीताः स्वस्वमर्यादामास्थिताः सुखिनो भवन्॥ १७॥ तस्माद्राज्ञा हि दंडेन
वै प्रमथ्येयुः परस्परम्॥ भयाद्दंडस्य नान्योन्यं घ्नंति लोकास्तति ध्रुवम्॥ १८॥ दंडेन रक्ष्यमाणा हि वर्धयं

अ॰२५॥
॥५५॥

ति नृपं प्रजाः॥ तस्माद्राज्ञा माननीयो दंडो सो धर्मगुप्तये॥ १९॥ धर्मशीलैर्नृपैः पूर्वं यथा दंडः प्रवर्तितः
॥ अनुसृत्यैव तन्मार्गं वर्तेतेनयथारुचि॥ २०॥ शिक्षार्थं हि तो दंडो न वधायेति निश्चयः॥ सन्मार्गे स्थाप
येद्राजा शिक्षयित्वा ततः प्रजाः॥ २१॥ वधार्हानपि नो हन्याद्धार्मिको नृपतिर्द्विजान्॥ विधवादिदेवब्र
ह्मं कानना यो स्मागिनस्तथा॥ २२॥ महापापादिके दोषे रामदेषादिके कृते॥ किंचिच्चिह्नं कृ विधायेतान्स्व
स्थानं ते विसर्जयेत्॥ २३॥ आततायिनमायांतमपि विप्रादिकं रणे॥ निग्रहेत्स्वस्थापये राजा धार्मिको न
तु घातयेत्॥ २४॥ युद्धेपि नृपतिर्नैव हन्याद्दपया शस्त्रकरान्॥ असमेनैर्नैव युध्येत नातिनीचैः स्वयं नृपः
॥ २५॥ भीतं तं भीतं तरुदंतं च बालं वृद्धं च रोगिणम्॥ अनुद्यतं च स्यहायमतिनीचं च भिक्षुकम्॥ २६॥ त
वाहं वादिनं क्लीबं निःशस्त्रं परसंगतम्॥ युद्धप्रेक्षकमुन्मत्तं सुप्तं रूतं पराङ्मुखम्॥ २७॥ प्रकीर्णकां
चाऽकवचमुपविष्टमसारथिम्॥ अश्वं कृतांजलिं वृक्षारूढं विकवचं तथा॥ २८॥ पिबंतमं बुभुंजानं रा
जानं चाहं वै करचित्॥ राजा न हन्याद्दस्त्वं च सारथिं च गजं वृषम्॥ २९॥ अदंड्या ब्राह्मणा राज्ञा यतो राजा त
दश्रुवः॥ अन्यथा ज्ञाम्यति क्षेत्रे तेजस्तेषामरुक्कविवत्॥ ३०॥ पितरौ च गुरुं स्त्रीं मातापिशेन्तपस्विनम्
सर्वेषां स्त्रीं न हंतव्या सर्वसत्तेषु केनचित्॥ ३१॥ अवृत्तायो भवेत्स्त्री नो वेदविरुद्धा तकस्तथा॥ सत्तु राजैव

॥स॰जी॰पं॰ भर्त्तव्याः क्षत्रियैरेवाप्यसाधवः ॥३२॥ यदि तेनैव निर्वर्तेरन्वृत्तिं लब्ध्वा कुकर्मणः ॥ तदा निर्वासनीयाः स्यु अ॰२७॥
॥५६॥ स्तस्माद्देशात्सबान्धवाः ॥३३॥ न च हन्यान्नृपो जातु दूतं शत्रूक्तवादिनम् ॥ कुलीनः शीलसंपन्नो वाग्मी
दक्षः प्रियंवदः ॥३४॥ यथोक्तवादी स्मृतिमान् दूतः स्यात्सप्तभिर्गुणैः ॥ तं हत्वा निरयं यायात्स्वधर्माच्च्युतो
भवेत् ॥३५॥ देवविप्रार्त्तसाधूनामनाथानां च वृत्तिहृत् ॥ स मासीन्नृपतिर्याति कुंभीपाकं न संशयः ॥
३६॥ स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः ॥ षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः ॥३७॥ अनाथा
दुर्बला ये स्युर्जनास्तेषु नराधिपः ॥ कृपामेव प्रकुर्वीत क्लेशयेन्न तु तान्क्वचित् ॥३८॥ दुर्बलं दग्धं वेदु
नः किंचित्प्ररोहति – – अमानुष्यकृतोद्वेगो हंति च नराधिपम् ॥३९॥ यत्राग्ब जलत्ताद्भमानस्त्राता
रं नाधिगच्छति ॥ तत्र राज्ञः सदस्यानां मूलच्छेदो भवेद्ध्रुवम् ॥४०॥ यः कोऽपि दुर्बलं जीवं बलवान्पीडयेज्जनः ॥
कुले समूलं दहति सोऽस्मात्पक्षस्य निश्चितम् ॥४१॥ रूपणानां यद्वृत्तानां पदस्य परिमार्जनम् ॥ यो भ्रष्टानां पाल
नं पश्चात्क्रियते सो धर्म उच्यते ॥४२॥ कामात्क्रोधाद्भयाद्वा धर्मं जह्यान्न कर्हिचित् ॥ धर्मेणैव नृपाः सर्वे दि
व्याँल्लोकानवाप्नुवन् ॥४३॥ युधिष्ठिराद्याः क्षितिपा महान्तो धर्मेस्वकीयेन न कुर्यतोऽत्र तत्ततस्तदीयाधि
शं देव कीर्तिरद्यापि लोके वितताऽस्ति विप्र ॥४४॥ इति श्रीमत्सत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पं ॥५६॥

चमप्रकरणे धर्मोपदेशे राजधर्मेषु दंडनिरूपणनामा सप्तविंशोऽध्यायः ॥२७॥ श्रीनारायणमुनिरुवाच ॥
ब्राह्मणानां ब्रह्मविदां सेवां कुर्यान्नृपो यतः ॥ राज्यवृद्धिक्षयौ तेषां प्रसादाच्चाप्रसादनात् ॥१॥ संतुष्टाः सेव
या विप्राः किं किं न नृपवांछितम् ॥ साधयेयुः स्वतपसा देवान्कुर्युर्हि सेवकान् ॥२॥ ब्राह्मणानां प्रसादेन
पार्थिवा बहवः पुरा ॥ कृत्वा महान्ति पुण्यानि प्राप्ताः सिद्धिं सुदुर्लभाम् ॥३॥ अवमानाद्ब्राह्मणानां कुर्वीत
प्रीणनेन्नृपः ॥ स्वर्गादपि राजानो दैत्या देवाः सहस्रशः ॥४॥ तस्मान्नित्यं ब्राह्मणानां कुर्वीत प्रीणनं नृपः
श्रेयोऽर्थी निर्मदो भूत्वा भक्त्या सेवां यथाविधि ॥५॥ ब्राह्मणानां परिभवो राज्ञा कार्यो न कर्हिचित् ॥ ते पूज्या
श्च नमस्कार्याः पालनीयाश्च पुत्रवत् ॥६॥ लोकानिमान्धारयंति ब्राह्मणा धर्मसेतवः ॥ प्रणेतारश्च शा
स्त्राणां धर्मज्ञा धर्मपाठकाः ॥७॥ तानाश्रित्यैव जीवंति सदेवा मानवादयः ॥ यज्ञप्रवर्त्तका विप्रा हव्यकव्या
ग्रभोजिनः ॥८॥ कोशस्थानानि वेदानां फलदाः सर्वकर्मणाम् ॥ गतिदाः सर्वभूतानां मानार्हा एव वा
द्याः ॥९॥ अदैवं दैवतं कुर्युर्दैवतं चाप्यदैवतम् ॥ सृजेयुरन्याँल्लोकांश्च कुपिता ब्राह्मणा द्विजाः ॥१०॥ ये
षां कोपाग्निरद्यापि दंडकेनापशाम्यति ॥ अपेयः सागरो यैश्च कृतः सद्यो महात्मभिः ॥११॥ एषां वृद्ध
श्च बालश्च सर्वः सन्मानमर्हति ॥ नास्यैव लोकगुरवः सर्वपूज्यास्ततो द्विजे ॥१२॥ तपोविद्याविशिष्टास्तेमा

॥स·नी·पं०॥ नयंति परस्परम् ॥ प्रमाणस्य प्रमाणं ये कस्तानभिभवेद्बुधः ॥ १३ ॥ अविद्वान्ब्राह्मणो देवः पात्रं वै परमं अ०२८॥
॥५७॥ महत् ॥ विद्वान्भूयस्तरो देवः पूर्णसागरसन्निभः ॥ १४ ॥ अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतं महत् ॥ प्र
णीतश्चाप्रणीतो वा यथाग्निर्दैवतं महत् ॥ १५ ॥ श्मशानेष्वपि तेजस्वी पावको नैव दुष्यति ॥ नितरां यज्ञ
ज्ञाजायां शोभते च तथा द्विजः ॥ १६ ॥ यादृशस्तादृशो वापि पूज्यो विप्रः सदा मतः ॥ किरातरूपोप्यदृह्यतः
कंठे गरुत्मकः ॥ १७ ॥ पूज्या विप्राः सदा सर्वैर्नृपेण तु विशेषतः ॥ तद्व्यतिक्रमदोषस्य नाशस्यं नरपेत्स्त
लेन वै ॥ १८ ॥ ब्राह्मणांस्तर्पयेन्नित्यं पक्वान्नैर्बहुधाकृतैः ॥ प्रचुरान्नसितैर्भोज्यैस्तस्मिं येर्वैजनादिभिः
॥ १९ ॥ यथा यथा प्रसीदेयुर्ब्राह्मणाः स्विष्टभोजनैः ॥ तथा तथा प्रकुर्वीत नृपतिर्धार्मिकः सदा ॥ २० ॥ कुर्वे
द्वा विप्रैर्विप्रास्ते प्रचुरान्नादिभिर्यथा ॥ नृपतौ राष्ट्रवानेव यज्ञे यः ग्निमुखे कृते ॥ २१ ॥ तदुद्दैवततो वि
प्राभोजनीयाः प्रयत्नतः ॥ दद्यात्सुदक्षिणास्तेभ्यः संतोष्यैतान्विसर्जयेत् ॥ २२ ॥ नित्यं दशशतं वापि सह
स्रमयुतं तथा ॥ लक्षं वा भोजयेद्विप्रान्यथा संपन्नृपोत्तमः ॥ २३ ॥ गोहेमतिलमुख्यानि दद्याद्दानानि नि
त्यशः ॥ नैमित्तिकानि च तथा वेदोक्तानि यथाविधि ॥ २४ ॥ नक्षत्रेषु च तिथिषु संक्रांतिषु पृथक्पृथक् ॥
दानान्युक्तानि कुर्वीत नानापर्वसु चर्द्धिभिः ॥ २५ ॥ वापिः कूपांस्तडागांश्च कारयेच्च नयान्नृपः ॥ गावो विप्राः ॥५७॥

साधवश्च नराः यत्र पिबन्त्यपः ॥ २६ ॥ निदाघकाले पानीयं यस्य तिष्ठत्यवारितम् ॥ स दुर्गं विषमं कृच्छ्रं न क
दाचिदवाप्नुयात् ॥ २७ ॥ प्रतिमासं प्रस्तुवात तत्कालोचितै रसैः ॥ भोज्यैर्यस्तर्पयेद्विप्रांस्तस्य पुण्यमनं
तकम् ॥ २८ ॥ तथा हविर्भिर्यज्ञेषु यायसामान्यसितादिभिः ॥ देवान्संतर्पयेज्ज्ञानाद्यज्ञाः प्रचुरदक्षिणाः
॥ २९ ॥ देवाजयादिन्नृपतिः कारयेत्सुरदानि च ॥ श्रुतिभिः सह तत्राथ स्थापयेद्देवताः स्वयम् ॥ ३० ॥ धर्मशा
लाश्च विविधाः कारयेत्सहवृत्तिभिः ॥ सोपस्कराणि वेश्मानि ब्राह्मणेभ्यो प्रयच्छेन्नृपः ॥ ३१ ॥ फलपुष्पद्रुमा
ढ्यानि नानोद्यानानि कारयेत् ॥ दद्याच्चापि जितान्वृक्षान्द्विजेभ्यः क्रमतो नृपः ॥ ३२ ॥ संरक्षन्पोषयेल्लो
काञ्जनसंवर्धनयेत्पः ॥ तीर्थक्षेत्राणि पुण्यं सज्जनैस्तान्तत्र यज्ञान्जन्म् ॥ ३३ ॥ जितेन्द्रियं ब्रह्मनिष्ठं यदा कुलमपि
पूजयेत् ॥ भक्त्या निष्कपटो राजा तस्य पुण्यं सर्वतोऽधिकम् ॥ ३४ ॥ अन्नार्थिनो जीवमात्रेभ्यो राजा चान्नं प्रदा
पयेत् ॥ नान्नदानात्परं दानं श्रेष्ठमिस्त्येवनिश्चयः ॥ ३५ ॥ अन्नं हि प्राणिनां प्राणभवं सऽन्नाच्च देहिनः ॥ निर
न्नो मृत्युमाप्नोति तस्मादन्नं प्रदापयेत् ॥ ३६ ॥ अन्नसत्राणि सर्वत्र स्वराष्ट्रे कारयेन्नृपः ॥ प्रत्येहं स्वपुरे द
द्यादन्नार्थिभ्योन्नमुत्सुकः ॥ ३७ ॥ ब्राह्मणानतिथीन्भिक्षून्नाक्षान्यथिकांस्तथा ॥ योन्नेनार्चेद्यथायोग्यं
तेनदेवाः कृतर्पिताः ॥ ३८ ॥ एकाहं क्षुधितस्तिष्ठेदन्नमप्राप्य पत्तुरो ॥ यः कोऽपि सहहरेत्सुल्यं तस्य राज्ञो

नसेद्रूपः ॥ ३९ ॥ तस्मान्निःसंशयं यत्नेन शोधयित्वा पुरे स्वयम् ॥ दापयेत्क्षुधितेभ्योन्नमप्रमत्तः सुधीर्नृपः
॥ ४० ॥ अन्नदः प्राणदो लोके प्रोच्यते सर्वदस्तु सः ॥ अनंतं फलमाप्नोति परत्रेह च सद्गुणः ॥ ४१ ॥ हेमम
र्कप्रभं दिव्यं किंकिणीजालमंडितम् ॥ अप्सरोमंडितं नानार्द्धिकाकुपद्गोभितम् ॥ ४२ ॥ वस्त्रभूषाभो
जनगरसनकूपमंडितम् ॥ यानारूढो विमानं स सकामं गं स्वर्गमन्नदः ॥ ४३ ॥ स्कवो निर्यांसि च तत्र
दिव्ययानाप्सरोदिव्यरसोपभोगान् ॥ प्राप्नोति गंधर्वगणोपगीतकीर्तिः सदैव दानं द्विजवर्यभूप ॥ ४४ ॥ इ
ति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे राजधर्मेषु ब्राह्मणप्रशंसा
दिनिरूपणनामाष्टाविंशोऽध्यायः ॥ २८ ॥ श्रीनारायणमुनिरुवाच ॥ न मांसं भक्षयेद्राजा नातिहिंसात्मको
भवेन्नृपः ॥ मांसाशिनो भवान पिच हिंसायाः संनिवर्तयेत् ॥ १ ॥ अहिंसैव परो धर्मः सर्वेषां समुदाहृ
तः ॥ मनसा वपुषा वाचा तस्माद्धिंसां च संगतः ॥ २ ॥ यथा चतुष्पाद्देकेन पदा हीनो न गच्छति ॥ म्रियते ग
त्वभावाच्च कालेनाल्पेन निश्चितम् ॥ ३ ॥ अहिंसापि तथैवेयं श्रुतिभिर्मन्वादिभिः ॥ पाजनीया प्रयत्नेन
न त्यक्तव्या मनसा ॥ ४ ॥ पूर्वं तु मनसा त्यक्त्वा ततो वाचा च कर्मणा ॥ न भक्षयति यो मांसं स पुरुषः स वि
मुच्यते ॥ ५ ॥ राज्ञापि ताहि सर्वेषां सर्वजीवात्कृतस्मृता ॥ पाजनीया ततः सर्वैर्हिंसकेभ्यो भयावदा ॥ ६ ॥ पु ॥ ५९ ॥

रुमांसोपभोगान्नृपः स्यादतिविमोहितः ॥ मांसं तु रसलुब्धात्मा स तु राक्षस उच्यते ॥ ७ ॥ जीवं तं हि परित्य
ज्य बहवः सात्त्विका नृपाः ॥ स्वमांसैः परमांसानि परिपाल्य दिवं गताः ॥ ८ ॥ सप्तर्षयो वालखिल्यास्तथै
वोत्तुमरीचिपाः ॥ अमांसभक्षणं सर्वे पञ्चां संति महर्षयः ॥ ९ ॥ यज्ञेषु पशवालंभोऽपि न साक्षाद्विदःसंमतः
॥ किंत्वसाक्षात्प्रवृत्तीनां रागाद्धिंसानिवृत्तये ॥ १० ॥ एवं धर्मरतो राजा कृत्वा राज्यं यथाविधि ॥ वृत्तोऽप्यायु
षोऽभागे दत्वा ज्येष्ठाय सूनवे ॥ ११ ॥ स्वयं वनमुपाश्रित्य कृत्वा संगं सतां हरेः ॥ भक्तिं कृत्वा हृदि हृदं प्राप्नु
यात् परमं पदम् ॥ १२ ॥ राज्यं कुर्वन् यदि मृतो युद्धे वा धार्मिको नृपः ॥ सोपि स्वर्गमवाप्नोति भुंक्ते भोगा
नने कशः ॥ १३ ॥ ततः कालेन संप्राप्य पुण्यक्षो षणमानवम् ॥ देहं कृत्वा सत्संगं विष्णुभक्त्या विमुच्यते
॥ १४ ॥ यदि राज्यमदोन्मत्तो मर्यादां लंघयेदिमाम् ॥ स्वैरवर्ती स तु नृपः प्राप्नोत्यन्ते यमाज्ञो महत् ॥ १५
॥ मृत्वा चाप्रजानां ग्राममज्ञां गृहीत्वा पापकर्मणाम् ॥ यमालये फलं भुंक्ते यावच्चंद्रदिवाकरौ ॥ १६ ॥ ततो भ्र
म्यति कालेन कीटपक्ष्यादियोनिषु ॥ तस्माद्राजा धर्मनिष्ठः पालयेन्नियतः प्रजाः ॥ १७ ॥ नीतिशास्त्रं पु
रा ब्रह्मा जक्षाध्यायांश्च कार ह ॥ धर्मज्ञानाय राज्ञां प्रजानां च सुखाप्तये ॥ १८ ॥ अल्पायुषो जनान् दृष्ट्वा तं
संक्षिप्य शिवस्ततः ॥ वैशालाक्षाभिधं चक्रे श्रुतार्थं मनोहरम् ॥ १९ ॥ तत्संक्षिप्य पुनः पंचसहस्राध्या

॥स·जी·पं५ यमुत्तमम् ॥ बाकुदत्तं कर्मसंस्तंचतत्र स्थकेपुरेदरः ॥२०॥ तत्संक्षिप्य पुनः काले बार्हस्पत्याभिधं द्विज ॥ त्रिस ॥ अ॰ २९॥
॥५९॥ हस्राध्याययुतं चकार च बृहस्पतिः ॥२१॥ काव्यः संक्षिप्य तच्चक्रे सहस्राध्यायविश्रुतम् ॥ तच्छास्त्रमगमि
तो भूमौ मुनिभिः संप्रवर्तितम् ॥२२॥ पुनश्चाल्पमतीन्दृष्ट्वा जनानल्पायुषस्तथा ॥ भरद्वाजादिमुनिभिः
संक्षेपेण प्रवर्त्तितम् ॥२३॥ तस्मात्सारतयावच्म्युक्तमस्यात्र विस्तरः ॥ धर्मेणैव प्रजा राज्ञा रक्ष्यास्तेनैवेति
निश्चितम् ॥२४॥ राजधर्मा इति मया प्रोक्तास्ते द्विजसत्तम ॥ यानाश्रितो नरपतिरिहैव सह मोदते ॥२५॥ य
स्त्वधर्मान्नेतान्यो विलोभैक्यासहाचरेत् ॥ सहितस्त्वायपरमं लभते पुरुषः किल ॥२६॥ तद्भक्तिरहितो
यत्र धर्मानेतान्यश्चाचरेत् ॥ स दया परयोपेतः स्वर्गलोके विजम्भते वै ॥२७॥ स्वकीयपुण्योपार्जितभूरिभोगा
न्दिव्यान्स भुक्त्वा पुनरत्र भूमौ ॥ प्राप्नोऽर्द्धपुण्यं बत नीतिके ते करोति पूर्वाधिकमेव पुण्यम् ॥२८॥ इति श्रीसत्सं
गिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे राजधर्मेषु अहिंसादिसनातनधर्मनि
रूपणनामैकोनत्रिंशोऽध्यायः ॥२९॥ श्रीनारायणमुनिरुवाच ॥ स्त्रीणां धर्मानथ वक्ष्यामि सधवानामथ द्वि
ज ॥ विधवानां च नारीणामिहामुत्र सुखप्रदान् ॥१॥ लक्ष्म्या गीताः पुरा सर्वे धर्माः सकलयोषिताम् ॥ गंगा
याः स्त्रीः प्रति शुभाः कैलासे शंभुसन्निधौ ॥२॥ तानेव तुभ्यं कथये सविशेषानहं द्विज ॥ हिताय योषितां भू ॥५९॥

मा विवक्षंतीनां सुखं महत् ॥३॥ कुलरूपगुणैर्योग्यान्वरान्दृष्ट्वा यथाविधि ॥ तेभ्यः पित्रादिभिर्दत्ताः सधवा
स्तास्तु योषितः ॥४॥ कालं गतास्त्वया नार्यो भवेयुर्मृतभर्तृकाः ॥ विधवास्तास्तु विज्ञेया याः प्रोक्ताः कु
लटाश्च पतिव्रताः ॥५॥ भर्त्तृभिन्नेषु याः पुंसु रतास्ताः कुलटा मताः
॥६॥ दुष्टस्वभावा कुलटा न वश्या ईदृशापि च ॥ अधर्मशीला नित्यं सा दुर्मुखा कलहान्विता ॥७॥
स्वपतिं भर्त्सयेन्नित्यं सा नारं च रमयेत्सदा ॥ विषतुल्यं पतिं पश्येत्कर्मिष्ठमपि दुर्मतिः ॥८॥ कामदेवसमं
चापि जारं पश्येच्च कामतः ॥ श्रुभरशाकटाक्षेण श्रांसुमा पापीयसी मुदा ॥९॥ स्ववेत्तां पुरुषं दृष्ट्वा पुर्वां
ने रतिश्रुरकम् ॥ कामातुरा भवेत्सा तु कुलटा कामिनी सदा ॥१०॥ गुरूणां भर्त्सिता सापि रक्षिता च सुता
दिभिः ॥ न याप्रिना रे कुर्वीत तन्नैव सा धान्यपैरपि ॥११॥ नास्ति तस्याः प्रियं किंचित्सर्वं कार्यं वशाप्रियम्
॥ गा वस्त्रूणामिवारण्ये प्रार्थये ज्ञानवंनम् ॥१२॥ व्रतं तपसि धर्मे च न मनो गृहकर्मसु ॥ न गुरौ च भवेत्त
स्या जारे स्निग्धैव चैव ॥१३॥ स्वैरिण्योऽथ च कामिन्यः पुंश्चल्य इति दमेदतः ॥ प्रोक्ताः संति पुराणेषु त्रि
विधाः कुलटाः स्त्रियः ॥१४॥ सवर्णेषु रताः पुंसु स्वैरिण्यस्तत्र कीर्तिताः ॥ असवर्णेषु अपिरताः सवर्णे
षु तथाऽपराः ॥१५॥ सवर्णेषु सेवंधिषु पुंसु च योषितो ॥ पारताः स्युस्ताः पुंश्चल्य इति कीर्तिताः ॥१६॥

॥स॰जी॰पं॰५ कृन्तसास्त्रिविधात्र्ये तादेहं नैव मन्यातनाः ॥ आकल्पं प्राप्नुवंत्येव नैवासां मुक्तिसत्कृतिः ॥ २७ ॥ पतिरेव व्रतं तस अ॰३०॥
॥ ६० ॥ स्याः सा तु प्रोक्ता पतिव्रता ॥ प्राणेभ्योऽपि प्रियतरः पतिस्तस्या भवेद्ध्रुवम् ॥ २८ ॥ देवदैत्यनरादिभ्यो यस्याः स्याद
धिकः पतिः ॥ सेवेत तं सदा प्रीत्या निष्कामेण सुरवद्धि सा ॥ २९ ॥ व्रतं दानं तपः पुण्यं जपहोमादिकं तु यत् ॥ आत्म
यैव स्वभर्तुर्याः कुर्यात्सा तु पतिव्रता ॥ ३० ॥ पुत्रे यथैकपुत्राणां वैक्लव्यानां यथा दृशौ ॥ नेत्रे यथैकनेत्राणां तृषि
तानां यथा जले ॥ ३१ ॥ क्षुधितानां यथाऽन्ने च कानां यथा स्त्रियाम् ॥ यथा स्वपरस्वे चौराणां यथा जारे कुयोषि
ताम् ॥ ३२ ॥ विदुषां च यथा शास्त्रे वाणिज्ये वणिजां यथा ॥ तथाऽऽमून्मनः साध्व्याः स्वीये भवति भर्त्तरि ॥ ३३ ॥
पतिव्रतानां द्विजवर्य धर्मान्नृणां वदाम्यादित एव तुभ्यम् ॥ यानाश्रिता यांति हि संप्रियास्ताः सतां स्वलोकं
सुरदर्शनीयम् ॥ ३४ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे स्त्री
धर्मेषु सधवास्त्रीभेदलक्षणनिरूपणनामा त्रिंशोऽध्यायः ॥ ३० ॥ श्रीनारायणमुनिरुवाच ॥ नार्याः पति
व्रताया स्वपतिरेवेश्वरो मतः ॥ अतस्तमेव सेवेत भक्त्या परमिवादरात् ॥ १ ॥ प्रतिबुध्योषसि स्नात्वा स्वस्र
मृष्टपरिधाय धौतवासाः ॥ शुचिर्नित्यं भर्त्तुः सेवापरा भवेत् ॥ २ ॥ स्थापयित्वा स्वपूतेन वारिणा निर्मलेन च ॥
तस्मै दत्वा धौतवस्त्रं तत्यादौ क्षालयेन्मुदा ॥ ३ ॥ आसने चासयित्वा तं तस्य भाले च चंदनम् ॥ दोर्णोम्रूकृद ॥६०॥

ये कृत्वा दद्यान्माल्यं गलेऽपि च ॥ ४ ॥ नमः कौंतापमं चेणानोगद्यैः स्वधोपमैः ॥ संपूज्य भक्तितः कांतं
स्कल्वाचवरणमेन्मुदा ॥ ५ ॥ प्रकाशेऽन्यविशौ ध्याः यशुचिर्न्नला शुचिस्थले ॥ संस्कृतं पत्युरिष्टं पाकं कृत्वा
तमाशयेत् ॥ ६ ॥ भुक्ते पत्यौ तु भुंजीत तिष्ठेत्तस्मिंश्च तिष्ठति ॥ निद्रिते सति निद्रायाद्बुध्येत गदे पतिव्रता ॥ ७
॥ अनजं कृतमात्मानं न पतिं दर्शयेत्क्वचित् ॥ कार्यार्थं प्रोषिते पत्यौ तु भुजित्त तिष्ठेन्नवेत्मंडनवर्जिता ॥ ८
पत्युर्नाम न गृह्णीयात्तथायुष्यविवृद्धये ॥ पुरुषांतरनामापि न गृह्णीयात्कदाचन ॥ ९ ॥ आकृष्टापि च ना
कौशेत्वसीदेन्नाद्दिपिच निरं हारिन तिष्ठेन्नीचैर्भाषेत कर्हिचित् ॥ १० ॥ आहूता गृहकार्याणि त्यक्त्वा
ऽगच्छेच्च सत्वरम् ॥ एषांः स्मात्राप्यतां स्वामिन्नितिन्नूयाच्चनिर्वचः ॥ ११ ॥ हरिपूजोपकरणोपस्तांश्च तुस्ता पि
साधयेत ॥ उपयुक्तं पदार्थान्तसदानिमुपाहरेत् ॥ १२ ॥ सवेत्तन्नर्तुरुच्छिष्टमिष्टमन्नंफलादि च ॥ महाप्रसाद
इति स्तुत्का प्रति चौस्वानिनाऽर्पितम् ॥ १३ ॥ देवपितृतिथिभ्यश्च गोभ्यो भिक्षुभ्य एव च परिचारकवर्गेभ्यो मा
ऽदत्वाऽश्नीयात्पतिव्रता ॥ १४ ॥ आसनान्दुर्वेजानापान्द्दीनांध कृपणांस्तथा ॥ यः कोपिस्कंधित स्तं च सस्ता
धी सांऽन्नेन पोषयेत् ॥ १५ ॥ संयतो पस्करा दृष्टादक्षाव्ययपरास्मुखी ॥ कुर्यान्नपतिमनापृच्छ्य नोपवासव्रता
दिकम् ॥ १६ ॥ सदाचारावलोपेक्षा च समाजोत्सवदर्शनम् ॥ नगच्छेत्तीर्थमेकैव विवाहप्रेक्षणाय च ॥ १७ ॥ र

हस्येचापिकार्येषुपत्निर्नोत्थापयेत्क्वचित् ॥ कृत्स्नकृत्संस्कृत्यासीनेन रममाणं यदृच्छया ॥ १८ ॥ स्त्रीधर्मिणीत्रि
रात्रं तु मुखं नैव प्रदर्शयेत् ॥ स्ववाक्यं श्रावयेन्नैव यावत्स्नानं नाचरेत् ॥ १९ ॥ स्नाता भर्तुर्वदनं समी
क्षेतान्यस्य न क्वचित् ॥ अथवा मनसि ध्यात्वा पतिं भानुं विलोकयेत् ॥ २० ॥ हरिद्रां कुंकुमं चैव सिंदूरं कज्ज
लं तथा ॥ कूर्पासकं च तांबूलं मंगल्याभरणं शुभम् ॥ २१ ॥ केशसंस्कारकबरीकरकर्णादिभूषणम् ॥ भर्तु
रायुष्यमिच्छंती दूषयेन्न पतिव्रता ॥ २२ ॥ न रजकस्य न द्वेतुकस्य तथाश्रमणस्य च ॥ न च दुर्भगया नारी सं
खीत्वं क्वचनाचरेत् ॥ २३ ॥ न च विश्वास्य घातिन्या न प्रेक्षणिकया तथा ॥ न तस्याः प्रकल्पाय च नार्या सख्यं समाच
रेत् ॥ २४ ॥ न च पुंवेषधारिण्या नातिवार्ताप्रसक्तया ॥ बहुगेहभ्रमण्या या स्त्रिया सख्यं न चाचरेत् ॥ २५ ॥ न
द्यूतादिव्यसनया मादकाशनया न च ॥ न च वेश्याप्रपरया सख्यं कुर्यान्न वेश्यया ॥ २६ ॥ न चेशयानयोरुच्चा
याश्चैरगया दुष्टचेतसः ॥ वपजायावकुभुजं स्त्रियाः सख्यं न चाचरेत् ॥ २७ ॥ भर्त्रा विद्वेषिणी नारी न संभाषे
त कर्हिचित् ॥ नैकाकिनी क्वापि भूपाश्रान्ता यायान्न च क्वचित् ॥ २८ ॥ नोलूखले न मुसले न वर्द्धन्योदृषद्यपि ॥
नयंत्रकेन देहल्यां सती चोपविशेत् क्वचित् ॥ २९ ॥ विनाव्यवायसमयं प्रागल्भ्यं नाचरेत्क्वचित् ॥ यत्र यत्र
रुचिर्भर्त्तुस्तत्र प्रेमवती न वेत् ॥ ३० ॥ उच्चासनं न सेवेत न व्रजेत्परवेश्म च ॥ न त्रपाकरवाक्यानि नाग्यस्य 

श्रावं क्वचिद्वदेत् ॥ ३१ ॥ गुरूणां सन्निधौ वापि नोच्चैर्भूयात्न वा हसेत् ॥ नान्येन पुंसा भाषेत न स्पृशेत्पुरु
षांतरम् ॥ ३२ ॥ प्रवाजकेन चणि नामिषजास्यविरेण च ॥ यावत्सयोजनं कुर्यान्न प्रणामावहारिकम् ॥
३३ ॥ बुद्धिपूर्वं न वीक्षेत पुरुषं पशुमप्यसौ ॥ न कुर्यात्कलहं क्वापि नापदं च कस्यचित् ॥ ३४ ॥ नार्याः स्व
पतिरेवैकं दैवतं परमं स्मृतम् ॥ पूजयेत्तमतो नित्यं नास्तिकाम्येच्च लक्षणम् ॥ ३५ ॥ क्लीबं वा दुरवस्थं वा व्याधि
तं वृद्धमेव वा ॥ दुःशीलं दुर्भगं वापि पतिं सेवेत सर्वथा ॥ ३६ ॥ हृष्टा हृष्टे विषण्णा च विषण्णे स्यात् प्रिये सदा ॥
एकरूपा भवेत्सम्यक् संपत्सु च विपत्सु च ॥ ३७ ॥ सर्विंत्वेवणितैजादिक्षणेष्वपि पतिव्रता ॥ पतिव्रतास्तीति न
ब्रूयाद्दायास्तेषु न पोजयेत् ॥ ३८ ॥ वात्याद्दापांतमाजो कृत्स्नशीघ्रोत्थानजल्पासन्ने ॥ तौ चूर्णमन्नात्याच पादं
संवाहनेन च ॥ ३९ ॥ मधुरैश्चाटुवचनैः खेदसंनोदनैः शुभैः ॥ प्रीणयेत्स्वपतिं भक्त्या प्रांजलिर्विनयान्विता ॥ ४० ॥
देवी मनुपोगेधर्वापुत्राश्चापि स्वर्जलस्पृशं ॥ एवमवानभिरूपो वास्ते पो ह्यो विरसमः पुमान् ॥ ४१ ॥ भर्त्तासदानु
यातव्यो देहवच्छायया यतः ॥ स्फटन्वरी भूपार्श्वसुखाहेतु वनं द्विजाः ॥ ४२ ॥ पत्युराज्ञां गृहीत्वैव नितान्ने र्भक्ति
कोस्तया ॥ व्रतोपवासनियमान् कुर्याद्देवपतिव्रता ॥ ४३ ॥ साध्वित्वेतेषु पर्वसु यद्दो कस्यापि कर्हिचित् ॥ स्तुति
न्वैवतर्हि कुर्यात्तस्याश्चित्तमाशुच ॥ ४४ ॥ उषः प्रबोधमुख्येषु स्वप्नेषु त्याग बुद्धितः ॥ न न्नेष्ठे कैकमेवात्र पृ

॥स॰नी॰पे॰
॥६२॥

यथाप्यगुणोपवर्णनम्॥४५॥ब्रह्मसर्पंचमवक्त्रोत्थमपत्राब्दंवेदेरादि॥माग्रेशात्तहिंसानारीपादरक्षुंव्रतं अ॰३१॥
चरेत॥४६॥इतिसंक्षेपतोधर्माःकथितास्तिनामयोदितः॥पतिव्रताधर्मवतीनारिजगतिदुर्लभाः॥४७॥व्र
तोपवासनियमान्पतिमुल्लंघ्ययाचरेत॥आयुष्यंहरतेभर्तुःसामृतानिरयंव्रजेत॥४८॥दानोपवास
पुण्यानिस्कृकृत्यान्यपिसर्वथा॥निष्फलानिभवेर्यस्यस्तुतापाःपतिधर्मातः॥४९॥कर्मणामनसावाचापतिं
नाऽतिचरेत्तुया॥तस्याःपुण्यंफलंप्रोक्तंनाऽन्यस्यारतिनिश्चितम्॥५०॥अन्यागुणाःशौचयुक्ताधृतिम
त्यःशुभाव्रताः॥अयोनिदुष्टानार्योहिधारयेत्सखिलंजगत॥५१॥योनिदुष्टस्त्रियानास्तिप्रायश्चित्तंद्धवेचव
सा॥वागुद्देविहितंसद्भिःप्रायश्चित्तपुरातनैः॥५२॥कल्पांतरमहस्त्रेषुनस्त्रीसाजन्मतेगतिम्॥तिर्यग्योनिस
हस्त्रेषुपच्यतेयोनिविस्मवान॥५३॥यदिसानाममात्रुणंस्त्रीजन्मेन्नाऽसतीतदा॥वंशजयोनेदुर्मेधाजायेत
कुक्कुरजाता॥५४॥उक्त्वात्वत्तुत्तरेदद्यान्नारीक्रोधेनयापतिम्॥साशुनीनायतेग्रामेस्मुंगालीनिर्जनेवने॥५५
॥याभर्त्तारंपरित्संत्यरहस्यरतिदुर्मतिः॥उलूकीसाभवेत्क्रूरावृक्षकोटरसायिनी॥५६॥नाडितानाडितुयेछे
त्राश्रीघ्रीरूपदंशिका॥कराहस्यपतियाऽन्यंचकेकणाक्षीतुसाभवेत॥५७॥याभर्त्तारंपरित्यज्यमिष्टमश्नाति
केवलम्॥साग्रामेशूकरीस्याद्वागुलीवास्वविठ्भुजा॥५८॥यात्वंकृत्यपतिंब्रूयान्मूकासातुभवेत्किज॥मुत्र ॥६२॥

चतुःखिलाः ५९॥स्त्रीजन्मगेननारीणांभर्त्ताधर्मपरोविहि॥पतेदुःखार्जितास्वर्गाच्छ्री
तरक्ष्यंततःस्त्रिया॥६०॥रक्षणीयंमहायत्नादिदंसकृतभाजनम्॥वतुःपरस्येतुस्वर्गात्नुखाभासान्म
कांक्षियाः॥६१॥महकीर्तिश्चविपुलास्वर्गेवासस्तयाक्षयः॥पातिव्रत्यात्स्त्रियालभ्यंसमखीलंनृस्त्रियासम
ह॥६२॥पतिम्ल्लासीयादिनवेद्विमुखोवास्करदेवतः॥महापातकदृशीयात्तहिंत्याऽन्यःस्त्रियाकिल॥६३॥भगवंतंम
नेदेवयदिहेत्योस्तुपातकान॥आयुष्यंनेसदालेनभत्तेस्तुनरिवेपरम्॥६४॥यावज्जलोमसंख्यास्तितावत्को
टयुतानिच॥भर्त्रासिस्वर्गस्कस्वंभुंक्तेरममाणापतिव्रता॥६५॥धन्यासाजननीलोकेधन्योसौजनकःपुम॥ध
न्यःसचपतिःश्रीमानयस्येगेहेपतिव्रताः॥६६॥पुण्यंयस्यभवेत्तुसःशातजन्मसमर्जितम्॥गृहेतस्यभवे
न्नारिधर्मनिष्ठापतिव्रता॥६७॥पितृवंश्यामातृवंश्याःपतिवंश्यास्त्रयस्त्रयः॥पतिव्रतायाःपुण्येनस्वर्गेसौख्या
नि भुंजते॥६८॥अकार्यकारिणंवापिपतितंवापिनिर्गुणम्॥स्त्रीपतिंनारयसेवतयामात्मानंपतिव्रता॥६९
विम्यस्यपतिव्रतास्पृष्टांकुरुंतेमानुमानपि॥सौभाग्यंधवहस्त्रापिस्वपाविवायनात्मया॥७०॥पृथिव्यांयानि
तीर्थानितानिसंतिसतीपदे॥तेनत्यसर्वदेवानांतनेतस्यास्तपस्विनाम्॥७१॥साध्वीपादरजोभिर्भूःपूता
सद्योहिजायते॥नमस्कृत्यचतांयांपापीपापेभ्योमुच्यतेकिज॥७२॥नेजोकोमस्मसाकुंचुंदणीनेवपति

॥ स॰जी॰पं॰५ ॥ व्रता ॥ स्वतेजसा सा समं यस्याः साम्यं ह्राप तुल्यं व्रती सदा ॥ ५३ ॥ पतिव्रतात्वरूढधर्मा सावित्र्या चाऽनसूयया ॥ शां अ॰३१ ॥
॥ ६३ ॥ डिल्याहल्यया सत्या द्रौपद्या शतरूपया ॥ ५४ ॥ मेनया च रुक्मिणीला च सीतया स्वाहया तथा ॥ तुल्या लोपामुद्रया
ऽस्ति विरला काऽभूत्तले ॥ ५५ ॥ गृहे गृहे संति हि तत्र तत्र द्विजेन्द्र यो या अस्य मुनीमनानाः ॥ धर्मेव सा कापि स
ती स्वर्गीभिः स्वस्वर्पवर्येव यथा प्रियुगापि मर्त्या ॥ ५६ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचम
प्रकरणे धर्मोपदेशे स्त्रीधर्मेषु पतिव्रताधर्मनिरूपणनामैकत्रिंशोऽध्यायः ॥ ३१ ॥ श्रीनारायणमुनिरुवा
च ॥ नार्यः पतिव्रताः प्रोक्तास्तास्त्रिविधा मताः ॥ उत्तमा मध्यमाश्चैव कनिष्ठा इति भेदतः ॥ १ ॥ कनिष्ठात
त्र पूर्वोक्तान्धर्मान्सर्वाननुपाश्रिता ॥ कामसौख्यं समीहेत सेवमाना पतिं ततः ॥ २ ॥ शृंगाररसमिश्राभिर्हावभा
वोक्तिभिः ॥ कामयेत स्वयमात्मानं पतिः कुर्याद्यथा च सा ॥ ३ ॥ परपुंसो रूपगुणान्दृष्ट्वा तत्र व्रजेन्न मनः ॥ नियं
तु सा कुर्यान्निवनियम्य तैत्स्व वचो वपुः ॥ ४ ॥ मध्यमा त्वपि विज्ञा धर्मान्प्रागुक्तान्प्राज्ञसेवेत्सदा ॥ पतिसेवापरा
प्रसादहेतुं विमनिच्छति ॥ ५ ॥ स्वपत्युरधिकं चाऽन्यं धनरूपवयोगुणैः ॥ दृष्ट्वापि पुरुषं कायवाङ्मनोभिः सज्जे
न्नसा ॥ ६ ॥ देशकालक्रियासंगवैषम्ये दैवयोगतः ॥ कर्हिचित्सा तु मनसा सज्जेत पुरुषांतरे ॥ ७ ॥ अन्यथाऽ
तु मनोऽप्यस्याः स्वप्नेऽपि पुरुषांतरमिकापि संकल्पयेन्नैव प्राप्नुयाः परमां धृतिम् ॥ ८ ॥ स्वतः कामसुखं ने ॥ ६३ ॥

च्छेत्कर्हिचित्सा स्वपनेऽपि ॥ पतिनाऽर्थ्यमाना तु तद्दद्याद्धृष्टचेतसा ॥ ९ ॥ इत्युक्ता मध्यमा नारी प्रोच्यते योत्तमा तु
ना ॥ प्रागुक्तान्सा तु सेवेत धर्मान्नरश्रेष्ठ तान् ॥ १० ॥ स्वपत्युरधिकं चाऽन्यं धनरूपवयोगुणैः ॥ दृष्ट्वाऽपि पुरुषं
कायवाङ्मनोभिः सज्जेन्न वै ॥ ११ ॥ देशकालादिवैषम्ये जातेऽपि मनसाऽपि सा ॥ संकल्पयेन्न पुरुषं स्वपत्युरि
तरं क्वचित् ॥ १२ ॥ सन्निपातादिरोगे वा कस्मिंश्चिन्मादकाशने ॥ अप्यस्या मानसं नैव भ्रांतं स्यात्पुरुषांतरे ॥ १३ ॥ स्व
सेवमानाऽप्यसौ नारी पतिं कामसुखं स्वतः ॥ नेच्छेत्तेन कृतिस्त्वीसादीयमानं समम पिध्नवम् ॥ १४ ॥ पत्याऽऽ
ग्रहेणार्दितं चेदरुच्यानं सुखं भजेत ॥ नरिजं वीराम्बदंतो यथा चरणं कच्चर्वणम् ॥ १५ ॥ स्वदेहममदेहांश्च
दैहिकं स च सुखं त्यजेत्सौ ॥ विद्याद्देहं गम्पतोः समं सर्वं च भगवत्सुखम् ॥ १६ ॥ पति श्रेष्ठ कामसौख्यार्थमुद्दे
शोऽपि देहम् ॥ हृष्टा स्यान्नर्हितं रामसमपि मोदिताऽऽचरेत् ॥ १७ ॥ एवंविधोत्तमा साध्वी दुर्लभा किल भूतले
देवा अपि न योऽश्लक्ष्मेते उष्टचक्षुपा ॥ १८ ॥ कनिष्ठा योदिता साध्वी सप्तभिर्जन्मभिः क्रमसा ॥ स्वधर्मनिष्ठा स
सेवम मध्यमोत्व प्रपद्यते ॥ १९ ॥ सत्यभिर्जन्मभिः सा च मध्यमे वोत्तमा सती ॥ अथैतासां मृते पत्यौ यागतिः सा
भिगद्यते ॥ २० ॥ तत्रोत्तमानुगा गेव स्वपत्युर्मरणात्स्वयम् ॥ विद्याद्दशि भिन्दिने चाऽस्मिन्मुहूर्ते ऽसौ मरिष्यति
॥ २१ ॥ आत्मनानि स्वजन्मानि पत्युर्जन्मानि चाऽप्य ऽसौ ॥ यथापूर्वं विजानाति सप्त वाप्यधिकानि वा ॥ २२ ॥ वि

वर्द्धमानसत्वानां मरणं क्वचित् दात्मनाम् ॥ अस्माप्य वपुर्मानरहिताजायते ध्रुवम् ॥ २३ ॥ चिताप्रवेशितदेहा
स्त्रीचः भागे व गच्छति ॥ देवलोके तत्रसाग्निर्दहत्यस्याः शिनः कलेवरम् ॥ २४ ॥ अतो दाहव्यघातस्मानायते
नैव किंचन ॥ नात्मघातस्यदोषोऽपि तस्मान्न वृत्तिनिश्चितम् ॥ २५ ॥ मध्यमा मरणार्थैव साध्वी भाग्यजन्मनात्म
नः ॥ यत्तु श्रेयः कं हि जानाति पत्या तादात्म्यमेति सा ॥ २६ ॥ वाह्यव्यथां चितायां सा प्राप्तशौर्यापि धैर्यतः ॥ अवि
कं चैव सहते रणे शूरस्त्वाऽव्रणा ॥ २७ ॥ कनिष्ठा तु न जानाति श्रायतन्मस्य धवात्मनो ॥ चिताप्रवेशं कुरुते
कैवलं लोकलज्जया ॥ २८ ॥ कामेन वा कुलानां तु पैत्र्यश्वाश्रुर्यवंशयोः ॥ जीवत्वं चाभिचारेण न वेदितिरेयेन
वा ॥ २९ ॥ वैधव्यधर्माचरणदुष्करत्वेन वा तथा ॥ सत्तु चादरनावेन स्वत्र्यातुर्या तिसा चिताम् ॥ ३० ॥ चितायां
दह्यते साच व्याकुला धर्मचारिणी ॥ एताः स्त्रीरूढयुक्तायाः स्वल्पलोकं व्रजंति हि ॥ ३१ ॥ तत्रोत्तमोत्तमं सौ
ख्यं मध्यमं मध्यमा तथा ॥ कनिष्ठं तु कनिष्ठायै -- सौख्यं तूक्तं क्रमात् ॥ ३२ ॥ पतिव्रताः सप्रोक्तास्तेतास्त्रिवि
धास्वपि ॥ यासामग्निप्रवेशस्य निषेधोऽस्ति वशामिताः ॥ ३३ ॥ भगवद्भक्तियुक्ता च या तानपुक्त विरागयुक् ॥ शा
क्ता चब्रह्मचर्यादि विधवा धर्मपालने ॥ ३४ ॥ मुमुक्षुर्वीरसूर्द्वैवा जापत्या च गर्भिणी ॥ अग्निप्रवेशो नैताभिः
कार्यः सेव्यो हरिः सदा ॥ ३५ ॥ पतिव्रतायां धर्मोपि द्विविधः परिकीर्त्यते ॥ केवलो नवधान्यश्च वासुदेव ॥६४॥

स्वचाऽन्वितः ॥ ३६ ॥ तत्राद्यस्य फलं प्रोक्तं सतीलोकाप्तिलक्षणम् ॥ द्वितीयस्य फलं ज्ञेयं गोलोकप्राप्तिलक्ष
णमम् ॥ ३७ ॥ लक्ष्मीतुल्यं सुखं तत्र प्राप्नोत्यनुपमं सती ॥ तद्भर्त्तापि न वै तत्र पार्षदप्रवरः प्रभोः ॥ ३८ ॥
पतिव्रतास्तथा धर्मं वच्म्यथ विप्र स्त्रियो द्विज ॥ स्त्रीगुर्वंऽस्तु श्रुतानां तु धर्माः सामान्यतस्त्विमे ॥ ३९ ॥ विशे
षधर्मस्तासां च कृष्णायानर्पितं तु यत् ॥ तत्किंचिदपि नैवाऽऽत्तुं पत्रप्रवाला पदं क्वचित् ॥ ४० ॥ स्वसंबंधीतर
नरस्पर्शनावीक्षणादि च ॥ न कार्यमिति तासां च विशेषो धर्म ईर्यताम् ॥ ४१ ॥ इति ते कथिता मया भूपाः स
धवानामिह योषितां द्विज ॥ सहिताः स्वफलैरथ ब्रुवे विधवानामपि तान् शृणु तः ॥ ४२ ॥ इति श्रीसत्संगि
जीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे स्त्रीधर्मेषु पतिव्रताभेदतद्धर्मफलनिरू
पणं नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ श्रीनारायणमुनिरुवाच ॥ विधवा कवरीबंधो भर्तृबंधाय जायते शि
रसो वपनं तस्मात्कार्यं विधवया द्विज ॥ १ ॥ रक्षेत्केशान्यदि तदा जटा तु स्यान संस्कृताम् ॥ रक्षेत्तन्मुंड
नं कार्यं तीर्थे वा शुभपर्वणि ॥ २ ॥ एकाहारः सदा कुर्यादिनांते साल्वऽनापदि ॥ संगो च धर्महीनानां साकं
यां योषितामपि ॥ ३ ॥ पर्यंके न स्वपेन्नारी रोगाद्यापदमंतरा ॥ नग्नास्नानं न कुर्याच्च स्नानेऽको धं तु हर
तः ॥ ४ ॥ तैलाभ्यंगं न कुर्वीत विधवाऽनापदि क्वचित् ॥ गंधद्रव्यस्य संयोगो नो योग्यो नैव कार्यस्तथा ॥ ५ ॥ ना

॥ स॰जी॰पं॰६ ष्ठिशेहेस्नद्गाहस्नातैः केवगतैरपि ॥ मार्द्रकंमक्षयेन्नैव नतांबूलं च कर्हिचित् ॥ ६ ॥ नचाऽऽतिनो जनं अ॰३३॥
॥ ६५ ॥ कुर्याच्छरीरे धातुवर्द्धकम् ॥ नास्ति स्त्रीयास्य यः सर्पिर्विनाऽऽपदमसौ कचित् ॥ ७ ॥ मिष्टान्नं नातिभुं
जीतलनाद्याद्वत्तेन कंनया ॥ न द्ध्यादि यवसनेनच कौकुनमं शुकम् ॥ ८ ॥ पुष्पस्त्रजेनैवं दर्नं च शीलान्
सिंदूरमंजनम् ॥ नद्ध्याद्दालक्तकारग्नुधातुयुक्तं च नावरम् ॥ ९ ॥ हरेः प्रासादिकमपि सौभाग्यद्रव्यं नैव द
नम् ॥ अंगुलीयगलेद्धाम्नलंगे वलिकादिषु ॥ १० ॥ न यावा प्रासादिकमपि हरेः पुष्पस्त्रगादिसा ॥ कंगदौ
धारयेन्नैव भक्त्याऽऽप्याय विसर्जयेत् ॥ ११ ॥ न च कस्माति वस्त्राणि चित्राणि न धारयेत ॥ कंचुकं प्रारद
धाम्नो वासो वा विकृतं कचित् ॥ १२ ॥ न रंजयेत्पाणिपादं दंतांश्च नखरानपि ॥ नगधारयेत्कुंकुमं न नक्र
र्णजालपत्रिकाम् ॥ १३ ॥ न वै स्फटाम्फनीवेषं न पुंवेषं च कर्हिचित् ॥ संन्यासिन्या न वेषं च न नर्तक्याश्च
धारयेत् ॥ १४ ॥ नोत्सारयेद्भ्राज केशान्न च व्यर्थं परिभ्रमेत् ॥ नोपवेष्टुं नान्यगृहे गच्छेत्काकिनी कचित्
॥ १५ ॥ न हस्याप्यनपित्रादेरुत्संगे काप्युपाविशेत् ॥ स्वाश्रुर्यवस्त्रैश्च पक्षे नोपहासं न चोपवदेत् ॥ १६ ॥ न ग्राम्यं
धर्मवार्त्तां च मातुरग्रे वदेत्स्नुषा ॥ न चान्यपोषितोऽप्यग्रे वार्त्ताः शृंगारिकाश्चरेत् ॥ १७ ॥ न हीसौ क्रीडनेकु
र्याचाऽपत्याद्यान्नदेत्कचित् ॥ मिथ्यापवादेन वदेत्तया ग्रामं सिंचनैव स्त्री ॥ १८ ॥ न कंसुत उत्तरपक्षीयैर्निर्ल ॥ ६५ ॥

ज्जारंभाचरेत् ॥ न चापदुपयाना नार्यां मैत्रीं न चासरेत्स्नुसा कुर्यात्कदाचन ॥ १९ ॥ न च्यापरिव्राजकपाहस्याद्धी
पुंसयोरपि ॥ मूजद्वरजात्याश्च मैत्रीं नैवाचरेत्स्नुसा ॥ २० ॥ न च वश्यान काद्रुत्याणपाषंडिन्यां च योषिता ॥
अवतारेषु विष्णुस्तया हरेश्चतयासह ॥ २१ ॥ निर्लज्जयौ विपधिविद्या मैत्र्यं च तु पातया ॥ मैत्रीं न गर्भ
पातिन्या कुर्यात्साधूर्तयानच ॥ २२ ॥ अपि सस्तस्य पुंसश्चिद्हे नारी पतिव्रता ॥ नवेत्सद्यपि तद्देहेन गच्छे
त्तां समीक्षितुम् ॥ २३ ॥ स्वतोऽतिनीचजातेश्च धर्मकृत्याद्यपि स्त्रिया ॥ उपवेशंगृहे नैव गच्छेन्नारी विभर्त्तृ
का ॥ २४ ॥ जीविकार्थात्र पर्यासं धनं स्यादात्मनस्तु पमत् ॥ न कुर्यादुद्यम कार्यपिप्यपं तत्स्य कदाचन ॥ २५
॥ अप्येहत्तेत्तुसा नारि नीविकार्थं परगृहं पात ॥ अशानवेश्मौ पधर्माज्ञं शायोनाऽऽचविरात्ते ॥ २६ ॥ विवाहं
पीयूसार्थं च नृत्यं गीतं न नोत्सवम् ॥ दृष्टुं न गरेच्छेद्विधवा स्कवेषं पुरुषं तथा ॥ २७ ॥ पत्रं पन्मुखं च नाऽऽदृशे
त्तत्रेत्रेकाकिनी कचित् ॥ स्वच्छेदे पुरुषान्नैव वीक्षेत क्रीडतः कचित् ॥ २८ ॥ कामान्धेक्षेत पुरुषं न स
भाषेत न स्पृशेत् ॥ न तद्वार्त्तां च शृणुयात्तच्छालाया कर्थां विना ॥ २९ ॥ आघ्राऽऽत्युग्मे तु नीलाद्या वा पदिस्प
र्शं आपणे ॥ पुंसोज्ज्वालेत्तु नैव स्यादेहोपोऽपस्तनस्य च ॥ ३० ॥ धौतन्यकं च धौताईन वीनं चाप्यकं विना ॥ पुंसो
धार्यस्यज्योन्नैव नरंगस्य चनांशुकम् ॥ ३१ ॥ न तुं समुच्चिते नकुर्याद्दर्पे कामनावनः ॥ निजिरवेत्स्यशेछि

॥स॰जी॰पं॰ वं पुत्तलेशामप्यधर्मिंच ॥३२॥ बुद्धिपूर्वं नवीक्षेत पशुपक्ष्यादिमैथुनम् ॥ स्थित्वापि स्वकार्येऽत्र पुंसां मैत्रं तु ना- अ॰ ३३॥
॥६६॥ चरेत् ॥३३॥ पुंसो मूत्रमलोत्सर्गं स्थले कुर्यान्न तत्क्रियाम् ॥ पुंसो दृष्ट्वा निर्जरं हि निवधीक्षेत तु न क्वचित् ॥३४॥
अवदंती नरं नैव बोधयेत्करदृग्भ्रूभिः ॥ पृष्टापि पुंसा मौनयुक्ताऽगविधवा धर्मसंस्थिता ॥३५॥ धनुर्मानान्तरेणै-
व पुंसो दूरं व्रजेत्सदा ॥ देवालयात्राधमहेऽरण्ये स्पर्शं पुंसां त्यजेतो वसुः ॥३६॥ यत्रो ह भूमिकायां तु कन्यायाः सुरुषो
गृहे ॥ निद्रां न तत्र स्वपेन्नैकान्ते तदधोऽपि वा ॥३७॥ पुंसः स्मारकं पदं तु ... स्वप्नसक्तिर्नोपविशेत्क्वचित् ॥ चा-
पल्यं करपादस्य न कुर्याद्रंगपर्वणाम् ॥३८॥ येन त्यक्ताः सर्वपक्षा ... पुंसा न केनचित् ॥ स्त्रियामपि हरेन्न
स्मैनदृष्ट्वा नाददीत तत् ॥३९॥ सबंधुनापि चैकेन पुंसा सह पथि क्वचित् ॥ नारण्ये विधवा नैव चलेन्नेकेन्नोपवि-
ष्टो दूरं ॥४०॥ नापणा स्पर्शनवीक्षादि पुंसो यत्तु निषेधितम् ॥ तत्राः चासन्नसंबंधि पुंस्योऽन्यत्राः स्वगम्यतान्
॥४१॥ पिता भ्राता पितृव्यश्च तत्सुतास्तत्सुतादयः ॥ मातामहो मातुलश्च तत्सुतास्तत्सुतादयः ॥४२॥ मातृष्वसु-
ः पतिः पुत्रास्तथा पितृष्वसुः पतिः ॥ तत्सुता गुरु तत्सुता वनानन्दाता च तत्सुतः ॥४३॥ भ्रातृकस्य श्वशुर-
स्तथा ॥ ज्येष्ठश्च देवरास्तेषां पुत्राश्च दौहित्रा दुहितृपतयस्तथा ॥४४॥ पुत्रपौत्रादयः सप्तैते संबंधिनो मा-
ताः ॥ तत्स्पर्शनावलोकाः कनरोऽपि यदि धार्मिकाः ॥४५॥ न कपाटाकृते गेहे विजने वाऽप्यजे क्वचित् ॥ स्वपित्रा ॥६६॥

पि सह ग्रामान्तविधवैकाकिनी ध्रुवम् ॥४६॥ असंबंधिजना एते पापिनो विमुखाः प्रभोः ॥ यदि स्युस्तर्हि ता-
न्नैव भाषयेत्तु न तान्स्पृशेत् ॥४७॥ दिवाला भ्रापितः साध्वीनिष्कामव्रतरक्षणम् ॥ पोषकं त्वाश्रयेदन्यापि
तु भ्रातृकर्तुः समम् ॥४८॥ पितृवत्सा पोषयेद्यः स्वधर्मं च परिपालयेत् ॥ स एव हि पिता तस्या नोक्तो न स्वध-
र्मस्य घातकः ॥४९॥ भ्रातृवत्सापि पोषयेद्यः स्वधर्मं च परिपालयेत् ॥ भ्राता स एव हि प्रोक्तो न स्वधर्मस्य घा-
तकः ॥५०॥ पुत्रवत्पोषयेद्यः स्वधर्मं च परिपालयेत् ॥ पुत्रः स एव हि प्रोक्तो न स्वधर्मस्य घातकः ॥५१॥
शरीरसंबंधहीना अपि ते धर्मरक्षकाः ॥ पित्रादितुल्या विज्ञेया भिन्नवर्णा अपि ध्रुवम् ॥५२॥ तत्स्पर्शना-
वलोकास्य स्पर्शनं तासामपि ॥ विधवाया धर्मवत्या दोषो नास्त्येव निश्चितम् ॥५३॥ पितृभ्रात्रादयो यस्मा-
न्न स्युः संबंधिनो जनाः ॥ साधर्मरक्षामिलु श्रितराज्ञे यद्धर्मरक्षणम् ॥५४॥ स्वतंत्रा न भवेत्क्वापि नारी धर्मप-
रायणा ॥ तातेरभावे राजानमाश्रयेद्धर्मरक्षकम् ॥५५॥ जातिभ्रंशकरं कर्म किंचिदप्याचरेन्न सा ॥ जातिभ्र-
ष्टिर्यतो हेतुर्बुद्धिशुद्धेरुदीर्यते ॥५६॥ अथ यस्या जीविका तु क्रयविक्रयकर्मणा ॥ कृषिसेवादिना वा स्या-
त्तस्या निर्णय उच्यते ॥५७॥ आपणे स्वत्रीनं पुंसो व्यवहारेऽत्र चेद्भवेत् ॥ तावकालं तु तत्कुर्यात्तु तन्मानी
विकामता ॥५८॥ कुलोचितं न चेत्कुर्याद्व्यवहारं स्वजीवने ॥ पराश्रया तदा श्रेष्ठा सा निष्कामव्रताद्भवेत्

॥ स॰जी॰पं॰
॥६७॥

५९॥ यो विष्णोः पूजनं कार्यं यथा लब्ध्योपचारकैः ॥ मनसि प्रतिमां वापि तैर्योनर्चा सएव च ॥६०॥ तन्नाम अ॰३४॥
मंत्रस्य जपं कुर्यान्नित्यं स्वशक्तितः ॥ द्विवारं नैव कार्यं भुक्तमत्र यो हरिरेव हि ॥६१॥ कृतो कृत्स्नतके रोगे मा
नसं त्वं रक्षेनं हरेः ॥ स्वयं कुर्याद्दात्तु पुंसां कारयेदन्या योषिता ॥६२॥ आवश्यके रोगे दाकार्यं कृत्वा मास क
लं कृदिनम् ॥ भक्तिमेव हरेः कुर्याद्व्यर्थं कालं तु न क्षिपेत् ॥६३॥ न मत्स्य पेयस्या पतिना च वर्णिना मना सम
स्यस्य जनस्य च हि न ॥ अन्नं कृत्वा पद्य विधर्म संस्थिताय न दक्षणान्न उपतिर्विमतिः शुभाः ॥६४॥ इति श्रीस
त्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे स्त्रीधर्मे पुरंध्रिधवानां कवरीवैधवर्ज
नादि धर्मनिरूपणनामा त्रयस्त्रिंशोऽध्यायः ॥३३॥ श्रीनारायणमुनिरुवाच ॥ एकादशी स्तथा जन्माष्टमादी
नि व्रतानि च ॥ नित्यानि कुर्यात्तत्राश्वौ वासरे वस्पसादरम् ॥१॥ धर्मनिष्ठा व्रतान्येव सा तु कुर्यान्निरंतर
म् ॥ त्रिरात्रं पंचरात्रं वा पक्षव्रतमथापि वा ॥२॥ मासोपवासं वा कुर्याच्चांद्रायणमथापि वा ॥ कृच्छ्रं पराकं
वा कुर्यात्तत्र कृच्छ्रमथापि वा ॥३॥ यथाग्नेर्वा फलाहारैः पयोव्रतैः ॥ प्राणपात्राम कुर्वीत तथा वत्मा णेः स्वयं
व्रजेत् ॥४॥ वैशाखे कार्तिके माघे विशेष नियमाश्चरेत् ॥ स्नानं दानं तीर्थयात्रां विष्णोर्नाम जपं मुहुः ॥५॥
वैशाखे जलं कुंभांश्च कार्तिके घृतदीपकान ॥ माघे धान्यतिलान्दद्यात् विधवा सिति नित्यं वे ॥६॥ यथा कार्या ॥६७॥

च वैशाखे देवे देयागलंतिका ॥ उपानच्छत्रनं चंद्रं सूक्ष्मवासांसि चंदनम् ॥७॥ सकर्पूरं च तांबूलं पुष्पदाम
तथैव च ॥ जलपात्राण्यनेकानि तथा गृहाणि च ॥८॥ पानानि च विधित्राणि द्राक्षा रंभाफलानि च ॥ तथा देया
नि विप्रेभ्यः पतिर्मे प्रीयतामिति ॥९॥ उर्जेयवान्नमश्नीयादेकान्नमथवा पुनः ॥ वृंताकं सूरणं चैव शूककिं
बी च वर्जयेत् ॥१०॥ कार्तिके वर्जयेन्मधु कार्तिके वर्जयेत्कांस्यं कार्तिके शुक्तसंततम् ॥
११॥ कार्तिके मौननियमे घंटां चारुं त्रदापयेत् ॥ पत्रभुक्कांस्यपात्रं घृतपूर्णं द्विजाय च ॥१२॥ भूमिशय्यां व्र
ते देयाः शय्यास्तरणसतूलिका ॥ फलत्यागे फलं देयं रसत्यागे च तद्रसः ॥१३॥ धान्यत्यागे च तद्धान्यमथ
शाल्यः स्मृता ॥ धेनुं दद्याद्वय्यत्नेन सालंकारां सकांचना ॥१४॥ एकतः सर्वदानानि दीपदानं तथै
कतः ॥ कार्तिके मासि तत्तस्मात्कर्तव्यं सर्वथा मतम् ॥१५॥ किंचिदभ्युदिते सूर्ये माघस्नानं समाचरेत् ॥ यथा
शक्त्या च नियमान्माघस्नात्री समाचरेत् ॥१६॥ पक्वान्नैर्भोजयेद्विप्रान्यतीन्वोपितमतिस्थितः ॥ लड्डुकैः फे
णिकाभिश्च वटकैर्घृपुरादिभिः ॥१७॥ घृतपक्वैः समरिचैः शुचिकर्पूरवासितैः ॥ गर्भे शर्करया पूर्णैर्नेत्रानं
दैः सुगंधिभिः ॥१८॥ शुष्केंधनानां भारांश्च दद्याच्छीतापनुत्तये ॥ कंचुकं तूलगर्भं च तूलिकां सोपधानि
काम् ॥१९॥ मंजिष्ठारक्तवासांसि तथा तूलवती पटीम् ॥ जातीफललवंगैर्लातांबूलानि बहून्यपि ॥२०॥ कं

॥ स०मी०पं० ॥ वस्त्रांश्चित्रवर्णांश्च नितान्तानि रत्नानि च ॥ मृदुजाः पादरक्षाश्च गंधोद्वर्तनानि च ॥ २२ ॥ दानानि द- अ० ३५ ॥
॥ ६८ ॥ त्तीसा च दाने नानेन मसदा ॥ भर्तृस्वरूपो भगवान्प्रीयतामिति चोच्चरेत ॥ २३ ॥ एवं विधैश्च विधवा विविधै-
र्नियमैर्वृतः ॥ वैशाखान्कार्तिकान्माघान्यथाशक्त्यतिवाहयेत ॥ २३ ॥ व्रतोपवाससंहीना तु नारी स्वस्थान-
वे फलम् ॥ कामाकुला स्यात्स्वयथात्पूर्णेमासिम्पुनीकमा ॥ २४ ॥ श्रृणुयाच्छास्त्रकथां च कदुर्धर्मपरायणा-
त ॥ उपवित्रपस्त्रीसमसापाजयंतीनिर्जव्रतम् ॥ २५ ॥ कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत ॥ अस्वर्ग-
लोकविद्विष्टं धर्ममप्याचरेन्न तु ॥ २६ ॥ एतान्धर्मांश्च या नारी चिंतयंती मृतं पतिम् ॥ पालयेत्सा सती लो-
कं प्राप्नुयाद्दिसभर्तृका ॥ २७ ॥ कृष्णमेव पतिमात्मनस्क्यचिंतयेत्स्वविरतेभनेच्च तम् ॥ संस्थिता च निज-
धर्मवर्त्मनि तत्स्वदेहि जन्मेन सापरम् ॥ २८ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्र-
करणे धर्मोपदेशे स्त्रीधर्मेषु विधवानां व्रतविशेषविधिनिरूपणनामा चतुःत्रिंशोऽध्यायः ॥ ३४ ॥ श्रीनारा-
यणमुनिरुवाच ॥ विधवायाः क्वचिद्धर्मच्युतौ वयः स्वनिष्कृतिम् ॥ यां कृत्वा सा शुध्येत्सुवर्णत्स्वधर्मकृज्जमुत्तम-
म् ॥ १ ॥ कवरीबंधनं नारी पर्यंकशयनं तथा ॥ धर्महीनस्त्रियाः संगं कुर्याद्देकमुपोषणम् ॥ २ ॥ दर्पणे जने
तथा क्रोधेन ग्रस्तानं तिनो जने ॥ तेजासंगेहृते च स्त्री कुर्या ॥ ३ ॥ गंधद्रव्योपभोगे च स्त्रपनारोहणे तथा ॥ ६८ ॥

अतिसर्पिः पयः पाने कुर्या० ॥ ४ ॥ उत्तेजके तिमिश्रान्नेतां बुलेभार्दके तथा ॥ भक्षिते सा तु विधवा कुर्या० ॥ ५
द्विषे सूक्ष्मे तथा चित्रे कौसुंभे चांशुके धृते ॥ कंचुके च तेनारी कुर्या० ॥ ६ ॥ विकृते च धृते वस्त्रे पाणिपदं
स्वरंजने ॥ सिंदूरकुंकुमधृतौ कुर्या० ॥ ७ ॥ पुष्पस्रजश्चंदनस्पर्शाख्यानां मे मननस्य च ॥ धारणे नालयाश्च कु-
र्या० ॥ ८ ॥ विद्युमसाद्विगंधादेर्लजादारौ धृतावपि ॥ नादृकफषस्वनस्त्रागे कुर्या० ॥ ९ ॥ धातुयुक्तां वरधृ-
तौ धातलंजंकारधारणे ॥ कवासिनीवेषधृतौ कुर्या० ॥ १० ॥ कवासिनीवेषधृतौ नर्त्तकीवेषधारणे ॥ पुं-
वेषस्य धृतौ च स्त्री कुर्या० ॥ ११ ॥ नालकेत्रोत्सारने च विना कार्यं परिश्रमे ॥ परगेहोपवेशने च कुर्या० ॥ १२ ॥ येत्र
पक्षोपहासो-कौपित्रुसंगोपवेशने ॥ स्त्रीवाग्रिग्राम्यधर्मोक्तौ कुर्या० ॥ १३ ॥ श्रवणे कीर्त्तने च स्त्रीशृंगार
कथासां कृते ॥ गाजिराने च विधवा कुर्या० ॥ १४ ॥ अपशब्दोच्चारणे च होलिकोत्कीर्त्तने तथा ॥ मिथ्यापवादे
च कृते कुर्या० ॥ १५ ॥ निर्लज्जवादेश्याशुर्थैः कृतेषोपापदुपया ॥ स्त्रियामैत्रीं कृत्वा सा कुर्या० ॥ १६ ॥ परि-
व्राजिकया कुल्यानीच मान्याच योषिता ॥ मैत्रीं कृता पां कामुक्या कुर्या० ॥ १७ ॥ पापेदिव्याय वन्याचमंत्रंयं
च विदा स्त्रिया ॥ मैत्रीं कृता याँ नास्तिक्या कुर्या० ॥ १८ ॥ निर्लज्जया पृथिविदागर्भे आधूर्त याच सा ॥ मैत्रीं कृ-
तायां विधवा कुर्या० ॥ १९ ॥ पतिव्रतेस्यापुंसो ग्भित्रान्सग्रहेगतौ ॥ कृता पां विधवा नेक्ष्र कुर्या० ॥ २० ॥ न स

॥स·जी·पं०
॥६९॥

गीतोद्गारहसार्थं च वेषपुरुषोऽन्यवान्॥ दृष्ट्वा हृत्वेतु गमने कुर्यात्॥२२॥ कीर्तितां वीक्षणे स्वैरं पुंसा त्वेका कि श्री·३५॥
नीगतो॥ कामात्तु पुरुषे वेक्षां यां कुर्यात्॥२३॥ पुंरूपगुणवार्त्तानां श्रवणे कीर्तने तथा॥ पुंसोंगस्पर्शने च स्त्री
कुर्यात्॥२३॥ धौतादि भिन्न पुंवस्त्रस्पर्शे पुंसा च भाषणे॥ पीले च ऊष्णसे कल्पे कुर्यात्॥२४॥ पुंसश्चित्रे च लिखि
तेस्पृष्टे मैथुनि पुत्रजे॥ स्वकार्यसिद्धे पुंमैत्री कुर्यात्॥२५॥ पशुपक्ष्यादियमने पुं गुत्रीत्वमसमीक्षिते॥ करहस्त
म पुं वीधे कुर्यात्॥२६॥ पुंदृष्ट्यास दृहस्वे धेपुंश्रीसुजनस्थले॥ नक्रिया करणं नारी कुर्यात्॥२७॥ धनुर्मानान्तं
तरे गांगतो पुंसीति कैतवा॥ अनापरिहृतानां सा कुर्यात्॥२८॥ ऊर्ध्वं वा धः पुमान्यत्र कक्षः स्यान्नि वि त
हस्ते॥ एकाकिनी त्वयेद्यासा कुर्यात्॥२९॥ पुंसमाहरूपच्छन्नं रसक्षिप्तियोपविशेत्तथा॥ सांगवाप्यकत्रीच
कुर्यात्॥३०॥ पितृश्वा भ्रात्रर्थं संगुप्तयव हार विधायने॥ आदर्शे च मुखेक्षां यां कुर्यात्॥३१॥ सदृपाने कृत्वते पू
नादं धूत्वा स्विवर्त्मनि॥ रहः स्थानोपवेशे च कुर्यात्॥३२॥ मानसस्नाऽथावाद्यसपुनः स्नाः कृतो हरः॥ स्व
कृतो निसृजाप्य स कुर्यात्॥३३॥ आवश्यकं गेहकार्यं विना नक्तिं च ससतेः॥ अर्थं कालातिक्रमे च कुर्यात्॥
३४॥ गेहद्वारान्तरे कश्चित्स्त्र वितृणा प्रपुमान्बहिः॥ निर्गच्छेत्तत्र चेकान्ते चेत्कुर्यात्॥३५॥ यत्रैकासा स्वयं तत्र
तिष्ठेद्देस पुमांस्त्वयः॥ आक्रोशप्रहरप्येतं चेत्कुर्यात्॥३६॥ निकासये न्न चेत्तुस्वयं तत्रस्थितामवेत् तर्हि ॥६९॥

सानुयकुर्वीत चतुर्दिने नुपोषणम्॥३७॥ स्वप्ने पुरुषसंगे च कुर्यादेकमुपोषणम्॥ तत्रस्व वैधुसंगे तु पाद
कृच्छ्रव्रतं चरेत्॥३८॥ स्वधर्मनस्य यथं हृत्वा जीविकार्थं तनश्चरेत्॥ यात्मसेवां च नैर्ख्यं वासा वांछायणमाच
रेत्॥३९॥ जीविकार्थं कृपादौ च पुंस्पर्शोऽस्त्रा ततः शुचिः॥ भाषणे तु जपेद्विष्णोर्नाम स्त्रां पंचत्रातं च सा॥४०॥
करीषद्वणमृत्का श्रगोमयापारुतौ च सा॥ आवश्यके तु पुंस्पर्शे जाते स्नानाद्विशुध्यति॥४१॥ स्वसंबंधिनराणां
च कामात्क्वापि समीक्षणे॥ जाते वाभाषणादौ च निष्कृतिर्हि गुणोदिता॥४२॥ एकपत्नीव्रतस्यागीमृताः स्त्रियः
शरणागतः॥ अति सुरय विश्वासी पुमान् सः पदिमे तु मे॥४३॥ तत्रैकस्य सकृज्जासे संगे च वंदिनां तरे पि वि
ल्लिर्जवणान्स्नं कृत्तः शुद्धेतु सा ऽबला॥४४॥ धारणा पारणा खेऽस्मि व्रते भोजन वासरे॥ एकमन्नं तु वा ग
व्यायारशाक्तां सैंधवान्वितम्॥४५॥ अन्नद्वयं सलवणं न शाकान्तु भक्षयेत्॥ उपवासादिने त्वं बुसापिबेत क
मेव वा॥४६॥ क्रियमाणे व्रते यर्हि रोगोद्यापदि हापतेत्॥ तर्हि तस्याव्यपगमे व्रतशेषं समापयेत्॥४७॥ वर्ष
व्रते त्वशौचेऽन्या स्त्रीपार्दोन व्रतमाचरेत्॥ असशक्तात दर्द्धं वा तर्द्धं वा ततः शुचिः॥४८॥ स्वाप्य श्चित्तमिदं प्रोक्तास्वपा
पैविदिनं जनैः॥ रहस्यमेव वक्ष्यामि तिरस्कृतं शास्त्रसंमतम्॥४९॥ विष्णोर्मूर्तिं पुरो ध्यायन्निनिमेषविलोचना
॥ स्थासना जपेन्मंत्रं मौनयुक्त चतुरक्षरम्॥५०॥ सहस्राणपरं च हं पंच साधगमासांतु अपि सम्यग्जुपाजपांते भोज

नं कुर्यादेकवारं जितेन्द्रिया ॥५१॥ एकपत्नीव्रतादीनुत्राशयाः पुंसत्वियोषितः ॥ व्रतं यत्क्षयितं तत्र तत्तदन्य 
ना ग्रहमीरितम् ॥५२॥ अज्ञानान्मद्यपाने च तथामांसाशने कृते ॥ स्तेये स्ववर्णस्य चैव कृते चान्द्रायणं चरेत्
॥५३॥ प्रायश्चित्तं लिह प्रोक्तं धर्मशास्त्रेऽस्ति वै महत् ॥ कलौ कर्तुमशक्तां तत्तत एतावदीरितम् ॥५४॥ एका
हिकेऽघिते ऽन्ने शाकमूलफलेऽदले ॥ कृते च धविड्घातादौ एकं दिनमभोजनम् ॥५५॥ दिनद्वयं तु वत्सेनि
शान्ने च घृते हुते ॥ एवमन्यत्र वित्तियें प्रायश्चित्तं प्रयोचितम् ॥५६॥ लिक्षायूकामत्कुणादिसूक्ष्मजन्तुवधेतु
सा ॥ अज्ञानतः कृते नारी कुर्यादेकमुपोषणम् ॥५७॥ सुषकादिवधे नाते क्वाप्यज्ञानाच्च सा ऽञ्चरेत् ॥ उ
पवासद्वयं नारी कीर्तयेत्सम्भिधां हरेः ॥५८॥ इतरेतरजीवानां ज्ञात्वाल्पं महदल्पताम् ॥ प्रायश्चित्तं तयाकु
र्याद्देशकालादिवीक्ष्य च ॥५९॥ आत्मघातो कृते नार्या मुक्तैव पमयातया ॥ जायते तामसी चैव प्रेतसर्पादियो
निषु ॥६०॥ एकादशीं नो च हरेर्जन्माष्टम्यामनापदि ॥ उपवासान्न चरणे कुर्याच्चान्द्रायणव्रतम् ॥६१॥ पतितो व
र्तिश्चान्नैर्भुक्तेऽन्नाद्यमिणस्तथा ॥ अज्ञानादपि कुर्वीत व्रतं चान्द्रायणाभिधम् ॥६२॥ मातिश्रेष्ठां करे कर्मण्यज्ञा
नाच्च कृते सति ॥ चान्द्रायणं प्रकुर्वीत स्मरंती हरिमेव सा ॥६३॥ अज्ञानतः सकृज्ज्ञाते व्रतभंगे मयोदितम् ॥
प्रायश्चित्तमिदं ज्ञेयं सर्वत्रापि न चान्यथा ॥६४॥ प्रायश्चित्तोपवासेषु भगवन्नामकीर्तनम् ॥ दिवा रात्रौ च कर्तव्यं ॥७०॥

तेन पूर्णं फलं भवेत् ॥६५॥ प्रायश्चित्तोपवासेषु त्वेकादश्याः स्वरूपोपणम् ॥ गणयेन्नैव नारी च प्रायश्चित्तं प्र
कुर्वती ॥६६॥ शुचपर्वोपवासेष्वेकादश्याः समुपोषणे ॥ प्रातः स्नानार्हतं कुर्यात्तृतीये वासरे पृथक् ॥६७॥ प्राय
श्चित्तोपवासे च क्रियमाणे पुनर्यदि ॥ आपतेदुपवासोऽन्यः कुर्यान्नैत्रेण तेन तत् ॥६८॥ प्रायश्चित्तोपवासाहे नीर
तस्केतरमान किंचिदश्नीयाद्दधि वा फलमूलादपि क्वचित् ॥६९॥ व्रतभंगे तु या नारी प्रायश्चित्तं करिष्यति ॥ गोलो
के त्राप्स्यति क्स्वं सा रमायाः समं महत् ॥७०॥ न करिष्यति या त्वेतत्कुर्वती वा निषेत्स्यति ते ॥ उभे निरयं क्लेशा
हर्यातानुस्मृतो यमः ॥७१॥ यमयातनया दोषो क्षीणस्त्वनुचरान् हरेः ॥ नेनयिष्यन्ति गोलोके विमानेनाऽकरे
विषा ॥७२॥ विष्णुभक्तिः कृतास्यैव तास्याप्राप्तिति तेतुभे ॥ दासीत्वं प्राप्स्यतो जस्मात्तत्र धाम्नि स्मरीरितम्
७३॥ याजयंती निजान् धर्मान्विष्णुभक्तिविवर्जिता ॥ प्रायश्चित्तं चरेद्याखी सा सती लोकमाप्नुयात् ॥७४॥
प्रायश्चित्तं नाचरेद्या सा तीव्रायमयातनाः ॥ भुक्त्वा शूद्रात्तती याति सती लोकं न संशयः ॥७५॥ इतीरिता विप्रविभि
न्नकाणां धर्मा मयात्तच्छ्रुतिनिश्चितं च ॥ प्रोक्तं च वेश्याग्रस्त्रिजयोषितां ते साधारणं रूपमसमर्चनं च ॥७६॥
इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे स्त्रीधर्मेषु विधवाधर्मभंगे प्राय
श्चित्तनिरूपणनामा पंचत्रिंशोऽध्यायः ॥३५॥ श्रीनारायणमुनिरुवाच ॥ निशम्य श्रीवासुदेवस्य पौत्राभिः इज

॥स॰ग्री॰पं॰ ॥५१॥

नमुरः ॥ कर्त्तव्यं तस्य च विधिं कथयामि समासतः ॥१॥ प्रातःशुद्धांबुना स्नात्वा धौतं धवलंशुकम् ॥ वसित्वा
ऽऽचमनं कृत्वा शृंगाराद्यानि साधयेत् ॥२॥ उष्णं जलं पात्रं च गालितं निर्मलं जलम् ॥ तथाऽऽचमनपात्रं
च देवस्य पानभाजनम् ॥३॥ चंदनं चाक्षतान्पुष्पं धूपदीपं निवेदनम् ॥ मुखवासं दक्षिणां च नीराजनमुपाहरे
त् ॥४॥ शालग्रामो नार्चनीयः स्त्रीभिः सर्वाभिरप्यतः ॥ प्रतिमापूजनं ताभिः कर्त्तव्यमजापतेः ॥५॥ नस्पृष्टेनोद
केनन कुर्यात्स्नपनं हरेः ॥ न चाचमनं शिष्विन पादशौचं तेन चांबुना ॥६॥ घृतेन दीपं कुर्वीत तिलतैलेन वाऽर्च
ने ॥ पूजोपहारजातं तु मंत्रमुदीरयेत् ॥७॥ पूजायां क्रियमाणायां स्त्रीनभाषेत चाऽन्यया ॥ नतत्स्थलेन पश्येत्प्र
च्च क्रोधं कुर्वीत न क्वचित् ॥८॥ उपविश्य शुचिस्थाने पुनराचम्य सा हरिम् ॥ आस्थापयेत्ताजिकाभिर्घाना दे
नवासनः ॥९॥ उत्तिष्ठोत्तिष्ठ गोविंद उत्तिष्ठ गरुडध्वज ॥ उत्तिष्ठ कमलाकांत त्रैलोक्ये मंगलं कुरु ॥१०॥ इत्या
प्य प्रतिमामेवं हरेर्वस्त्रेण मार्जयेत् ॥ सिंहासने तां मृदुले स्थापयेद्वा करेऽङ्के ॥११॥ शैली दारुमयी लोही ले
प्या लेख्या च सैकती ॥ मनोमयी मणिमयी प्रतिमाऽष्टविधा स्मृता ॥१२॥ प्राङ्मुखोदङ्मुखा वापि प्रतिमा सन्मुखः
स्थाऽथवा ॥ स्वस्तिकासनमासीना ध्यायेत्स्वहृदये हरिम् ॥१३॥ कोटिकंदर्परुचिरे दिव्यसिंहासने स्थितम्
॥ द्विभुजं च घनश्यामं किरीटिकंदर्पसुंदरम् ॥१४॥ अनेकदिव्याभरणं पीतकौशेयवाससम् ॥ मुरलीं वादयंतं

श्र॰ ७३६ ॥५१॥

च स्थितं राधारमायुतम् ॥१५॥ उपास्थितं च धर्मेण वामे शुभ्ररुचाऽग्रदरात् ॥ उपास्यमानं भक्त्या च गारुत्मेहे
न दक्षिणे ॥१६॥ अनेकदिव्योपहारैः पूजितं देवतागणैः ॥ सेव्यमानं पार्षदैश्च छत्रव्यजनचामरैः ॥१७॥ एवं
विधं स्मरेद्देवं ध्यात्वा स्वहृदयांबुजे ॥ स्वेष्टैरनेकोपचारैर्मानसैस्तं समर्चयेत् ॥१८॥ आवाह्य प्रतिमायां तं
पयाज्ञव्योपचारकैः ॥ श्रीकृष्णायनम इति षडर्णमनुनाऽर्चयेत् ॥१९॥ आवाहनमासनं पाद्यमर्घ्यमाचम
नीयकम् ॥ स्नानं वासश्चांबरं च पुष्पं धूपं च दीपकम् ॥२०॥ नैवेद्यं मुखवासं च दक्षिणां च क्रमेण सा ॥ नीराज
नं मंत्रपुष्पं समर्प्य प्रार्थयेद्धरिम् ॥२१॥ श्रीकृष्ण नारायण देववंद्य श्रीराधिकाकांत सदर्चनीय ॥ भक्तिप्रियाऽऽनं
दितभक्तिधर्मप्रियाऽऽनंदितभक्तिधर्म प्रभो हरे नाथ ममापि प्रसीद ॥२२॥ सर्वेवलोके प्रतिशब्द्यारत्रात्स्वन्तर्पण
वाऽस्ति समं ततो मे ॥ भीतेरिहामुत्र च रक्षकेऽवैततः पतिस्त्वं हि मया कृतोऽसि ॥२३॥ अन्यं पतिं पातु कृणोति
नारी भवंतमाराधयती नार्चनाद्यैः ॥ संमोहितानेन तु मामयेव भयादिहामुत्र न मुच्यते यत् ॥२४॥ अतो मया
धर्मतयोद्रताद्यैस्त्वत्प्रीतिरेव प्रार्थ्यते ज्ञानान्यत ॥ अतः प्रसन्नोऽसि भगवान्स्वबोधो मनोरथं पूरय मे हरिस्त्व
म् ॥२५॥ इति संप्रार्थ्य नत्वा तं धारयेद्धृदये पुनः ॥ करेऽङ्के च प्रतिमां स्थापयेद्गोपिस्त्वहम् ॥२६॥ पूजाविधिरि
तीशोक्तः संक्षेपेण मया हरेः ॥ यस्मिन्कृते तु नारीणां प्रेमवृद्धिर्भवेत्प्रभो ॥२७॥ कृष्णपूजनविधिस्समासतो

कृष्णमेव मंत्रजापं गुरूक्तमव्ययम् ॥ स्त्री जपेदप्यथ पंचशतं सा कृष्णपादकमलाहितचित्ता ॥ ३९ ॥ इति श्रीस 
त्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे स्त्रीधर्मेषु श्रीकृष्णपूजाविधिनिरू
पणनामा षट्त्रिंशोऽध्यायः ॥ ३६ ॥ श्रीनारायणमुनिरुवाच ॥ सधवा विधवापि नारी या स्यादज्ञस्वजा
त्रिरात्रं न स्पृशेत्सा तु स्त्रियं वा पुरुषं क्वचित् ॥ १ ॥ ईशानब्रह्महत्यायाः स्त्रीभिर्भोगकरीपक ॥ दत्तोंऽस्मिस र
जो रूपी मासि मासि प्रपद्यते ॥ २ ॥ प्रथमेऽहनि चंडाली द्वितीये ब्रह्मघातिनी ॥ तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शु
ध्यति ॥ ३ ॥ देवकर्मणि पित्र्ये च पंचमेऽहनि शुध्यति ॥ उपवासी नाऽऽपदि तु तृतीये शुद्धवस्तु ध्यति ॥ ४ ॥ नैव संगोप
येन्नारी महापापं कदाचन ॥ गोपिते ब्रह्महत्याया मुच्यते नैव सा यतः ॥ ५ ॥ रजस्वलास्पर्शे दृष्ट्वा मुदक्यां वा परां स्त्रि
यम् ॥ अस्नात्वैनां स्पृशेद्दुर्ध्यायदि नर्हि न वेदयम् ॥ ६ ॥ धर्मशास्त्रेषु विहितो यो प्रोक्ता कृच्छ्रं च दिनिष्कृतिः ॥ कर्त्तो
सा सर्वनारीभिः कर्तुं शक्या न रक्ष्यते ॥ ७ ॥ अतो दिनं निष्कृतिवत्किंस सर्वासां कर्गमिह ॥ यास्त्री स्नात्वा स्पृशे
त्सा तु कुर्यादेकमुपोषणम् ॥ ८ ॥ अज्ञानतः कश्चिज्जंतोर्यदि स्पृष्टा न हि मत्वरम् ॥ स्नात्वा सचैलं कुर्वीत नारी नाम
स्मृतिं हरेः ॥ ९ ॥ स्पर्शे त्वापरि वृद्धापि जायते स्नानेन न शुध्यति ॥ स्पर्शे पुंसो मुदक्याया एवमेव हि निर्णयः ॥ १० 
न गोपनीयं हि रजस्ति प्राकृ मर्हर्षयः ॥ सदाचारस्थसाध्वीनामेवमेव प्रवर्त्तते ॥ ११ ॥ अगोपने ब्रह्महत्या

दोषः स्त्रीणां विनश्यति ॥ पर पुंसो गर्भशंका स्वजनानां च नश्यति ॥ १२ ॥ तस्मात्स्त्रीभिः पालनीया मर्यादैषा
पुरातनी ॥ चातुर्वर्ण्यप्रस्थिताभिर्वै धर्मसिद्धिमभीप्सुभिः ॥ १३ ॥ ब्रह्मचर्यव्रतं नारी पालयेद्यापि यः पुमान्
तयोस्तु च्छलवाक्यैर्या भिनत्ति स्त्री व्रतं भुवि ॥ १४ ॥ क्रोधारुणेक्षणा याम्या हत्वा तां मुष्टिवर्गकैः ॥ लोहदं
डैर्दहयंति क्रोशंतीमुच्चकैर्भृशम् ॥ १५ ॥ कुंभीपाके तप्तते तैले धर्षयंति च तत्र ताम् ॥ रक्तविट्पूयकुंडे तां नि
क्षिपंति च तत्र ते ॥ १६ ॥ स्वशेमसंख्यावर्षाणि भुक्त्वा सा यमयातनाः ॥ अल्पेपि निर्जने देशे पिशाची जायते ततः
॥ १७ ॥ निष्कामव्रतभंगाय कामुकः पुरुषः स्त्रियाः ॥ पुरुषस्यापि वा कुर्यात्स मृत्वा नरकान्व्रजेत ॥ १८ ॥ कुंभीपाके
पच्यते सोऽमृद्धः सर्पैश्च दश्यते ॥ उद्ग्रैः करोत्यार्त्तनादान्स याम्यैः परिताडितः ॥ १९ ॥ निष्कामव्रतिनां पुंसां ना
रीणां च व्रतावनम् ॥ ये कुर्वंति तिते नूनं गतिं प्राप्स्यंति निश्चितम् ॥ २० ॥ इति ते ब्राह्मणश्रेष्ठ स्त्रीणां धर्मा मयो
दिताः ॥ सतीगीताभिधास्तास्ताः सर्वासां हितकारकः ॥ २१ ॥ सतीगीतामिमां नारी या श्रोष्यति पठिष्यति ॥ उभ
ते प्राप्स्यतोऽनंतं स्वर्गीक्षितं फलं किल ॥ २२ ॥ नित्यं या नियमेनैतां योषिदत्र पठिष्यति ॥ लप्स्यते साक्षमहंती
कीर्तिं चांते हरेः पदम् ॥ २३ ॥ इति द्वितीयाश्रमिणां नृपास्ति पुंसां तथैषां मयि योषितां च ॥ उदीरितास्ते द्विजेंद्र
सुताभिः श्रव्याश्च पाठ्याः सततं च पाल्याः ॥ २४ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकर

॥स-जी-पं० लो धर्मोपदेशे श्रीकृष्णसाधारणधर्मनिरूपणनामा सप्तत्रिंशोऽध्यायः ॥३७॥ श्रीनारायणमुनिरुवाच ॥ उक् अ०३८॥
॥७३॥ रत्नाकृतो विप्रवर्जितस्य द्विजेरथ ॥ वानप्रस्थाश्रमस्यापि धर्मान्वोधाय वच्मि ते ॥१॥ हित्वा गृहाश्रमं विप्रो
ह्तीयाश्रमात परम् ॥ तृतीयं स्वायुषो भागे तृतीयाश्रममाश्रयेत ॥२॥ अपत्यापत्यमालोक्य भार्यामारान्वि
हत्म ॥ पत्न्याः पोषणमादिश्य पुत्रे वनमुपाव्रजेत ॥३॥ अनुकूला तपः सोढुं क्षमा चेत्पत्नी सा भवेत ॥ सहैव
तां नयेद्विद्वान्नान्यथाऽदुःखदस्त्वतः ॥४॥ ग्राम्यधर्माननभीक्ष्णं च धैर्यं वान्नेस चार्प्यपि ॥ मृतदारो गृहस्थो
वा वानप्रस्थाश्रमं श्रयेत ॥५॥ आपृच्छ्य स्वगुरूंश्चादौ राजानं धार्मिकं ततः ॥ संबंधिनश्चाथ पत्नीं गृहस्थो गा
राश्रमांतरम् ॥६॥ शुक्लपक्षस्य पूर्वाह्णे प्रशस्ते चोत्तरायणे ॥ गत्वाऽरण्यं नियमवांस्तपः कुर्यात्समाहितः
प ॥ अथवाश्रमेत योऽमुत्र द्विजदेहोचितं तु यत ॥ उ आहूवांस्ततो धीरजस्तप एव समाश्रयेत ॥८॥ अग्निहो
त्रं च दर्शादि कर्म्म प्राग्वद्यथाविधि ॥ साग्निकस्य मुनेः प्रोक्तं पश्चाज्जननमंतरा ॥९॥ मुन्यन्नैः स्वयमानीतैः
पुरोडाशांश्च निर्वपेत ॥ कुर्यादाग्रयणं मुख्यं स्वयं तु निवसेद्द्विजः ॥१०॥ शिलायां वाश्मार्कराद्यैर्वा शयीत स्नस
माहितः ॥ जितक्रोधश्च तत्त्वज्ञो न हिंस्यात्कर्हिचित ॥११॥ वर्जयेन्मधुमांसं च ब्रह्मचारी भवेत्सदा ॥ न ॥७३॥
द्रुह्येत्सर्वभूतेषु मौनमभ्यासहंसविशोत ॥१२॥ अन्नैः शाकैः फलैर्वापि पंचयज्ञान्समाचरेत ॥ अग्न्युज फ

लभिक्षाभिर्वर्त्तयेन्नित्यं काकतीयान्नु ॥१३॥ वसीत वल्कवासस्तृणपर्णाजिनानि वा ॥ कमंडलुं च दंडं च धा
रयेत्संयतेंद्रियः ॥१४॥ केशान्रोमाणि श्मश्रूणि छेदयेन्न नखानपि ॥ अंगजं मलं नैव क्षालयेन्न च मा
र्जयेत ॥१५॥ अंगानि मार्जयन्नात्रिकालं स्नायाद्द्विजोऽयः ॥ नैव दंतान्शोधयेन्नित्यं नासनं चाजयेत्क्रुधः
॥१६॥ वनाश्रमी न कुर्वीत परस्त्रीसंगमं मनसाप्यपि ॥ पत्नीपयोगं नापि तत्स्वकीयां यतकर्म्माणि ॥१७॥ भुंजीत सह
देवान्नं नीवारादि वनोद्भवम् ॥ कपित्थं बदरांश्चान्यफलादीन्यपि वा मुनिः ॥१८॥ शांतो दांतो मृदुर्धीरो मू
लकंदफलाशनः ॥ मुख्यवर्त्तनी वापि स्यादेकस्मिन्हि फलोद्भवम् ॥१९॥ आहरेत्स्वयमेवान्नमात्मनो वृत्ति
हेतवे ॥ दंतोलूखलिकी वा स्यादश्मकुट्टाशनोऽपि वा ॥२०॥ न रूप्ययच्चमपीयादकृष्टं चाप्यकालजम् ॥
अग्निपक्वमथामं वा कालपक्वमुताहरेत ॥२१॥ सद्यः प्रक्षालको वा स्यादथवा माससंचयी ॥ वाब्दं वाब्दप
र्यासान्नादिसंग्रही ॥२२॥ संत्यजेदाश्विने मासि यत्किंचित्तु संचितम् ॥ पुनः संचिनुयादन्नं मुन्यन्नादिक
मात्मना ॥२३॥ शनैः शनैः क्रमेणैव वर्द्धयेत्तप आत्मनः ॥ सर्वत्यागे तु सहसा नश्येद्दुर्बलवपुर्यतः ॥२४॥ त
पसा शोषयेद्देहं ध्यायन्नंतर्गृहं हरिम् ॥ मुन्यन्नं नक्षयेदाद्रौ फलमूलाशनस्ततः ॥२५॥ नक्ताश्येकां
तराशी च चतुर्थाहभुक्तिस्ततः ॥ पंचमेऽहनि षष्ठे वा फलमूलाशनो भवेत ॥२६॥ चांद्रायणव्रती वा स्यास

ज्ञेनुग्वाऽयमासतुकः॥ क्षीरपः फेनपो वाऽस्या दंतुपी धूमपस्तथा॥ २७॥ ओजस्यापि वनस्थोऽयमश्ववासु तु केन
वैकृमात्॥ स्वयं तपस्यभिरतो न प्रमत्तो भवेत्क्वचित्॥ २८॥ न विमुंचेदिंद्रियाणि प्रयतात्मा सदा भवेत्॥
क्रूरकामासये मौढ्याद् दुस्त्यजेष्वनिजेतपः॥ २९॥ स्त्रीकथाश्रवणादीन्वक्रुर्यादेकपुपोषणम्॥ ब्रह्मचर्यं
गर्भं गेच सावधानो भवेत्सदा॥ ३०॥ यस्तु पत्न्या वनं गत्वा मैथुनं कामतश्चरेत्॥ व्रतभ्रष्टः स कुर्वीत देहं
तौ तस्य निष्कृतिम्॥ ३१॥ तस्य यो जायते पुत्रो न संस्पृश्यो द्विजैः स तु॥ वेदाधीकाररहीनः स्यात्त्यजेत्कामं
ततो वनी॥ ३२॥ ग्रीष्मे सेवेत पंचाग्नीनासारं प्रावृषि क्षमम्॥ वानप्रस्थश्च शिशिरे तिष्ठेदाकंठमम्बुच॥
३३॥ स्वशक्तितः तपः कुर्याद्देहपातो यथा न वै॥ न वेक्षणस्य तथा धीरो वनस्थोऽपि स वर्जितः॥ ३४॥ त्वरेहनेदा
दज्ञाव्यानष्टौ वाचतुरो मुनिः॥ द्वावेकं वा यथाशक्ति न विपरीतकल्लत॥ ३५॥ यः कंटकाशीरुन्नत्विंदना
शैश्च योऽग्रिंति॥ अकुद्धोऽपरितुष्टश्च समः स्याद्‌भयोरपि॥ ३६॥ अज्ञाकृत्वात्मान्याध्यायक्विरेदग्निम
त्र तु॥ भिक्षयेत ब्राह्मणस्नार्थमनिकेतश्च तापसान्॥ ३७॥ ग्रामादानीय वाभिक्षां शुचिर्ग्रासग्रहेहतः॥ ग्रासा
नष्टौ च भुंजीत तथाग्रासकः पाऽद्‌भ्राऽपि वा॥ ३८॥ नित्यं स्वाध्यायशीलः स्याज्ञान्विचीजपतत्परः॥ जित्वा निद्रां तं
थालस्यं रात्रौ ध्यानपरो भवेत्॥ ३९॥ यएतान्नियतांश्च धर्मान्संसर्वविहितांश्चरेत्॥ स देहे हरग्निवरो वा जले ॥७४॥

ओ कोऽथ दुर्गमान्॥ ४०॥ अभिनूतोज्ञ रारोगे रज्ञात्कः स्वक्रियाक्षयः॥ स हरिं हृदये ध्यायन्कुर्यादनश
नादिकम्॥ ४१॥ इत्थं तपः प्रकुर्वाणो मनोजित्वा वनाश्रमी॥ स दृष्ट्रौकमवाप्नोति देहांते नापसेप्सित
म्॥ ४२॥ यो विद्युन्नस्कि सहितं वानप्रस्थाश्रमे वसन्॥ तपः करोति स मुने धाम प्राप्नोति वैष्णवम्॥ ४३॥
वृत्तिभेदेन कथिता वानप्रस्थास्तु सर्वधाः॥ वैखानसवालखिल्यौदुंबराः फेनपा इति॥ ४४॥ आद्यास्तत्र कृष्ट
पच्यैर्वर्तमाना स्तपस्विनः॥ नश्योनवेऽन्ने पूर्वान्नसागिनस्तपरे मताः॥ ४५॥ प्रातरुत्थाय यां पूर्वं दि
शं पश्यंति येत ततः॥ आहृतैः फलमूलाद्यैर्जीवेयुस्ते तृतीयकाः॥ ४६॥ स्वयं द्रुमेभ्यः पतितैः फलैः पु
ष्पैर्दलैरपि॥ जीवेयुर्ये ते कथिता स्तुर्या फेनपा इति॥ ४७॥ तपः प्रकुर्वतश्चास्य सर्वं चेत्स्यादरं यदि॥ वैरा
ग्यं तर्हि संन्यासो विहितस्तुर्य आश्रमः॥ ४८॥ धर्मास्तु तीयाश्रमिणां मयैते समासतो विप्र वरोदितास्ते॥ अथ
यो तुरीयाश्रमिणोऽपि धर्मान्स्मृतिप्रसिद्धान् कथयामि सर्वान्॥ ४९॥ इति श्रीसत्संगिजीवने नारायण
चरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे वानप्रस्थाश्रमधर्मनिरूपणनामाऽष्टत्रिंशोऽध्यायः॥ ३८॥ श्री
नारायणमुनिरुवाच॥ चतुर्षु पुरुषार्थेषु यथाश्रेष्ठकारीयकः॥ तथाऽऽश्रमेष्वपि ब्रह्मसंस्कारी याश्रम रहि
तः॥ १॥ ब्रह्मचर्याद्गृहाद्वापि वनाद्वाप्यव्रती॥ साग्निकोऽनग्निको वापि यो विरक्तः स संन्यसेत्॥ २॥ चतुर्दि

॥ स॰ मी॰ पं॰ धीयसंन्यासी कथ्यते मुनिभिर्द्विज ॥ कुटीचको बहूदकश्च हंसः परमहंसकः ॥ ३ ॥ तत्र पुत्रादिकृतायां कुट्यां अ॰ ३॰
॥ ७५ ॥ वाऽपि गृहे सन्नम् ॥ शिखोपवीती तंत्री चंडाल्काषायवसनो द्धृतः ॥ ४ ॥ स्वबंधूनां गृहे कुर्याद्भोजनं स्वपचा गृ
हे ॥ आत्मनोऽज्ञातदेहाय स तु प्रोक्तः कुटीचकः ॥ ५ ॥ पूर्वोक्तवेषएवात्र स्वबंधूनां गृहात्पतिः ॥ हित्वा
स्वयंचरेद्भिक्षोपयः सप्रोक्तो बहूदकः ॥ ६ ॥ पूर्वोक्तवेषश्चातुर्ये पि दंडमेकं दधाति यः ॥ वेणवं सन्त्यजेद्यो
कन्स्थिती योहंससंज्ञकः ॥ ७ ॥ तुर्यः परमहंसाख्यो ज्ञानवैराग्यमंडितः ॥ एकदंडं च वासश्च दध्यात्कश्चि
त्वा यतिः ॥ ८ ॥ संन्यासहेतुर्वैराग्यं यदहर्विरजेत्तदा ॥ प्रव्रजेदिति वेदोक्तं तत्र भेदान्कथयामि ते ॥ ९ ॥ वैरा
ग्यं च त्रिधा मंदं तीव्रं तीव्रतरं त्विति ॥ मंदं न्यासो न तीव्रं तु द्वौ द्वौ न्यासानां च तत्परे ॥ १० ॥ पुत्रदारधनादीनां ना
शे तात्कालिकी मतिः ॥ धिक्संसारमिति द्रुक्सा वैराग्यस्य मंदता ॥ ११ ॥ अस्मिन्जन्मनि मा भूवन् पुत्रदारा
दयो मम ॥ इति या स्थिरा बुद्धिः सा वैराग्यस्य तीव्रता ॥ १२ ॥ पुनरावृत्तिसहितो लोको मे मास्तु कश्चन
॥ इति बुद्धिरिति प्रोक्तं श्रेष्ठं तीव्रतरं हितम् ॥ १३ ॥ मोक्षे विविदिषान्यासात्प्रकृतानि नः खलु ॥ इदं ज्ञा
नव्रतमासो विद्वन्न्यास उच्यते ॥ १४ ॥ वैराग्यं सादृढं यार्हि तदा परिव्रजेद्द्विजः ॥ परिव्राड्विरक्तस्तु भ
वेद्भवति निश्चितम् ॥ १५ ॥ वैराग्यमंतरा नैव न वेदेंद्रियनिग्रहः ॥ तं विना न भवेत्त्यागस्त्यक्तिम्ना सःकृतं ॥ ७५ ॥

विना ॥ १६ ॥ अविरक्तस्य संन्यासं न पूर्णं फलकारणं श्रुतिः ॥ स्मृतयश्च निषेधंति संन्यसेनाविचार्य तत
॥ १७ ॥ संन्यस्य सहसा पश्चात्खेदेति विषयान्यदि ॥ वैराग्याभावतो मूढः स भवेत्पतितो द्विजः ॥ १८ ॥ संन्य
स्यापि रसेतुब्धः स्त्रियां वा सततं यातनाः ॥ महारौरवनाम्नीर्हि यातीत्याह यमो वचः ॥ १९ ॥ दंडं पतेत्वहनो भ्रष्टा
न्यासिनोऽत्राविरागिणः ॥ तस्मात्संजातवैराग्यः प्रसन्नः संन्यसेद्द्विजः ॥ २० ॥ चिकीर्षुर्मुक्तसंन्यासं गुरुहन्त
मतनं भुजन ॥ सप्राप्यमसिते पक्षे गृहस्थो यावदुक्षु दिने चतुर्थ ॥ २१ ॥ देवमार्षं च दिव्यं च पित्र्यं मातृकमानुषे ॥
भौतिकं चात्मकं चेति श्राद्धमष्टौ समिर्वपेत् ॥ २२ ॥ प्राजापत्यां निरूप्येष्टिमग्नीनाधाय चात्मनि ॥ कृत्वात्मा
गुर्वनुज्ञातो यथावत्प्रैषमुच्चरेत् ॥ २३ ॥ आतुरस्य संन्यासे न विधिर्नैव च क्रिया ॥ प्रैषमात्रं समुच्चार्य संन्यासं
तत्र पूरयेत् ॥ २४ ॥ यथाविधि च संन्यस्य ब्रह्मज्ञानार्थं मुनिः ॥ सेवेत सद्गुरुं धर्मान्नाश्रितः प्रयतः सदा ॥ २५
॥ अपरोक्षात्मानुभवो दृढवैराग्यवान्यतिः ॥ तीर्थानि विचरेद्धर्मान्नाश्रितो हरिभक्तिमान् ॥ २६ ॥ पूजितस्ता
डितो वापि स्कंदेरन्नैश्च तिष्ठपि ॥ हर्षशोकविहीनश्च सकलस्सनः समश्चरेत् ॥ २७ ॥ कौपीनयुगलं दंडं चैकं वा स
ओच्छादनं तथा ॥ सूत्रं कमंडलुं भिक्षापात्रं वा पादुकेऽपि ॥ २८ ॥ जीर्णाचीरकृतां कंथां शीतातपनिवारणी
म् ॥ एतानि धारयेदन्यसंग्रहं त्यजेद्भिक्षुकः ॥ २९ ॥ कंथा वासश्च कौपीनं धारयेद्वा तु रंजितम् ॥ अतिवादं

॥स.नी.पं.७ चपेच्चान्यं हिंस्रां वाचमलानेत् ॥३०॥ वासीदण्डान्नवादध्यानियमी नात्रविरात्ते ॥ मुख्यं दंडं ज्ञानरूपं वि- अ॰ ३४॥
॥७६॥ धाणेण तुं वेणवत् ॥३१॥ त्रिदंडिलिंगपि येदेशगोणास्ति चैणवा मतः ॥ वाक्कर्म्मेमनसां देहामुख्याजेपा वि-
चक्षणैः ॥३२॥ वाग्दंडे मौनमाति शैल्कर्म्मदंडे त्वनीहताम् ॥ प्राणायामं मनोदंडेप्यति: सम्यगुपाश्रयेत्
॥३३॥ अथात्मयुक्तकौविंप्रेर्द्ंते गृहस्थानभिक्षुकम् ॥ न तेभ्योऽप्यमादायलेस्वयेदोषदर्शनात् ॥३४॥ असंगृ-
तानि गृहस्थानां स्वतंत्रं पुष्पमपौमूदम् ॥ मूलं फलं च वाऽयवृंगीत्स्व पदकौपीनः शुचिः ॥३५॥ ज्ञातामेव वदेत्नान्न-
मविचारितो हंतो यतिः ॥ दशान्नारायणेत्येवं प्रतिवाचं च निःस्पृहः ॥३६॥ वाङ्मनःकायचेष्टाकन प्रमत्तो भवे-
त्कचित् ॥ स्नानं ध्यानं तपोदानं योगं कुर्याज्जितेंद्रियः ॥३७॥ स्नानं मनो मजलाभो ध्यानं तत्त्वार्थनिश्चयः ॥ इंद्रि-
याणां च मनसश्चैकाग्र्यं परमं तपः ॥३८॥ दानं त्वमेवमेवोक्तं योगोब्रह्मात्मनोर्युजितः ॥ दाटंस्मारेर्नेत्सा य-
स्य मुक्तो भवेत्स वै ॥३९॥ न हिंस्यात्प्राणिमात्रं च वदेत्सत्यं स्फनिश्चितम् ॥ गोब्राह्मणादिहिंसा या कृत्तं तेन न दु-
ष्यति ॥४०॥ स्त्रियं वेरमदं जो भं कौटिल्यं स्त्रीकथां शुचम् ॥ मत्सरं च भयं च त्यजेत् मानं स्नेहं च वर्जयेत् ॥४१॥ ज्ञा-
नेतपो च्छिनेरानंदस्त्नेच चमुमुक्षुपः ॥ तेषां प्राणहारिणं शत्रुं क्रोधं दूरात्त्संत्यजेत् ॥४२॥ मंचकं शुक्लवस्त्रं च
स्कराषानं दिवास्वपि ॥ त्यक्तस्त्रीपुत्रमित्रादेः संगोऽधःपातयेद्यतिम् ॥४३॥ चतुर्भिर्नन्तु कंदेशं दृष्ट्वा पादं न्य- ॥७६॥

सेन्नदा ॥ नधावेच्च विवेलीयं वस्तु पुतं विचेकवान् ॥४४॥ शांतो दांतः क्षीपरतेस्तितिक्षुः श्रद्धयान्वितः ॥ दयालु-
धैर्यवान् कर्मफलत्यागी भवेन्मुनिः ॥४५॥ व्रतोपवासनियमान् विघ्नभूतांश्च न सजेत् ॥ सदाजपेच्च प्रणवं
तदर्थं च विचारयेत् ॥४६॥ कुर्यात्तपोपनिषदां श्रवणं मननं पुनः ॥ निदिध्यासं चेतनस्या ज्ञानविज्ञानवा-
नयत्तिः ॥४७॥ देहात्मनोः पृथक्त्वं यः पश्येज्ज्ञानेन चात्मवान् ॥ जपेज्जितक्रोधस्य वेगमत्यथा ब्रह्मचर्यवान् ॥
४८॥ अन्वीक्षेतात्मनो वेधपीक्ष्यं च ज्ञाननिश्चया ॥ वेधरिंद्रियविक्षेपोमोक्षणं चां च संयमः ॥४९॥ आत्तामवा-
प्य लगु नेर्वे च रेत् पृथिवी निमान् ॥ सारभूतमुपासीत तत्तानं यन्मोक्षसाधनम् ॥५०॥ पुरग्रामव्रजान्सार्थां-
न् भिक्षार्थं प्रविशन्मुरेत् ॥ पुण्यदेशासरिच्छैलवनाश्रमवतीं महीम् ॥५१॥ नापृष्टः केनचिद्ब्रूयान्नचान्याये-
न वादिनम् ॥ विद्वान्नपवित्मेधावी विचरेज्जडवद्यतिः ॥५२॥ एकस्मिन्नेव न ग्रामे नैकस्मिन्सरित्तटे ॥ शून्या-
गारे नैकस्मिन्वसेद्बहुदिनानि च ॥५३॥ पंचाहानि पुरे ग्रामे दिनमेकं वसेद्यतिः ॥ संगाद्दोषा दोषाः स्यु-
र्मुक्तस्यापि तिंतसत्नेत् ॥५४॥ सतां संगस्तु कर्तव्यो ब्रह्मविद्यात्मवेदिनः ॥ गुरुं च हृतपृष्टं स्वमानयन् गणमेः
शुनीन ॥५५॥ त्यक्तसंगो जितक्रोधो लघ्वाहारो जितेंद्रियः ॥ पिधाय बुद्ध्या द्वाराणि ध्यानमेव सदाभ्यसेत् ॥५६॥
॥ शून्ये चैवावकाशे गुरुगृहास्कच वने तथा ॥ नदीनां पुलिने चापि नित्ययुक्तो वसेद्यतिः ॥५७॥ वागात्मपरात्म

॥स॰जी॰पु॰ चैव मध्यरात्रे न चैव न॥ संध्यायां च विशेषेण ध्यायेद्धरिमतंद्रितः॥५८॥ न संवदेत्स्त्रियं कांचित्पूर्वदृ- ध॰अ॰३९
॥७७॥ ष्टां न च स्मरेत्॥ लौकिकार्थानुपनिषद्गम्यं याल्कनाम्यसेत्॥५९॥ वृक्षाणां जंगमानां च न सक्तः पाटने
नवेत्॥ विश्वबीजं नैव संनरक्षेन्मलमूत्रवत्॥६०॥ यत्रैकोपि स्वसंबंधी न तत्र दिवसे वसेत्॥ न चर्तस्तु खड्ः
स्वाम्यं विक्रियां चामृषा तत्क्वचित्॥६१॥ न चाशादिशु चाकापि यद्दिशि दृश्यति भिक्षुकः॥ योजनानां शतं ग-
त्वा न तदा पापात्प्रमुच्यते॥६२॥ वृद्धोपि विश्वसेन्नैव क्रुद्धानामपि योषिति॥ युग्मते नीर्णमप्यं चवरं यतः
६३॥ वात्यामात्यंतरं चैतिद्विविधं शौचमाचरेत्॥ मृज्जलाभ्यां तु बाह्यं स्यान्मनः शुद्धिस्तथांतर-
म्॥६४॥ न लौकिकार्थासक्तः स्यात्कुर्याद्वादं च नात्मवित्॥ धनसंग्रहं न कुर्वीत न चैवान्येन कारयेत्॥६५॥
अजिह्वः षंढकः पंगुरंधो बधिर एव च॥ मुग्धश्च योगवेशे गीसमुक्तः स्यान्नेचेतरः॥६६॥ इदमेवानिष्टमथा
ति यथाजलं तु योयतिः॥ भूतेहितं मितं सत्यं सोऽजिह्वो मृदुलं वचः॥६७॥ जातमात्रां वा तरुणीं स्त्रियं वा त्रा-
तवार्षिकीम्॥ निर्विकारः समं पश्येत्स यतिः षंढको मतः॥६८॥ तीर्थस्नानाय भिक्षार्थं विण्मूत्रोत्सर्जनाय वा
॥ योजनान्नाधिका यस्य गतिः पंगुः स उच्यते॥ ६९॥ तिष्ठतो व्रजतो वापि यस्य चक्षुर्न दूरगम्॥ चतुर्युगां भु
वं त्यक्त्वा परिव्राट् सोंऽध उच्यते॥७०॥ शृण्वन्नपि स्तुतिं निंदां हितं वाप्यहितं च वच॥ आरुतुरं वा जो कोक्तं ॥७७॥

बधिरोऽविक्रियस्तथा॥७१॥ विकारहेतुसान्निध्येप्यविकारी जितेंद्रियः॥ अनवद्यचरे योऽसौ मुग्धः सोऽच्यते
यतिः॥७२॥ नामगोत्रकुलं देशं स्मृतं वृत्तं वयस्तथा॥ आत्मनः ख्यापयेन्नैव शीलं च क्वचिदात्मवित्॥७३॥ दा-
रवीमपापिनार्निकायोंत्वरूपेण चित्रिताम्॥ नारीं धनं रसं श्रुतिं च पंपात यतिध्रुवम्॥७४॥ अनिकेतो नवे
श्मागी बहिर्ग्रामाद्वसेद्यतिः॥ देवालये क्वचिद्वृक्षमूले वा विजनस्थले॥७५॥ प्राणांतिकेन यंत्रापि विण्मूत्रोत्स-
र्गमंबरा॥ नरात्रौ न च मध्याह्ने संध्ययोर्नैव क्वचिद्व्रजेत्॥७६॥ यथा ऽतिपीडा न भवेच्छरीरस्य यथा न मृत्युः सरसा
ऽपतेद्वा॥ तथा परिव्राड्दिन वर्यधर्मं समाचरेच्छास्त्रसदंगं च पश्यन्॥७७॥ इति श्री सर्कगिली वनेनारायणोक्त-
स्त्रीधर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे संन्यासधर्मेषु प्रव्रज्याधिकारादि निरूपणं नाम कोनचत्वारिंशो
ध्यायः॥३९॥ श्रीनारायणमुनिरुवाच॥ वानप्रस्थोन्यदा भिक्षुः परिव्राट् स्कस्य व्रतान्॥ स्नानसिद्धिमवाप्नोति
तदान्नेनास्रुशुकधी॥१॥ अभावे वनिनां ग्राम्यान्श्रोत्रियाद्ब्राह्मणोत्तमान्॥ याचेदन्नं यतिस्तेषामभावेऽन्या-
नपि द्विजान्॥२॥ भिक्षार्थेन नगरं ग्रामान्संगोऽल्लक्षितो विशेत्॥ रथ्यास्वतो न वीक्षेत स्वद्वृशो भास्पृसंपदः॥३॥
नग्राम्यवार्ताः शृणुयात्स्त्रीत्वान्नेक्षेत योषिता॥ मात्रा स्वस्रा समा विद्या नास्तानभिक्षां चरेन्नृपतिः॥४॥ मृद्दारवं
जातुजं वापि वैणवं तैजसं तत्वीपराम्॥ पार्णान्नाल्पतियावसौ मंभिक्षापात्रमुदीरितम्॥५॥ सजिलैः शुद्धिरेतेषां

॥स॰जी॰पं॰ गोवालैश्चवचर्वणम् ॥ धातुपात्रंतु नकाप्येव धर्म्मस्योपत्तिः स्मृतोत ॥ ६ ॥ ब्राह्मणक्षत्रियविशांगृहा ग्र॰४०॥
॥५८॥ न्नयाचेत भिक्षुकः ॥ पूर्वाभावे परंयाचेदुर्न्ने येन्द्रियकर्म्मः ॥ ७ ॥ आहारशुद्धिः सर्वेषांबुद्धिशुद्धेर्हि कारण
म् ॥ वेदवेदांगवेत्तापि त्यागी दुष्कृतकृद्विजः ॥ ८ ॥ द्विजाभावेतुसेवा स्तत्र यवासमद्ये गर्हित ॥ भैक्ष्यंशूद्रादपिग्रा
ह्यमिति मेधातिथिर्जगौ ॥ ९ ॥ कलौतुब्राह्मणानेव वृत्तिभेदाश्चतुर्विधान् ॥ पूर्वाभावेपरान्याचेद्वि
जजातीं स्कन्दकंचित ॥ १० ॥ जातकर्म्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचि ॥ वेदाध्ययनसंपन्नः षट्
कर्म्मस्ववस्थित ॥ ११ ॥ सत्यंशमोदमोद्रोह आनृशंस्यंकृपाघृणाः ॥ तपोभक्तिः श्रद्धयत्रस्या सब्राह्मणइ
तिस्मृतः ॥ १२ ॥ वेदाध्यायी शास्त्रधारीदानीराजरुचिर्धृति ॥ अल्पश्रुतदिवियः शूरो धैर्यवान्क्षत्रियो द्विजः
॥ १३ ॥ कृषिवाणिज्यगोरक्षाकुसीदादकृपजीवनः ॥ वेदाध्यायी चदानी च ब्राह्मणो वैश्य उच्यते ॥ १४ ॥ सर्व
भक्ष्यरतिर्नित्यंरसजाद्यादिविक्रयी ॥ अनाचारो वेदहीनो ब्राह्मणः शूद्र उच्यते ॥ १५ ॥ स्तेयप्रियः सदालुब्धो
हिंसिकाजोकरंजकः ॥ हिंस्रकर्म्मरुचिर्धूर्त्तो विप्राज्ञः सतु कथ्यते ॥ १६ ॥ वापीकूपसरः क्षेत्रपञ्चजाराम
नाशकः ॥ लोनसंध्यादिहीनस्तु म्लेच्छ एवमतो द्विज ॥ १७ ॥ अभक्ष्यभक्षकोमूढः परस्त्रीलंपटोशुचिः
॥ कार्य्याकार्येनजानातियः सविप्रःपशुमत ॥ १८ ॥ दयाहीनः प्रमादीच श्रुतिस्मृतिवधातिगः ॥ क्रूरापा ॥५८॥

५९

नरतो विप्रश्चांडालो मांसभक्षकः ॥ विप्राज्ञोदीनवर्ज्जपितान्भिक्षास्तपतितांस्तथा ॥ याचेदन्नंशुचीन्विप्रां
स्त्रीन्वांपंचांपिमनवा ॥ २० ॥ चिकित्सकंस्त्रीजितंचमृगयुंशल्यहारिणम् ॥ कूटजटापात्रिनंदंडंयतिर्भिक्षे
न्नकर्हिचित ॥ २१ ॥ भिक्षामाधुकरीनाम्नीयतीनांसुचिताद्विजा ॥ यावतोदरपूर्त्तिस्यात्तावद्भैक्ष्यमाचरेत्
॥ २२ ॥ पंचहृत्वोथवावासप्रकृत्वोजभ्येतनोपतः ॥ भैक्ष्यंतदन्नयेकिंहेचेत्राभगृहेवसदा ॥ २३ ॥ याचितंतुनग
हंलोभात्सुवर्णंकेलेक्तदेवच ॥ अभावेत्तिमगेहानांतत्रतेदिवसांतरे ॥ २४ ॥ विधूमे सन्नमुसले व्यंगारे तुक्तेव
र्जने ॥ कालेपराह्णभूयिष्ठेनित्यंभिक्षांयतिश्चरेत ॥ २५ ॥ कलावयंतुनियमः प्राधिकस्तरकल्पितान् ॥
सत्यमाचधियाचेतगृहान्मधाक्रन्तः परम् ॥ २६ ॥ बहून्नयच्यतेयत्रमन्येतेपत्रमानवाः ॥ अनुद्विजान्ना
ः प्रपद्येतितेदेशेयत्नतो व्रजेत ॥ २७ ॥ जातशौचंमृतशौचंयेषांतान्वर्जयेद्विजान् ॥ श्राद्धमात्रंमवेदान्नंतच्च
भिक्षेन्नकर्हिचित ॥ २८ ॥ नपर्वषुग्रहंदद्याद्ग्रहेणभिक्षालिप्सुः क्वचिद्यतिः ॥ नकुर्यादैकभिक्षैवनदारंताडयेय
त्कचित ॥ २९ ॥ दंडंचदक्षिणेकक्षेयतिः संधार्यचारुणा ॥ धृत्वावामकरेपात्रंपिदध्याद्दक्षपाणिना ॥ ३० ॥ भिक्षा
दंनचकुर्वाणोयदामेघंसमुद्रोदति ॥ सपात्रीविधिवस्नात्वाप्राणायामान्यदाचरेत ॥ ३१ ॥ उदरक्याशवचंशाज
चौरनागकपालिभिः ॥ स्पृष्टांभिक्षांसजेद्भिक्षुः सवासाजलमाविशेत ॥ ३२ ॥ बुद्धहोकाशेरयेमंचेनोकार्यांग

जन्तूत्स्यपो ॥ तृणौघजलसंघाते नदीषु स्पर्शसंभवः ॥ ३३ ॥ भिक्षां गृहीत्वा पात्रेतः सर्वं स्वं पात्रमस्फुटं तत् ॥ नि 
क्षाप्य भुवि देशे च निधायाथ स्वयं पुनः ॥ ३४ ॥ प्रक्षाल्य पाणिपादं च मौनी नीत्वा कुशुपाविशेत् ॥ धातुः प्रकु
प्यते येन तद्भक्ष्यं वर्जयेद्युत्ति ॥ ३५ ॥ विलोमैर्वेष्टुमश्नीयाद्यं देवस्य वर्जयेत् ॥ अपोशानादिविधिना भुञ्जी
तामृतवन्मुनिः ॥ ३६ ॥ प्राणाहुतीः स्वशौचेन वदन्ताऽन्येन कुर्याच्च न ॥ आश्नीयाद्वपिण्डं तु स्वयमौपधवद्युतिः
३७ ॥ पात्रे संस्थे करे धृत्वा आश्नीयाद्धस्तपाणिना ॥ अर्धाहारं प्रकुर्वीत देहो वर्तेत यावता ॥ ३८ ॥ कामदर्पादयो
दोषा न वर्धन्ते भिक्षाशिनम् ॥ एककालं सदाश्नीयान्नसंगृह्णीत भिक्षितम् ॥ ३९ ॥ अमासं ब्रह्मविद्यायाः
सर्वकालं समाचरेत् ॥ एतदर्थं हि संन्यासो विहितोऽत्र द्विजन्मना ॥ ४० ॥ न चाददीत यो यो यतिः किंचिदन्ना
यदि ॥ पक्वमापक्वं तु गृह्णीयाद्यावद्भुञ्जीत तद्दिने ॥ ४१ ॥ एकस्मान्नं भवेच्चाद्यान्निरंतरमना यदि यदि तर्हि यु
तिः कुर्यात्त्याज्यं यामान्नूनान्तेऽहनि ॥ ४२ ॥ अनापदि पुनर्भुक्ते पतितः स्यात्प्रमादतः ॥ तत्स्नानं व्रतं तस्य शोकं
तदोपवासं तथैव ॥ ४३ ॥ आपत्कालः प्राणरक्षार्थं पुनर्मूलफलादिकम् न तु भक्षयन्न्यासी नैव दन्तधावनम्
४४ ॥ देशकालादिवैषम्याद्वृत्तिं माधुकरीं यदि ॥ कर्तुं न शक्नुयात्तर्हि भुञ्जीत गृहिवेश्मनि ॥ ४५ ॥ एकीकृत्या
न्नशाकादि सर्वं प्रोक्षाद्भिः कृतशुद्धि ॥ भुञ्जीतौपधवन्मौनी द्विरावृत्य चाप्युपके ॥ ४६ ॥ मृतौ यमभिक्षादिपदा 

र्थं याचने भावेत्तच्चेद्ब्राह्मणायोषया यतिः ॥ असन्निधाने पि न रक्तत्तेर्युः सोऽदुग्धेन्नं तद्विवेश्च रहीन चेत्तदा
४७ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे संन्यासधर्मेषु भैक्ष्यवि
धिनिरूपणनामा चत्वारिंशोऽध्यायः ॥ ४० ॥ श्रीनारायणमुनिरुवाच ॥ वार्षिकांश्चतुरो मासान्ग्रामे वासन
गरे वसेत् ॥ मासद्वयं चायदि तु स्थित्वैकत्र ततो व्रजेत् ॥ १ ॥ वर्षाकपायावतो ग्रामार्द्धं यपौतावतो यतिः ॥ कृच्छ्रो
पवासान्कुर्वीत ततः शुद्धो न वै क्लिन्न ॥ २ ॥ अनाचारे वसेन्नैव ग्रामे न नगरेऽपि वा ॥ सदाचारेऽपि स्वसंबंधी यत्र स्या
त्तत्र तो वसेत् ॥ ३ ॥ नक्रोशे पञ्चुते ग्रामे ब्रह्महत्यादिदोषभीते ॥ दुर्भिक्षे राष्ट्रभंगे वा वर्षास्वप्यामु तं त्यजेत् ॥ ४ ॥ मा
सद्वयेऽपि मास्यापतीनां केशवापनम् ॥ वर्षास्वतन्त्र कर्त्तव्यं नदीनां तरणं तथा ॥ ५ ॥ आसन्नं पात्रलोभ
श्च संचयः शिष्यसंग्रहः ॥ दिवास्वापो वृथा जापो पञ्चैते बंधकराणि यतेः ॥ ६ ॥ एकाहात्परतो ग्रामे पंचाहात्पर
तो ग्रामे पंचाहात्परतः पुरे ॥ वर्षाभ्योऽन्यत्र यत्स्थानमासनं तदुदाहृतम् ॥ ७ ॥ उक्तालाबादिपात्राणा
मेकस्यापि न संग्रहः ॥ भिक्षोर्भैक्ष्यभुजश्चापि पात्रलोभः स उच्यते ॥ ८ ॥ गृहीतस्य तु दंडादेर्द्वितीयस्य परि
ग्रहः ॥ कालांतरोपभोगार्थं संचयः सम्प्रकीर्तितः ॥ ९ ॥ शुश्रूषालाभपूजार्थं यशोऽर्थं वा परिग्रहः ॥ शिष्या
णां तु न कारुण्याज्ज्ञेयः शिष्यसंग्रहः ॥ १० ॥ विद्यादीनां प्रकाशत्वादविद्यारात्रिरुच्यते ॥ विद्याभ्यासे प्रमा

॥स·नी·पं० ॥८०॥

दीयः सद्भिवास्त्वापत्रुच्यते ॥ ११ ॥ आध्यात्मिकीं कथां मुक्त्वा भैक्षादेस्तु प्रशंसनम् ॥ नृपपुत्रादिवार्तां च तृष्णया जा अ०४१॥
पः स उच्यते ॥ १२ ॥ वराटकेपि यतिना संगृहीते दिने दिने ॥ गोसहस्रवधं पापं श्रुतिरेषा सनातनी ॥ १३ ॥ हरि
सन्नेहभावेन चेत्स्पृशेत्स्त्रियमेकदा ॥ कल्पकोटिद्वयं याति कुंभीपाकं न संशयः ॥ १४ ॥ नस्नानमाचरेद्भिक्षुः
पुत्रादीयतिनिधने श्रुते ॥ पितृमातृक्षयं श्रुत्वा शुद्ध्यति सांबरः ॥ १५ ॥ पारिव्राज्यं गृहीत्वा तु स्वधर्मे योन वर्त्त
ते ॥ श्वपदेनांकयित्वा तं राजाशीघ्रं प्रवासयेत् ॥ १६ ॥ छेदेन भेदने पाकेर्वा योऽस्य गं प्रवर्त्तते ॥ यस्तं दृष्ट्वा यतिं
कार्यं सचैलं स्नानमेव हि ॥ १७ ॥ त्रिजधान्याहिरण्यपक्षा गोदासी गृहसंग्रहीर्यतीः ॥ सन्निवेहिंस्काः स्युः स्नात
यत्तस्य दर्शनात् ॥ १८ ॥ संन्यासधर्ममारुह्य यः पुनरावर्त्तते पुनः ॥ स निर्वेदः सर्वभूतानां पितृप्रेष्य व जायते
॥ १९ ॥ चंडालाः प्रत्यवसिताः परिव्राजकतापसाः ॥ तेषां जातान्यपत्यानि चंडालैः सह वासयेन्नृपः ॥ २० ॥ अ
न्नदानपरो भिक्षुश्चतुरो हन्ति धर्महा ॥ स्वस्थान्यस्यान्नदं गृहीतारन्नं स्वं चतुरीयकम् ॥ २१ ॥ निशान्नं भुक्त
वस्त्रं चतावृत्तं महामांसमम् ॥ बाहूनं स्पृशि कामं चो धनं नारीरसास्ति ॥ २२ ॥ एतानि यस्य संन्यासी भुक्ते तस्य
कुलं तथा ॥ यतेः कुलं च नरके रौरवे पतिति ध्रुवम् ॥ २३ ॥ ग्रामाद्वर्षे यदा भिक्षुश्चरेत् क्षेत्रं प्रमादतः ॥ कंथं कौ
धारयेद्वायः कर्त्तुं चोशयणं चरेत् ॥ २४ ॥ धातुं वृक्षं जलं मृजं फलजतुष्पादजानि वा ॥ उत्पाटयेद्युतिर्यस्तु सो : ॥ ८० ॥

वीर्थं रंगं नरकं व्रजेत् ॥ २५ ॥ हनने सूक्ष्मजंतूनां प्राणायामान् समाचरेत् ॥ स्वप्ने स्त्रीसंगमे स्नानं त्रिसहस्रं
मनुजपेत् ॥ २६ ॥ एकेंद्रियं द्वींद्रियं द्वौ वैसाधिर्यं यदृष्ट्वा यतिर्यदि ॥ त्रिरात्रमुपवासं च प्राणायामशतं चरेत् ॥ २७
॥ स्वप्ने तु स्मरणे स्नात्वा प्राणायामान् समाचरेत् ॥ उपवासस्तु सर्वेच बीर्यपाते यतेर्मतः ॥ २८ ॥ भिक्षाक्रियादे
रम्यत्र स्त्रियास्सह वदेद्यदि ॥ अकामात् तैक्ष्णं उपवसेत् स्नात्वानाम हरेर्जपम् ॥ २९ ॥ एवमेव प्रकर्त्तव्यं स्त्रीकथाश्र
वणादिषु ॥ सत्स्वकामतो न्यूनं यतिना धर्मचारिणा ॥ ३० ॥ कामाद्दृष्टिं स कृतं कुर्यात् अत्यल्पव्रतमं यतिः
॥ तस्य कृच्छ्रं व्रतं कुर्यात् तदा नाम जपन् हरेः ॥ ३१ ॥ अष्टमे मैथुने साक्षाज्जाते तस्य तु निष्कृतिम् ॥ लिंगस्योत्क
र्तनं कुर्यात् दग्ध्यमेव यतिर्वने ॥ ३२ ॥ स्वकर्मस्थाः पर्यटीकेनी यो निविचरेत्सदा ॥ फलमूलाशनो दांतः सतां
शुचित्वं समादनात् ॥ ३३ ॥ यस्तु पत्रगर्भैतो भूत्वा पुनः सेवेत मैथुनम् ॥ षष्टिवर्षसहस्राणि विष्टायां जायते
कृमिः ॥ ३४ ॥ कंडूयनेन चेद्वीर्यं पातयेत् काममोहितः ॥ जपेल्लक्षं प्रणवं कृत्वा सांतपनद्वयम् ॥ ३५ ॥
अस्सवासं देवकर्त्तव्यं यतिनाधर्मचारिणा ॥ अहोरात्रोपवासेश्च प्राणायामशतं तथा ॥ ३६ ॥ एकान्नं मधु
मांसं च तथैव श्राद्धभोजनम् ॥ अभोज्यानि यतीनां वै स्वस्थलवणं तथा ॥ ३७ ॥ अज्ञानात्सेवने जाते एषां मे
कतमस्य च ॥ प्राजापत्यं चरेत्कृच्छ्रं विष्णुनामाभिसंजपन् ॥ ३८ ॥ यातिक्रमात्स्वये केचिद्वाङ्मनः कायसंभवाः

सभ्यास्तांश्च निर्वेदेऽथवर्येद्यदुसुखेन तांश्चरेत् ॥३९॥ एवं स्वस्तु कथं मौनी न चरेद्योयतिः क्वचित् ॥ सप्राप्नुया 
द्ब्रह्मलोकं यतीनामभिवांछितम् ॥४०॥ भक्त्या भगवतस्साकं समाचरति यो यतिः ॥ सम्यासधर्म्मानेतान्वै
प्राप्नोति सपदं हरेः ॥४१॥ केचिच्च ज्ञानसंन्यासो वेदसंन्यास एव च ॥ कर्म्मसंन्यास इत्येवं न्यासं त्रैविध्यमूचिरे
॥४२॥ सर्वसंगविनिर्मुक्तो निर्द्वंद्वश्चैव निर्भयः ॥ प्रोच्यते ज्ञानसंन्यासी स्वात्मन्येव व्यवस्थितः ॥४३॥ वेदमे
वाभ्यसेन्नित्यं निर्द्वंद्वो निष्परिग्रहः ॥ प्रोच्यते वेदसंन्यासी मुमुक्षुर्विजितेंद्रियः ॥४४॥ यस्त्वग्नीनात्मसात्कृत्वा
ब्रह्मार्पणपरो द्विजः ॥ स ज्ञेयः कर्म्मसंन्यासी महायज्ञपरायणः ॥४५॥ त्रयाणामथ चैतेषां मायायुत्वभ्यधि
कोमतः ॥ न तस्य विद्यते कार्यं न लिंगं वापि पश्चिमः ॥४६॥ यदि वैराग्यवान्नस्याद्भक्तिज्ञानपरो हरेः ॥ प्रप
न्नाय ते स्तर्हि लिंगं दंडादिकं लभेत ॥४७॥ कलहदुःखादिकं देहप्रारब्धानुगतं विदन् ॥ स लिंगमाश्रमं स्वका
चरेद्धविधिगोचरः ॥४८॥ गूढधर्म्माश्रितो विद्वान्नज्ञातचरितं चरेत् ॥ संदिग्धः सर्वभूतानां वर्णाश्रमविवर्जि
तः ॥४९॥ उन्मत्तबालजडवन्मूकवच्च महीं चरेत् ॥ मोक्षधर्मेषु निरतो लब्धाहारो जितेंद्रियः ॥५०॥ ब्रह्मानं
देसदामग्नं निराशं निष्परिग्रहम् ॥ अभ्येतिसर्वतः सोऽस्मं तं जानिवमहोदधिम् ॥५१॥ सांगोयरहरौ वि
प्रनिर्विकल्पसमाधिमान् ॥ स महामुक्त उक्तः प्राप्तः सिद्धांशुभाम् ॥५२॥ सविकल्पसमाधिस्थाज्ञानि 

मुक्ताख्ये पेद्विज ॥ आस्थिताः साधनदशामित्युक्ता नास्ति नक्तये ॥५३॥ ये वैराग्यवजेनाः यदरिसक्तगृ
हाश्रमाः ॥ ते वर्णिकास्ते संप्रोक्ता वैष्णवाः साधवुत्तमे ॥५४॥ जोभंकामं रसास्वादं स्नेहं मानं विर्जितास्तैः
॥ त्यागिभिः सर्वभावेन सवेनीयो हरिः सदा ॥५५॥ चतुर्ष्वेतेषु वर्णेषु चतुर्षु चाश्रमेषु च ॥ गृहस्थीयविद्यु
दीक्षां ये सामान्यां महतीं च वा ॥५६॥ तेषां सामान्यतो धर्मा लिख्यंत एता गृहिजा अपि ॥ विशेषधर्मा ये ते तु स्तेया
दीक्षाविधेस्तया ॥५७॥ वर्णाश्रमाणामिति तेऽखिलानां धर्मा मयोक्ता द्विजवर्यसर्वे ॥ पाविष्यति श्रोष्यति वा
सएतान् धर्मे मतिं प्राप्स्यति सुस्थिरां वै ॥५८॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्र
करणे धर्मोपदेशे संन्यासधर्मेषु त्यागिहेय कर्मतत्प्रायश्चित्तनिरूपणनामैकचत्वारिंशोऽध्यायः
॥४१॥ ब्राह्मण उवाच ॥ चातुर्वर्ण्यं नरेषु ये स्युर्येनाम्येरस्तुवृत्तयः ॥ किरातप्रमुखास्तेषां धर्मान् ब्रूहि जग
द्गुरो ॥१॥ श्रीनारायणमुनिरुवाच ॥ चातुर्वर्ण्यं नरेष्वेतु सत्तं वैदहकादयः ॥ किरातशोकं काद्यायेच स्युर्द
स्युवृत्तयः ॥२॥ मातापितोर्हि शुश्रूषा गुरोश्चाश्रमवासिनाम् ॥ भूमिपानां च कर्त्तव्याते र्विप्रसहितार्थिभिः
॥३॥ वृत्तिः संकरजातीनां तत्कुलागमता ॥ कुलाचारगता हिंसा वर्ज्या चैर्यं च सर्वथा ॥४॥ अहिंसा सत्यम

क्रोधः शौचमद्रोहस्तथैव च ॥ धर्मा एते हि सामान्याः सर्वेषां समुदीरिताः ॥ ५ ॥ तैः सर्वैः पितृयज्ञाश्च का-
र्याः कृपाः प्रयासतया ॥ दानं देयं यथाशक्ति ब्राह्मणेभ्यश्च भक्तितः ॥ ६ ॥ दक्षिणा सर्वयज्ञानां दातव्या धनि-
भिश्च तैः ॥ अन्नवस्त्रादिभिः कार्यं पुत्रदारादिपोषणम् ॥ ७ ॥ सर्वथा स्त्री न हंतव्या सर्वैः सत्येषु केनचि-
त् ॥ दुष्यमाणो हि हंतव्यो न च ग्राह्या बलात्स्त्रियः ॥ ८ ॥ गवां सतां च विप्राणां पोष्यं रक्षणमेव वै ॥ न पत्नी च
शिशुर्नीरुन्नं हंतव्याः कदाचन ॥ ९ ॥ सर्वैस्तैर्नापि कर्तव्या शूपान्ततपस्विनाम् ॥ अन्नैः फलैरंबुना वा
कार्यं चातिथितर्पणम् ॥ १० ॥ देवाश्च पितरो विप्रा मान्याः पूज्याश्च भक्तितः ॥ येतांश्च पीडयेयुस्ते
शिक्षणीया यथोचितम् ॥ ११ ॥ न सस्यसस्यमपहर्तव्यं परक्षेत्रात्स्वदस्युभिः ॥ जीविकासाधनं यत्स्याद्या-
नीयं न कस्यचित् ॥ १२ ॥ नातिक्रमः सतां क्वापि कर्तव्यो मनसाप्यपि तैः ॥ कृते तु स्फुटते सर्वं सम्-
तं नश्यति ध्रुवम् ॥ १३ ॥ इति संकरजातीनां दस्यूनां च हिता वहाः ॥ धर्माः प्रोक्ता यथाशास्त्रं मया श्रेय-
स्करा हि ते ॥ १४ ॥ सुव्रत उवाच ॥ इति प्रोक्तान् भगवता श्रुत्वा धर्मान् सनातनः ॥ प्रसन्नो धरणीपाल पुनः
पप्रच्छ तं प्रभुम् ॥ १५ ॥ ब्राह्मण उवाच ॥ धर्माः प्रोक्तास्त्वया स्वामिन्नृपस्य कृपयानुक्रमात् ॥ वर्णानामाणां ॥ ८२ ॥

च नराणां च सर्वशः ॥ १६ ॥ अधुनाथो तु भिक्षामि प्रायश्चित्तविधिं प्रभो ॥ पापस्य संभवे काप्यो वर्णा-
नां विहितोत्र यः ॥ १७ ॥ महतामपि पापानामल्पानां च जगद्गुरो ॥ निष्कृतिं ब्रूहि मे सर्वां कर्तव्यां सर्व-
मानवैः ॥ १८ ॥ शृत्वा नां तत्र कार्याणां कृच्छ्रादीनां च सर्वशः ॥ लक्षणान्यपि मे स्वामिन् कृपया वक्तु-
मर्हसि ॥ १९ ॥ सुव्रत उवाच ॥ इति तेन स पृष्टोवाच हरिर्नैतु धर्मरहस्यमशेषमपि ॥ अवगंतु मुदार-
धिया नृप तं मुदितश्च यथागममेव च ॥ २० ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंच-
मप्रकरणे धर्मोपदेशे शंकरजातिधर्मनिरूपणनामा द्विपंचाशोऽध्यायः ॥ ५२ ॥ श्रीनारायण-
मुनिरुवाच ॥ प्रायश्चित्तविधिं विप्र कथये तेऽसमासतः ॥ विस्तरोऽस्य तु शास्त्रेषु सारमात्रमिहोच्यते
॥ १ ॥ गुरूणां च लघूनां च स्वस्य कृतपापकर्मणाम् ॥ साधनं यत्तु देवाद्यैः प्रायश्चित्तमितीर्यते ॥ २ ॥ अथ
त्रिधानि च पापानि प्रोक्तान्येव महर्षिभिः ॥ पातकं तु महापापमुपपापं प्रकीर्णकम् ॥ ३ ॥ प्राप्ति-
लोपं पंचमं च पश्चमस्याधिपातकम् ॥ स्युर्द्वैतानि षट्त्रिंशतकं काम्याकामकृतत्वतः ॥ ४ ॥ महापापं-
स्यपापानि कथ्यते पातकान्यथा ॥ ब्रह्महत्याकरापानं स्वर्णस्तेयं तत्प्रियकर्म ॥ ५ ॥ गुरुस्त्रीगमनं

चैतस्यापहृतं गएकुच॥ महापापानिधानीति पंच प्रोक्तानि सत्तम॥६॥ पातकाद्भवेन्मूनं नतु कृत्स्नमु
पपातकम्॥ महापापाद्यदधिकमतिपापं तदुच्यते॥७॥ तस्माद्प्यधिकं यत्तत्प्रोक्तमत्यधिपातक
म्॥ उपपातं तु यत्प्रोक्तं तत्प्रकीर्णमिहोच्यते॥८॥ प्रायश्चित्तं तु यद्युक्तं प्रोक्तमत्र च तद्बुधैः॥ अकाम
तः कृते पापे तद्द्विगुणमन्यथा॥९॥ ज्ञात्वाभ्यासकृते पापे प्रायश्चित्तं न विद्यते॥ नरकान्तु कृत्यों
नि भुक्त्वा तत्पापान्नमुच्यते॥१०॥ कर्ता कारयिता तद्वदनुमन्ता सहायकृत॥ अनुग्राहकरस्तेन क
र्मणां फलभागिनः॥११॥ कन्येकादशवर्षस्य पंचवर्षात्परस्य च॥ प्रायश्चित्तं चरेद्भ्राता पिता वान्यः
सुहृज्जनः॥१२॥ बाल्ये मैनव षष्ठाब्दात्पूर्वं पातकमस्ति हि॥ न राजदंडः तस्यास्ति प्रा
यश्चित्तं न विद्यते॥१३॥ एकादशाब्दतो बालः षोडशाब्दावधिस्त्वयम्॥ प्रायश्चित्तार्धं कुर्वीत त
दशोधिस्त्रीयस्तथा॥१४॥ बुद्धिपूर्वेन कर्तव्यं पातकं कापि केनचित्॥ अकामतः सकृज्ज्ञाते तस्य
कुर्वीत निष्कृतिम्॥१५॥ ज्ञात्वैव पर्षदं दत्वा गां सुवर्णं च पुरुषः॥ बद्धाञ्जलिः सदुष्कर्म पापं स्वीयं
निवेदयेत॥१६॥ पर्षद्दशावरैर्विप्रैर्ब्राह्मणानामुदीरिता॥ वेदशास्त्रार्थसंपन्नैः धर्मनिष्ठैर्जितेंद्रियैः
॥१७॥ वेदशास्त्रविदो विप्रा यद्दृष्टुः पंच सप्त वा॥ त्रयोपि सधर्मः स्यादेको वाध्यात्मवित्तमः॥१८



१८ पर्षच्छ्रा ब्राह्मणानां तु सा राज्ञां द्विगुणा मता वैश्यानां त्रिगुणा प्रोक्ता पर्षद्वच्च व्रतं स्मृतम् १९ नै
व लक्षेण मूर्खाणां न स्वैरं वा धर्मवादिनाम् पर्षद्भवेन्न लुब्धानां न चापि पक्षपातिनाम् २० न मात्रुटैर्न
त्रुष्णैर्न लघुरूपैर्धनान्वितैः त्रिभिरेकेन पर्षत्स्याद्विद्वद्भिर्विदुषापि वा २१ श्रुताध्ययनसंपन्नः सत्यवाक्
शीलिजितेन्द्रियः सदा धर्मरतः शान्तोयः स पर्षत्त्वमर्हति २२ वयसा तनवोपि स्युर्यदि धर्मविदो द्विजाः त
एव वृद्धा विज्ञेया न मूर्खाः पलिता वृथा २३ यत्र सत्यं तत्र धर्मो यत्राधर्मस्त्वितरत्र च धर्मो जयति नाध
र्मः सत्यं जयति नानृतम् २४ निष्कृतीश्च व्यवहारे च ब्रूतस्मादेशनेन तथा धर्मं वा यदि वाधर्मं पर्षद्यत्राह
तद्भवेत् २५ ज्ञाति पंचं व्यवहारं च प्रायश्चित्तं चिकित्सितम् अजानन्यो ऽन्यथा ब्रूयात्स महापातकी
भवेत् २६ पर्षदुक्तक्रियाचारात् पातकी तु भवेच्छुचिः तत्रोक्तोपह्यधर्मः स्यात् पर्षत्तेन तु लिप्यते
२७ तस्माज्ज्ञात्वा समाश्रित्य धार्मिकैः पापभीरुभिः धर्म एव हि वक्तव्यः पर्षद्भिर्ब्राह्मणैर्नरैः २८ स्त्रीणां च
बालवृद्धानां क्षीणानां कृशगात्रिणाम् उपवासाद्यशक्तानां कर्तव्योऽनुग्रहस्तथा २९ ज्ञात्वा देशं च
कालं च वयः सामर्थ्यमेव च कर्तव्योऽनुग्रहः सद्भिर्ब्राह्मणैर्धर्मवेदिभिः ३० लोभान्मोहाद्भयाद्वापि आग्र
हि कुर्युरनुग्रहम् नरकान्यान्ति ते सर्वे रौरवान्नात्र संशयः ३१ धार्मिकैरेवमन्यादि धर्मविद्भिः पुरा

स॰ जी॰ पं॰ तत्रैः धर्मः प्रोक्तोऽस्ति न तन्मैस्तत्तो वाच्यो विचार्य सः २० देशाचारं कुलाचारं ग्रामाचारं विबुधस्त्व ग्रं॰ ५४

८५ शास्त्राचारः प्रवक्तव्यः सहसा न तु कर्हिचित् २२ पर्षदुक्तप्रकारेण पातकी व्रतमाचरेत् तेनैव च

हि मर्त्यो च्छुद्ध्येत्स्त्वन्यथा नरकं व्रजेत् २४ रहस्यपापकर्मा तु शास्त्रं दृष्ट्वा स्वयं बुधः यथोक्तनिष्कृतिं कु-

र्यादेनस्त्वोऽपि शास्त्रं सद्बुधम् २५ तत्राऽऽदितस्ति महतामघानां नेर्षां समानां च ये पापाः ऽपशान्त्युम् वदाम्य-

हं निष्कृतिमत्र शक्त्यानुनिर्विधेयां द्विजवर्यसुतैः २६ ॥ इति श्रीमत्सुंगिरीवने नारायणचरित्रे धर्मशा-

स्त्रे पंचमप्रकरणे धर्मोपदेशे प्रायश्चित्तविधौ पथ्यन्निरूपणं नाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ श्री-

नारायणमुनिरुवाच ॥ ब्राह्मणो ब्राह्मणं हत्वा प्रवृत्त्या मात्र दास्वपम् द्वादशाब्दान्यकुर्वीत व्रतं पा-

पानुत्तये १ धृत्वा कपालं शिरसः स्वहतस्य द्विजन्मनः अन्यस्य वा तदभावे तोऽचिकार्यस्य करे पुनः २

द्वितीयेऽन्यत्कपालं च दंडाग्रारोपितं करे उपावीतं न्यस्य खट्वांगं भिक्षार्थं योजितं दधत् ३ वसेद्वने कुटीं

कृत्वा ग्रामाद्वावहिरेकलः वृक्षमूलेऽथवा वाऽजवासाः सर्वहितेरतः ४ वन्यैः फलादिभिर्जीवेत् क्रमाद्वा

भैक्ष्यमाहरेत् अकल्पिता सप्तगृहान्याचे स्वं कर्म वेदयन् ५ भुंजीत स्थानमागत्य सकृदेव जितेंद्रियः

पालयेद्ब्रह्मचर्यं च स्वधर्मस्थोऽमराधरः ६ नित्यं शीतोदके स्नायात्क्वचिन्नो यानि शुद्ध्ये सर्वत्राचेद्यं ८५

न्कर्म दुर्गेका लेविशुद्ध्यति ७ चोरव्याघ्रादितो रक्षन्विप्रं गां वा म्रियेत चेत् जीवेद्वासौ यपूर्णस्त्व

द्वादशाब्दोऽपि शुध्यति ८ कस्यापि वाजिमेधांते न्यभृदेवसंगमे एनोनिवेद्यावभृथे स्नात्वाप्या-

शु विशुध्यति ९ तीव्ररोगं द्विजं गां वा प्रारब्धद्वादशाब्दिकः नीरोगमौषधैः कुर्याद्युक्त्याद्यैः सोऽपि

शुध्यति १० प्रायश्चित्ते समारब्धे कर्त्तर्यपि विपद्यते इतस्ततो हरेवाऽस्माविह लोके परत्र च ११ पा-

पस्यानुग्राहकः कुर्यात्स्मादूनं तु तद्व्रतम् प्रयोजकोऽर्द्धं कुर्वीतानुमंता सार्द्धपादकम् १२ प्रोत्साहका-

दिभिः कार्यमेकपादं व्रतं त्विदम् वचसा चेत्तु हिंसायां पादार्द्धं व्रतमाचरेत् १३ मनसा चेद्ब्रह्महत्यां

यः कुर्यात्सोऽप्युपावसेत् दिनानि द्वादशातः पंचगव्येन शुध्यति १४ तिरस्कृतो यदा विप्रोऽपरहस्ते

नाधिकारणात् क्रोधादात्मानमाहन्यनिर्गुणोऽपि म्रियेत चेत् १५ कृच्छ्रं वर्षत्रयं कुर्यात्पतितो मांस-

रस्वतीम् गच्छेद्वात्मविशुद्ध्यर्थं निमज्ज्यास्यात्ततः शुचिः १६ द्वादशाब्दमिदं तु स्यात्प्रायश्चित्तमीरि-

तम् विप्रे तन्निर्गुणे ज्ञेयं सगुणे द्विगुणं चरेत् १७ अशक्तो द्विगुणं कर्तुं कृत्वाद्यं द्वादशाब्दिकम्

अन्यार्थं गोसहस्रं तु पात्रेभ्यः प्रतिपादयेत् १८ ब्राह्मणं क्षत्रियो हत्वा द्विगुणं वा यदृच्छाकामतः आ-

द्यस्तु द्विगुणं विप्रात्त्रिगुणं तु पश्चरेत् १९ प्रायश्चित्तं गृहस्थे सोऽद्विगुणं ब्रह्मचारिणाम् त्रिगुणं

तुरगस्थानां यतीनां तच्चतुर्गुणम् २० गुरूणामप्यधिक्षेपो नास्तिक्यादिदर्शनम् असच्छास्त्रा 
विनोदश्चैरधीतनिगमस्मृतिः २१ राज्ञो मूर्द्धाभिषिक्तस्य दीक्षितस्य च योषितः गर्भिण्याः सव
नस्थायाश्चात्रेय्या घातनं तथा २२ गर्भघातश्चौषधाद्यैः शरणागतघातनम् पातकानीति वि
दित्वं ब्रह्महत्यासमानि हि २३ महापापेषु यत्प्रोक्तं तदर्द्धं तु समाचरेत् सुरापानस्य कथ्यते प्राय
श्चित्तमतः परम् २४ ब्राह्मणः क्षत्रियो वैश्यः सुरां पिबति चेत्सकृत् अकामतः स तु मानार्द्दवा
साद्धिमांतिके २५ लोहे पात्रे वह्निवर्णां सुरां कृत्वा पिबेत्स्वयम् तेनैव पात्रेण ततो मृतः शुद्धिमवा
प्नुयात् २६ अथवा द्वादशैवाब्दान्पूर्ववद्व्रतमाचरेत् सुराचिह्नं ध्वजं हस्ते पानपात्रं च धारयेत्
२७ अन्यत्तु पूर्ववत्सर्वं कुर्यात्तीर्थान्यनेकशः पूर्णे काले ततः शुद्धेत्पुनःसंस्कारकर्मणा २८
अमादुदकबुद्ध्या चेत्सुरापानं कृतं तदा तूर्द्विवार्तो व्रतं कुर्यात्त्रैवार्षिकमघापहम् २९ यद्यज्ञाना
त्पिबेद्विप्रो द्विजातिर्वा सुरां पुनः संस्कारकरणाच्छुद्धिरिति शातातपोऽब्रवीत् ३० मलहं भक्षयेदज्ञो
पित्पाकं वा कणान्सकृत् पंचगव्यं पिबेत्स्यात्ततः शुद्धिमवाप्नुयात् ३१ औषधे केनचिद्द्यापीता
ज्ञात्वा सुरां यदि सोऽपि चान्द्रायणं कुर्याद्दानं दद्याच्च शक्तितः ३२ सुरापात्रस्थितं तोयं द्विजः कश्चित्त्पि ८५

पेद्यदि दिनत्रयं क्षीरभृत्तां पिबेद्धां सुवर्चलां ३३ साक्षात्सुराया घ्रेद्गंधमिच्छया जिघ्रति द्विजः
चरेत्सांतपनं कृच्छ्रं प्राणायामसमन्वितम् ३४ निषिद्धलशुनादीनां बुद्धिपूर्वं तु भक्षणं सत्स्व कौशि
लमुत्कर्षे स्वस्य चानृतभाषणम् ३५ सुहृद्वधः कूटसाक्ष्यं पुष्पिणीमुखचुंबनं सुरापानसमानी
तिपातकान्युदितानि ते ३६ महापातकतुल्येषु व्रतमर्द्धमुदीरितम् कूटादीनां च नाराणां ज्ञात
यः पूर्ववद्विधिः ३७ ब्राह्मणस्वामिकं स्वर्णमाषैः षोडशभिर्मितम् त्रैवर्णिको यदि हरेत्तत्स्माप
ख्रिलमुच्यते ३८ आर्द्रवासा मुक्तकेशः स्तेनो मुसलमायसम् आदाय गत्वा सहसा राज्ञे कर्म नि
वेदयेत् ३९ अनेन मुसलेनैव मां जहीति वदेत्ततः ततो राजापि धर्मज्ञो हन्यात्तेन स्वयं सकृत् ४०
मृतः शुद्धिमवाप्नोति जीवेच्चास शुचिर्भवेत् अथवा द्वादशाब्दं तु व्रतं पूर्ववदाचरेत् ४१ मलस्वं
चेद्धलेस्वर्णं बजान्न्यर्हं करेद्यत् कार्षासिंच परोक्षे चेच्छिक्षार्थं स्वनमंध्वजे ४२ स्वर्णे चेदधिकं माना
दूनेवात्तर्हि निष्कृतो तारतम्यं विधातव्यमूनमूनेऽधिकेऽधिकम् ४३ यद्यापदा हरेत्स्वर्णं पादकृच्छ्रं त
दूतं चरेत् तीर्थानि वा प्रमेदिशान् ततः स्तेयाद्विमुच्यते ४४ मनसापीऽप्यपहरेत्सुवर्णं ब्राह्मणस्य
सः द्वादशाहानि वा ताशी भवेन्नियमवान्व्रती ४५ ब्राह्मणस्त्रीमनुष्याश्वगोभूरत्नापहरणम् कूप्या

स॰नी॰पं॰ पिनिद्रे प्रकृतिः स्वर्णस्तेयसमं स्मृतं ४६ गुरुस्त्रीगमनं तुर्यं महापातकमुच्यते मुख्यो गुरुः पिता तत् प्र॰४४
८६ स्त्री सपत्नी जननी मता ४७ चातुर्वर्ण्योऽपि पुरुषः सकृत्तां यदि गच्छति तन्महापातकं तस्य प्राय
श्चित्तमिदं चरेत् ४८ मुण्डयित्वा लोमकेशान् घृताभ्यक्तो दिगंबरः तप्तायां लोहशय्यायां सूर्मी
मालिंग्य चाप्नुयान्मृतिम् ४९ अग्नितप्तामग्निवर्णामभिताप्य स्वकर्म च स्वपन्मृतो विशुद्ध्येदिति ततः
कुत्सितकर्मकृत् ५० अथवा वृषणौ छित्वा सलिंगौ स्वेन पाणिना धृत्वा व्रजेन्नैर्ऋतां शां पृष्ठतोऽन
वलोकयन् ५१ कुशादिभिर्निर्गतरि तं वर्ज्य यावद्विसर्गः तिष्ठेत्तत्र व्रतं चैवमरणांतं ततः शुचिः
५२ द्वादशाब्दं व्रतं कुर्यादथवा पूर्ववत्करे लिंगं चिह्नं ध्वजे कृत्वा पूर्णे काले विशुध्यति ५३ अज्ञाना
त्कस्य पुंसस्तु प्रायश्चित्तं पराशरः मुनींद्रः स्वल्पमप्याह देशकालानुसारतः ५४ सेवकस्त्वं चरेत्कृच्छ्रं
ज्ञायस्वमपापि वा चांद्रायणं चरेद्वापि स्त्रीन्यासान्नियतेंद्रियः ५५ मातृस्वसा पितृस्वसा पितृव्यस्य
स्त्री च मातुली आचार्यस्त्री मित्रपत्नी सगोत्रा व्रतचारिणी ५६ श्वश्रूः प्रव्रजिता राज्ञी शिष्यस्त्री चा
र्यपुत्र्यपि स्वसुः सखी पुत्रिणी च निक्षिप्ता शरणागता ५७ ब्राह्मणस्त्री कुमारी च धात्री चान्नप्र
दायिनी आसामन्यतमां गच्छन् गुरुतल्पग उच्यते ५८ लिंगस्योत्कर्तनं कार्यं व्रतं तु नव वार्षिकं ८६

म् पुंसोऽनेनाज्ञानतश्चेत्कृतं षड्वार्षिकं तदा ५९ जननीं भगिनीं पुत्रीं स्नुषां गच्छति चेन्नरः अति
पापमिदं तस्य निष्कृतिर्वह्निवेशनं ६० महापातकिसंसर्गो जायते यस्य वत्सरम् भोजनासनश
य्याद्यैः स महापातकी भवेत् ६१ यत्पापिनोऽस्य संसर्गस्तस्य यद्व्रतमीरितं तद्द्वादशाब्दं कुर्वीत त
तः कालेन शुध्यति ६२ संसर्गदोषः सर्वत्र पातकेष्वेवगम्यताम् पापकर्तुर्हितं कुर्यादपि तत्संगमा
श्रितम् ६३ पापिसंसर्गिसंसर्गी पादोनं तद्व्रतं चरेत् एतत्क्रमेण वोद्धव्यं तारतम्यं च संगिषु ६४
व्रतं जपादिसाध्यं वै निमित्तिकमिहोच्यते द्वादशाब्दादिकं तत्तु विप्राद्यैर्हि द्विजातिभिः ६५ कर्त्तु
शक्यं ततः स्त्रीभिरर्धिर्द्धैः पुरुषैरपि विषमुनामचतुर्थं तत्र मौनं मंत्रं ज्वलाम् ६६ शूद्रोऽधिकार
हीनोऽपि कालेनानेन शुध्यति दानोपवासगोविप्रशुश्रूषाभिरपि ध्रुवं ६७ संक्षेपतः कोऽप्यमु
दारबुद्ध्या मया महापातकनिष्कृतादेः मिताक्षरादेर्भवता वगम्यः सविस्तरोऽन्योऽप्यविधिस्तु सर्वः
६८ ॥ इति श्रीमत्संगिनीनंदनेनारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे प्रायश्चित्तविधौ
महापातकोपपातकातिपातकप्रायश्चित्तनिरूपणं नाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ श्रीनारायण
मुनिरुवाच ॥ मासं चांद्रायणेनैव पयःपानेन वा द्विज उपपातकशुद्धिः स्यादिति सामान्यनिर्णयः

१ उपपातानि गोहत्याद्यान्यल्पास्तेन कर्म च अप्यल्पविक्रयः पारिवित्त्यं च परिवेदनम् २ भृतकाध्या-
पितत्वं च भृतकाध्यापनं तथा पारदार्यं स्त्र्यादिवधो नास्तिक्यमवकीर्णिता ३ तडागादेश्च विक्रय-
श्च हीनयोनिनिषेवणम् ऋणानपाक्रियाद्यानि संति तेन निष्कृतिं ब्रुवे ४ अज्ञानाद्दुर्बलां वृद्धां
गां हत्वाद्युदिवाऽद्भवः लकुटेनाऽश्मनावापि सा म्रियेत चरेत्तर्हि सः ५ मासमेकं निराहारः पंचगव्या-
शनो यमी ब्रह्मचर्यव्रती नित्यं गोमेवानुसरेन्नवेत् ६ स्नायात्त्रिषवणं धीरोऽनुव्रजेद्वनगोचरां
निरुपानद्यत्र यत्र सा गच्छेत्तामवारयन् ७ तिष्ठेत्तस्थितायां तस्यां च चलितायां चलेद्यः नि-
षण्णायां निषीदेत्सहेत्तीक्ष्णहिमानिलान् ८ सायं गोष्ठे तत्समीपे शयीत नास्तृते व्रती एवं प्रति-
दिनं कुर्वाण्यात्मसंनियतेन्द्रियः ९ चौरव्याघ्रादिनीतां गां मातुरां च गदैरपि पतितां पंकलग्नां वा
शक्तेरपि विमोक्षयेत् १० आत्मनो यदि वा गेहे क्षेत्रे खलेऽथवा भक्षयन्तीं न कथयेत्पिबं-
तमपि वत्सकम् ११ मासान्ते पात्रविप्राय धेनुं दद्याद्यथाविधि हेमशृंगीं रूप्यखुरां सवस्त्रां कांस्य-
दोहनाम् १२ ताम्रपृष्ठां सुशीलां च सवत्सां रत्नलोचनाम् मूल्यं कांतां न वा गृह्णीं सुरूपां च पयस्वि-
नीं १३ ततश्च दक्षिणां दद्यात् वित्तशाठ्यविवर्जितः तर्पयित्वा ततो विप्रान् शुचिः स्यात्तदनुज्ञया १४ 

श्रोत्रियस्य गुणवतो वा दरिद्रां हंति हंतिना तदा वर्षत्रयं कुर्याद्व्रतमेतत्तु भैक्ष्यभुक् १५ आर्द्रंह-
त्वा पापी गोश्चर्म प्रावृत्य आपपन्न स्वकम् दुष्कर्म च ततः शुध्येत्काले पूर्णे समागोवधात् १६ अस्थि-
भंगं गवां कृत्वा नौ मूत्रछेदनं च वा पारनं देत शृंगाणां मासार्द्धं तु व्रतं चरेत् १७ विद्युत्पाताग्नि-
दाहाभ्यां कूपपाताद्भिस्तथा गोभिर्विपत्तिप्राप्ताभिर्न दोषो विद्यते नृणां १८ प्रायश्चित्तमिदं
प्रोक्तं पूर्णमेव द्विजस्य तु पादोनं क्षत्रियस्यार्द्धं तदर्द्धं चान्ययोः क्रमात् १९ संस्काररहितो विप्रो ब्रा-
ह्मच्युते स चेत् गौणकालेऽपि नो कुर्यात्संस्कारं तर्हि शुद्धये २० वर्त्तेत यावकेन द्वौ मासौ मासं
पयोव्रती आमिक्षाशी भवेत्पक्षमष्टरात्रं घृताशनः २१ अयाचितेन षड्रात्रं वर्तेताब्दिर्दिनत्रयम्
अहोरात्रं चोपवसेत्संस्कारेण ततः शुचिः २२ पातकं स्तेयमस्यत्र विप्रगृहाद्यदि विप्रो हर-
तिधान्यं वा हेमान्यस्मृतं तदा २३ कृच्छ्रव्रतानि कुर्वीत शुचिर्नियमतत्परः एकाब्दं सततः शुध्येत
द्वसञ्च पंचपाल्यन् २४ क्षत्रविट्शूद्रगेहेभ्यो हरेत्तु यदि वा द्विजः विप्रार्द्धं तदर्द्धं च तदर्द्धं व्रतं च-
रेत् २५ स्वल्पधान्यपशुत्तृणकाष्ठादि यो हरेत् प्रायश्चित्तं तत्र कुर्यात्तत्मूल्यानुसारतः २६
मत्कुणोऽन्नपर्याप्तधामेन सममूल्यकम् द्रव्यं हृत्वा तु पंचसंखं गव्याशनः शुचिः २७ एकाहोरा

स.नी.पं. त्रमथ चेत्पूर्वस्माद्द्विगुणं हनम् तदाश्विन्द्वयं कुर्यादुपवासं ततः शुचिः २८ एतत्क्रमेणाचोदर्थं य ग्रं०७५
९८ धान्येयं तथा व्रतं आद्येन स्वामिने दद्याद्धृतं पश्चाद्व्रतं चरेत् २९ नैरंतर्येण कुर्वीत यथाशक्ति तु
न पुनः कृच्छ्रव्रतानि यावत्स्वास्थ्यं प्रायश्चित्तं दिनावधिः ३० यो यस्यापहरेद्भूमिं हेम गामश्वमेव वा
सर्वं तस्मै प्रत्यर्प्य सावित्र्या पितृकृच्छ्रः शुद्धिमाप्नुयात् ३१ आख्याय स्वपतिं चापि तेन संतोषितः शुचिः
द्रव्यं स्वं द्विगुणं कीवा तपसा वाशु चिर्भवेत् ३२ विक्रीणीत यदा विप्रो मद्यं पक्वान्नमेव च गुडं
तिलं पुष्पफलं सोमं कृच्छ्रं तदाचरेत् ३३ लाक्षा लवणं तैजानि पयो दधि घृतानि च विक्रीत्वा च
मेवासं स्वर्ण दिनं चान्द्रायणं चरेत् ३४ अयो मनःशिला शुक्ति गुग्गुलं चंदनं गैरिकान् हिंगूलं धे
नुं शंखं गाम मद्यं चाश्विन स्वराजन्य हरेम् ३५ मणिमुक्ताप्रवालांश्च वेणुं वैण वस्त्र न्ययान् विक्रीत्वा
चभुवं विप्रस्तु सकृच्छ्रं व्रतं चरेत् ३६ सोदर्ये तिष्ठति ज्येष्ठे नु जस्य स्वाग्नि संग्रहः परिवेदनमित्यु
क्तं परिवेत्ता च सोऽनुजः ३७ कनीयसि तथा प्रोक्ते ज्येष्ठस्याग्नि संग्रहः पारिवित्यं स तु ज्येष्ठः
परिवित्तिरिहोदितः ३८ ताबुभौ वत्सरं विप्र गेहे पुरुतं भैक्ष्यकौ प्राजापत्येन कृच्छ्रेण ततः शुद्धि ९८
मवाप्नुतः ३९ पर्णं कृत्वा पाणयति यो यः पवति ताबुभौ ब्राह्मी सुवर्चलां पीत्वा सार्द्धमासं च शु

ध्यतः ४० पारदार्ये तु विप्रास्तु विलेयं गुरुतल्पवत् कामतो ब्राह्मणो विप्रां यदि व्यभिचारिणीं ४१ ग
त्वैत्रैवार्षिकं कुर्याद्दिनं तु ब्रह्मचर्ययुक् विप्रश्च क्षत्रियां गत्वा व्रतं द्वैवार्षिकं चरेत् ४२ तपश्च यत्र तेषु
व्याप्ति यासर्वत्र सत्तम तपो निश्चय संयुक्तं प्रायश्चित्तं यतो मतम् ४३ सकृत्क्रमेः विप्रो भोजायेतेत
द्दितु व्रतं कर्तव्यं द्विगुणं सर्वैः सर्वत्राघ प्रशांतये ४४ वैश्यां गत्वा ब्राह्मणस्तु व्रतमब्दं समाचरेत्
सगोत्रादिषु सर्वेषां पापं तु गुरुतल्पवत् ४५ शूद्रीं गत्वा तु सकृद्विप्रो व्रतं षाण्मासिकं चरेत् तस्यां गर्भो
भवेत्कुर्याद्व्रतं चैव वार्षिकं तु सः ४६ क्षत्रियः क्षत्रियां वैश्यां शूद्रीं गच्छन्नकामतः द्विवार्षिकं वार्षि
कं षाण्मासिकं यथा चरेत् ४७ वैश्यो वैश्यां तथा शूद्रीं गत्वा पूर्ववदाचरेत् षाण्मासिकं तथा शूद्रः
शूद्रीं गत्वा व्रतं चरेत् ४८ प्रातिलोम्य व्यवायेतु यावज्जीवं व्रतं मतम् ब्राह्मणीगमने त्वेते प्रविशेयुर्हु
ताशनम् ४९ विप्रो मोहाद्यदा गच्छेद्दत्तजां व्यभिचारिणीम् सकृदेव तदा तेषु कुर्याच्चान्द्रायणद्वयम्
५० स्त्रीणां सवर्णानुलोम व्यवायेऽपि व्रतं मतं त्रैवार्षिकादिकं सर्वं पुरुषस्यैव गम्यताम् ५१ अज्ञा
तानां तु नारीणां व्रतं चान्द्रायणं मतम् कृच्छ्राणि च यथाशक्ति व्यवायस्य विशोधनम् ५२ अज्ञाता
नां तथा पुंसां पारदार्य विशोधनम् चान्द्रायणव्रतेनेति पराशर ऋषिर्जगौ ५३ चान्द्रायणं नरस्तेन तु

स.शी.पं० स्नानार्थं पियामकृत् तदन्नं भुक्त्वा प्रविशेत्स्याद्यदि प्रेतकृताशने ५४ अथ कामाद्दतिविप्रां यदि गच्छ प्रा०३५
९९ भिचारिणीम् तदा तु भवति कुर्यात्कृच्छ्रमब्दं समाहितः ५५ हत्वा च क्षत्रियां वैश्यां शूद्रां च व्यभि
चारिणीम् प्राणमासिकं तदर्द्धं च तदर्द्धं च व्रतं चरेत् ५६ गुणवत्सम्पन्ना यदि हि हतास्त्रीकामात्तम्
दास्त्याब्दं परं ब्दं च त्र्यब्दमब्दार्द्धमाचरेत् ५७ तथा निर्गुणा क्षत्त्रादिवधे सकृदकामतः ब्रह्महत्या
व्रतं कुर्यात्त्र्यब्दमब्दं तदर्द्धकम् ५८ सत्त्रादिके गुणवति त्वष्टपद्धतीणित्वाद्विन वर्षाण्येतं कुर्यात्तितः
शुध्यति पातकात् ५९ गजे वृषाः पंचनीलाः शुक्रे वत्सो द्विहायनः खरानमेषे पुत्तोदेयः क्रौंचे त्रि
हायनः ६० हंसश्येनकपिक्रव्यजलस्थलशिखण्डिनः भासं हत्वा च दद्याद्गामक्रव्यादस्तु वत्सिका
म् ६१ सर्पं हत्वा लोहदंडं दातव्यो ब्राह्मणाय च पंढके मृगपक्षादीन् हत्वा तु त्रपुसीसकम् ६२ कोलेषु
तघृतोदेय उष्ट्रे गुंजा हये शुकम् तित्तिरौ तु तिलद्रोणं गजादीनामशक्नुवन् ६३ दानं दातुं चरेत्कृच्छ्रमे
कैकस्य विशुद्धये तत्राहे पंचगव्याशी दिने चोपवसेत्परे ६४ मार्जारगोधानकुलमंडूकांश्च पतत्रिणः
हत्वा त्र्यहं पिबेत्क्षीरं पादकृच्छ्रं तु वाचरेत् ६५ फलपुष्पान्नरसजानिष्टिं जे तु निपातने प्रायश्चित्तं
प्रकुर्वंस्ते प्राणायामो घृताशनम् ६६ फलदानां तु वृक्षाणां छेदने जप्यमृक्शतम् गुल्मवल्लीलता ९९

नां च वीरुधा ६७ चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये जातद्रुमाणां द्विगुणं तपश्चाख्यात ज्ञाति
नाम् ६८ रेतसः पातनं कृत्वा कृत्वा चानृतभाषणम् सहस्रं तु जपेदाश्वा पश्ये पालि वाकूपदां
६९ सकृच्चास्तिक्यभावेन कृते वेदस्य निंदने प्रायश्चित्तं प्रकुर्वीत प्राजापत्यं स्वशुद्धये ७० ब्रह्मचा
री स्त्रियं गच्छेदवकीर्णी स चेन्महत् तदा काणखरेणाग्नौ जो कि के निर्ऋतिं यजेत् ७१ राज्ञो च तु भ
येरल्पे व्रतं कुर्यात्ततःपरं ऊर्ध्ववालं तदजिनं परिधाय वने वसेत् ७२ ग्रामे सप्तगृहान्भिक्षेदा
त्मनो हि तपातकः सतडुनीतेकवारं स्नायात्त्रिषवणं यमी ७३ सा स्त्री चेद्ब्राह्मणी तर्हि क्षीताति वर्णाति
कृच्छ्रं चरेत् क्षत्रिया यदि वैश्या वा द्वे चैकं वर्षमाचरेत् ७४ शूद्रां गत्वा तु पतितोऽनिश्चये शीनः शुध्यति पाति
तं चेत्स्वयं रेतो यागमात्रं तदाचरेत् ७५ स्वप्ने रेतःस्कंदने तु स्नात्वार्च्य दिवाकरं गायत्र्यष्टशतं जप्त्वा
त्कूपवासेन शुध्यति ७६ अर्थं यागो ब्रह्मचर्यं तेयश्चांद्रायणादिषु व्रते पुनारीगमने गृहिणामपि शु
द्धये ७७ वानप्रस्थेष्वपि यतिभिर्ब्रह्मचर्यस्य विप्लवे व्रतमेतत्पकर्त्तव्यं पराकत्रयसंयुतम् ७८ एतत्कर्त्तु
मशक्तास्तु ब्रह्मचार्यर्द्धयोऽग्निजाः यावज्जीवं तपः कुर्युः स्मरेत्तो हृदये हरिम् ७९ उदपानारामसुताप
सुतदारात्मविक्रये संवत्सरं व्रतं कुर्याद्दीक्षाशीनीर्थसेवकः ८० पशुवेश्याभिगमने प्राजापत्यं विधीयते

भ.नी.पं. तेनैव मुच्यते पापादीनयोनिनिषेवणात् ८१ लौकिकं वैदिकं चापि गुरुत्तयोरन्नपाक्रिया स्वशास्त्राश्र अ.४५
५० विनापत्तिमग्निसागः प्रमादतः ८२ निषिद्धद्विजीवित्वं उपवनोत्सादनं तथा निंदितार्थोपजीवित्व
मद्यास्त्रीनां तु याजनं ८३ पितृमातृसुतत्यागः कन्या मेरुवणं तथा अन्यशास्त्रादिषु प्रीतात्माथाय
सविसर्जनम् ८४ कौटिल्यं व्रतलोपश्च स्वार्थपाकपरिक्रिया मद्यपस्त्रीसेवनं च स्त्रीषधिघांचजीव
नम् ८५ हिंस्रयंत्रविधानं च व्यसनान्यात्मविक्रय शूद्रप्रेष्यं हीनसख्यम मत्स्याद्यूतविनोदनम् ८६
आकरेष्वधिकारित्वं नित्यकर्मविवर्जनम् अनाश्रमस्थितिः पुंसि मैथुने दुष्परिग्रहः ८७ एतेषां मु
पपापानां प्रत्येकं शांतये द्विजः व्रतं चैमासिकं कुर्याद्यमैश्च नियमैर्युतः ८८ ब्रह्मचर्यं दयाक्षांतिर्दानं स
त्यमकल्कता अहिंसास्तेयमाधुर्ये दमश्चेति यमाः स्मृताः ८९ स्नानमौनोपवासेज्यास्वाध्यायोपस्थनि
ग्रहः नियमा गुरुशुश्रूषा शौचाक्रोधाप्रमादता ९० यावकं भक्षयेन्मासं द्वौ मासौ च जितेंद्रियः शा
कं हविष्यं चाश्नीयात् मितं तद्भिक्षितं सकृत् ९१ अशक्तेन तु कर्तव्यं मासं चांद्रायणव्रतम् इत्यमंत्र
जपोपेतं सर्वपातकनाशनम् ९२ तपो विना नैव भवेन्नराणां पापस्य नाशः खलु निश्चयं यः अघस्य यस्मान्न
नं निष्कृतेन नरः करोतीति न युक्तिमत्र मन्ये ९३ ॥ इति श्रीसर्वांगिनीवनेनारायणचरित्रे धर्मशास्त्रे प ५०

रमकरणे धर्मोपदेशे प्रायश्चित्तविधौ उपपातकप्रायश्चित्तनिरूपणं नाम पंचचत्वारिंशोऽध्यायः
॥४५॥ श्रीनारायणमुनिरुवाच ॥ एतन्न्यूनानि पापानि प्रकीर्णाख्यानि संति च प्रायश्चित्तं विनाऽमुत्र
पीडयंति हि तान्यपि १ द्विजो यो भक्षयेन्मांसं यज्ञशेषमपि क्वचित् स तु चांद्रायणेनैव शुद्धिं प्राप्नोति
नान्यथा २ उदक्याश्वसृगालश्वशूद्रेण पतितेन वा चांडालेन स्पृष्टं तत्साद्विजानां भोजनेन च ३ यो
ऽश्नाति दुच्छिष्टमन्नाद्यं पीतशेषं जलं पिबेत् आर्यापि वेद्वैच्छिष्टं विप्रश्चांद्रायणं चरेत् ४ वासांसि
धावतो पत्रपतत्तिजलबिंदवः रजकस्य शिलांकं तत्जलं पीत्वैंदवं चरेत् ५ साग्निः सन्धयज्ञान्यो
न कुर्वीत द्विजाधमः द्विजो योऽस्यान्नमश्नीयात्स कुर्यादैंदवं व्रतं ६ गणिकागणयोरन्नं यदन्नं वै कुरु
याजिनां महापातकिनामन्नं भुक्त्वा चांद्रायणं चरेत् ७ दुग्धं सजवणं भुक्त्वा दधि सक्तुं तथा निशि
उपपातकिनामन्नं भुक्त्वा पीडुव्रतं चरेत् ८ संस्काराश्चेत्प्रेतान्नमतिर्निद्धान्नमेव च भुक्त्वा कुर्यात्त
तक्कृच्छ्रं सूतकान्नं तथा द्विजः ९ भुक्त्वा चर्मशिलीनां च तथा शय्यासनादिषु भुक्त्वा द्विजः सकृद्वीत स्ना
नापर्समेस्व शुद्धये १० चंडालकूपिकाद्यं बु पीत्वा ग्नानाद्द्विजातयः गोमूत्रयावकाहाराः शुद्धेयुर्दिवसै
स्त्रिभिः ११ अकामतो जातिदुष्टपलांडुलशुनादिके अभक्ष्ये भक्षिते कुर्यान्महत्कृच्छ्रं व्रतं द्विजः १२ लं

स॰जी॰पं॰ कारं तु गुरोः कृत्वा हुंकारं च गरीयसः प्रसाद्य तावदनश्नन्स्नात्वा शुध्येद्द्विजोत्तमः १३ ताड अ॰४६
८२ यित्वा तृणेनापि रज्ज्वा वाऽऽबध्य कंठं न विवादेनापि निर्जित्य नं न साद्य विशुध्यति १४ पतीं पतितेन
विना ये कुर्युर्गोत्रं नं द्विजाः त्रिद्वैका हानि ते कुर्युरुपवासाननुक्रमात् १५ अशुच्यादंतधावं च प्रत्य
क्षजवणादनं मृत्तिकाभक्षणं कृत्वा पादकृच्छ्रव्रतं चरेत् १६ अपेयपानाः स्पृष्टभस्मर्शादीन्निवृ
त्तिजः प्रकीर्णपापानि विप्र संत्स्यनेकविधानि हि १७ गौरवं लाघवं तेषां दृष्ट्वा पृष्ट्वा द्विजोत्तमान् प्राय
श्चित्तं प्रकुर्वीत स्वस्वपापानुसारतः १८ विप्रादेर्ककपादोनं क्षत्रियादेर्विशोधनम् गृहस्थाच्च व
पादेयं वर्णादेर्द्विगुणाक्षितम् १९ साधवस्त्वाग्निनो ये स्युर्वैष्णवास्ते स्तुवाऽऽच प्रायश्चित्तं महाघा
देः कर्त्तव्यं ब्रह्मचारिवत् २० सूक्ष्मपापेषु सर्वत्र प्रायश्चित्तमुपोषणं दिनमेकं प्रकुर्वीत ब्रह्मचर्यादि
भिर्युतः २१ देशं कालं वयः शक्तिं पापं चावेक्ष्य यत्नतः प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिः २२
विष्णुनामोक्तिमहितं प्रायश्चित्तं प्रकल्पयेत् नवेत्तेनैव फलं दद्यैर्गुल्फरहितं तथा २३ आसंतिकी
विशुद्धिस्तु तन्नामरहितेन न प्रायश्चित्तेन तत्कुर्यान्नामोच्चारणसंयुतं २४ नारायण हरे कृष्ण राम गो
विंद माधव इत्यादि प्रवदेदन्ते मध्ये चोते क्रियाकृतौ २५ अथाल्पाधिकपापानि कथयामि समासतः ८२

पुंसां स्त्रीणां वैष्णवानां द्रोहो निंदा च भर्त्सनम् २६ हरेर्हरस्य वा गर्हा प्रतिमाखंडनं तयोः शालग्राम
स्यो निर्लिंगानां वा वेदस्य खंडनम् २७ बुद्धिपूर्वं देवविप्रगोतीर्थक्षेत्रनिंदनं अनाथप्राणिनां द्रोहः
सती द्रोहादिकानि च २८ एतत्पातककर्तॄणां दर्शने बुद्धिपूर्वकम् स्पर्शनादौ च विज्ञेयं पादकृच्छ्रं व्र
तं नृणां २९ एतेषां पातकानां तु प्रायश्चित्तेन कर्मणा सद्भिर्महर्षिभिर्नोक्ता निष्कृतिः क्वापि सत्तम
३० आगः कुर्यात्स यो येषां तेषामेव प्रसादनात् शुद्धिरस्य तु विज्ञेया नान्योपायेन केनचित् ३१ प्राय
श्चित्तमिदं प्रोक्तं स्वपापे विदिते परैः रहस्यं तु प्रकुर्वीत जपं दानं स्वशक्तितः ३२ महापापे वर्षमेकमु
पपापे तदर्द्धकं पौरुषं प्रजपेत्सूक्तं मध्यान्नावधि मौनवान् ३३ महापुरुषविद्यां वा गायत्रीं वा द्विजात
यः जपेयुस्त्वहं स्नात्वा यथामैर्युक्ता मिताशनाः ३४ नाममंत्रं भगवतो विष्णोर्वा प्रयतोऽन्वहं अयुतार्द्धं ज
पेन्मूर्तिं तस्य पश्यन्स्थिरेक्षणः ३५ गौरवं लाघवं दृष्ट्वास्य पापस्य सुधीः पुमान् प्रायश्चित्तं प्रकुर्वीत य
थाकालं समाहितः ३६ इति संक्षेपतः प्रोक्ता पातकानां तु निष्कृतिः विशेषो मुनिभिश्चास्या बहुधाऽन्यत्र
दर्शितः ३७ यस्य पापस्य कुर्वीत निष्कृतिं द्विजमानवः तत्फलं नैव भुंजीत परलोके यमालये ३८ पापं
कृत्वा रहस्यं च यदि कुर्यान्न निष्कृतिं धर्मिष्ठः कारयेद्राजा तेनैव स पतिर्यतः ३९ ब्रह्मचारिव्रनियतिर्ह

स॰नी॰पं॰ श्चित्कैश्चिद्भूपतेः नाताप्रवर्तनैः तत्तैः कार्यं यमनयास्त्वयं ५० यच्चान्यन्निन्दितं वेश्यां वा कर्मास्यन्मम् अ॰४९
९२ सुदायकम प्रायश्चित्तं मया प्रोक्तं तत्तु शास्त्रमतेन वै ५१ तस्मात्ताहृक्स्थले ज्ञेयं यावज्जीवेन पाहि
त आत्मघातस्य दोषत्वादिदमेव कलौ हितं ५२ आवश्यके सेकृते तु प्राप्ते लोकश्च पादिके वसेद्देशान्त
रे गत्वा नतु जह्यात्कलेवरं ५३ ग्राम्यं सुखं वैषयिकं तु हित्वा क्षेत्रे स्थितो यान्वितधान्यवृत्तिः द्विवाचरा
चीहरिमेव शश्वद्भजते स नश्यति पातकः स्यात् ५४॥ इति श्री सकलगीतासने नारायणाचार्ये धर्म
शास्त्रे पंचमप्रकरणे धर्मोपदेशे प्रायश्चित्तविधौ प्रकीर्णपातकाद्यधिकपातकप्रायश्चित्तनिरूपणं
नामाष्टचत्वारिंशोऽध्यायः॥ ४८॥ श्रीनारायणमुनिरुवाच॥ अथ चान्द्रायणादीनां व्रतानां लक्षणं
ह्रम पापशोधनहेतूनां प्रोक्तानि मुनिभिर्ब्रुवे १ तिथिवृद्ध्या शुक्लपक्षे ग्रासानामल्पकोपमान् एकैकं
वृद्ध्या भुंजीत ह्रासयेत्कृष्णसिते नरे २ चरुर्भैक्ष्यं सक्तुकणा यावकः शाकमेव च पयोदधिघृतं मूलं फलं पा
नीयमेव वा ३ उत्तरोत्तरशस्तानि हवींष्येतानि तत्र तु यथासंभवमेतेषु वृत्तीर्भक्ष्येत्कल्पयेत् ४ अ
मावास्यां नैव भुंजीत तिथिवृद्धौ तु षोडश ग्रासांस्तिथिक्षयेनैव तु चतुर्दश यथातिथि ५ यवमध्यमिदं प्रो
क्तं व्रतं चान्द्रायणाभिधं सर्वपापप्रशमनं धर्मवृद्धिकरं तथा ६ मासमेककृष्णपक्षादौ ग्रासान्दद्याच्चतुर्दश ९२

ग्रासापचयभोजी सन्पक्षशेषं समापयेत् ७ तथैव शुक्लपक्षादौ ग्रासमेकं तु भक्षयेत् ग्रासोप
चयभोजी सन्पक्षं तं च समापयेत् ८ पिपीलिकामध्यमिदं व्रतं चान्द्रायणं मतम् यथाकथंचित्प्र
कुर्वीत दृष्टोऽस्य तमं पुमान् ९ यथाकथंचित्पिंडानां चत्वारिंशच्छतद्वयम् मासेनैवोपभुंजीत तत्त
दीदृव्रतं मतं १० अष्टावष्टौ समश्नीयात्पिण्डान्मध्यंदिने परे नियतात्मा हविष्यस्य यतिचान्द्रायणं
मतम् ११ चतुरः प्रातरश्नीयात्पिण्डान्विप्रः समाहितः चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं चरेत् १२
त्रीस्त्रीनुपिंडान्समश्नीयान्नियतात्मा दृढव्रतः हविष्यान्नस्य वै मासमृषिचान्द्रायणं स्मृतं १३ गोक्षी
रं सप्तरात्रं च पिबेत्स्तनचतुष्टयात् स्तनत्रयात्सप्तरात्रं स्तनद्वयात् १४ षड्रात्रं च स्तनैकस्मात्त्रिरा
त्रं वायुभुग्भवेत् एतत्सोमायनं नाम व्रतं कल्मषनाशनम् १५ एकभक्तेन नक्तेन तथैवायाचितेन
रपि उपवासैश्चतुर्भिश्च कृच्छ्रः पादशाभिर्दिनैः १६ क्षीरं घृतं चाम्बु तप्तं मिश्रमेकदिनं पिबेत् उपाव
सेदेकदिनं तत्कृच्छ्रोऽयमुच्यते १७ तप्तकृच्छ्रं चरन्विप्रो जलक्षीरघृतानिलान् प्रतित्र्यहं पिबेदुष्णान्सकृ
त्स्नायी समाहितः १८ जलं पिबेच्च त्रिपलं द्विपलं तु पयः पिबेत् पलमेकं पिबेत्सर्पिस्त्रिरात्रं चोष्ण
मारुतम् १९ पायसे शीतमम्ब्वादित्र्यहं तेष्वपि मद्दित्तर्दिनत् शीतकृच्छ्रमिति प्रोक्तं यमेनाघहरं व्रतम्

२१ पिबेदेकदिनं मिश्रं पंचगव्यं कुशोदकम् उपावसेदेकदिनं व्रतं सांतपनं हितम् २२ पृथक् सां
तपनद्रव्यैः षड्दिनानि क्षिपेत्सुमान् उपावसेदेकदिनं महासांतपनं त्विदम् २३ प्रत्येकं प्रत्यहं गव्यं
शकृन्मूत्रं पयो दधि घृतं कुशोदकं पीत्वा सप्तमेह्नि तथोपावसेत् २४ दिनैः सप्तभिरित्युक्तं व्रतं सांत
पनाभिधम् एतदेव त्रिरभ्यस्तं महासांतपनं मतम् २५ त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं पिबेत् त्र्य
हं दधि त्र्यहं क्षीरं त्र्यहमाज्यं पिबेत्सुमान् २६ महासांतपनं ह्येतत्पापप्रणाशनम् यतिसांतपनं गो
क्षं पंचगव्याशनात्त्र्यहम् २७ पर्णोदुंबरराजीवबिल्वपत्रकुशोदकैः प्रत्येकं प्रत्यहं पीतैः पर्णकृ
च्छ्र उदीरितः २८ एतान्येव समस्तानि त्रिरात्रोपोषितः शुचिः क्वाथयित्वा पिबेदद्भिः पर्णकृच्छ्रस्तदा मतः
२९ फलैर्मासेन कथितः फलकृच्छ्रो मनीषिभिः श्रीकृच्छ्रः श्रीफलैः प्रोक्तः पद्माक्षैः पद्मसंज्ञितः ३० मा
सेनामलकैरेवं श्रीकृच्छ्रोऽन्यः परो मतः पत्रैर्मतः पत्रकृच्छ्रः पुष्पैः पुष्पाख्य उच्यते ३१ मूलकृच्छ्रः स्मृतो
मूलैस्तोयकृच्छ्रो जलेन तु क्षीरदध्यपि विज्ञेयमेवमेव विचक्षणैः ३२ एकभक्तेन नक्तेन तथैवाया
चितेन च उपवासेन चैकाहं पादकृच्छ्रः प्रकीर्तितः ३३ त्र्यहं प्रातस्त्र्यहं सायं त्र्यहं कुर्यादयाचितम् त्र्य
हं परं च नाश्नीयात्प्राजापत्योयमुच्यते ३४ अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः उपवासात्र्य ५३

वर्जं चैव दिनैर्द्वादशभिर्हितः ३५ प्राजापत्यं चतुर्द्वंद्वं विभज्य प्राह च व्रतम् आपस्तंबो मुनिः पादकृच्छ्रं व
र्णानुरूपतः ३६ त्र्यहं निरशनं पादः पादश्चायाचितं त्र्यहम् सायं त्र्यहं तथा पादः पादः प्रातस्तथा त्र्यह
म् ३७ प्रातः पादं चरेच्छूद्रः सायं वैश्यः समाचरेत् अयाचितं तु राजन्यस्त्रिरात्रं ब्राह्मणः परम् ३८
सायं तु द्वादशग्रासाः प्रातः पंचदश स्मृताः चतुर्विंशतिरयाच्याः परं निरशनं स्मृतम् ३९ सायं
प्रातस्तथैकैकं दिनद्वयमयाचितम् दिनद्वयं च नाश्नीयात्कृच्छ्रार्द्धं तत्प्रकीर्तितम् ४० नयेत्पीत्वा प
योमात्रं दिवसानेकविंशतिम् कृच्छ्रातिकृच्छ्रः कथितो द्वादशाहं जलेन वा ४१ द्वादशाहोपवासश्च पा
राकः परिकीर्तितः शोधनः सर्वपापानां मुनिभिर्हितसत्तम ४२ पिण्याकसक्तुतक्राणामेकैकं प्र
त्यहं पुमान् त्र्यहं सौम्याख्यकृच्छ्रोयं तु यं चोपवसेद्दिने ४३ सप्ताहं पतितः पिण्याकं तक्रं तोयं कुशो
दकम् उपावसेत्पंचमेह्नि सोपि कृच्छ्रः सर्वयं ते ४४ पिण्याकाचामतक्राम्बुसक्तुभिः पंचवासरा
न् एकरात्रोपवासश्च सौम्यकृच्छ्रः प्रकीर्तितः ४५ एषां त्रिरात्रमभ्यासादेकैकस्य यथाविधि तुलापु
रुषकृच्छ्रोयं ज्ञेयः पंचदशाहिकः ४६ आचाममथ पिण्याकं तक्रं चोदकसक्तुकान् त्र्यहं त्र्यहं प्रयुं
जानो वायुभक्षस्त्र्यहद्वयम् ४७ एकविंशतिरात्रोयं तु तुलापुरुष ईरितः व्रतमेतत्पुमर्त्वं च ग्रात्याः पक्षः

स॰जी॰पं॰१ स्वशक्तितः ४८ ब्रह्मकूर्चं प्रवक्ष्यामि तन्नामामुत्तमं व्रतम् कृतेन येन मुच्यंते मनुष्याः सर्वकिल्बिषैः अ॰४५
९५ ४९ उपवासं पूर्वदिने कृत्वा प्रयतमानसः पंचगव्यं द्वितीयेऽह्नि पिबेत्सह कुशांभसा ५० गोमूत्रं
गोमयं क्षीरं दधि सर्पिः कुशोदकम् निर्दिष्टं पंचगव्यं तु पवित्रं कायशोधनं ५१ गोमूत्रं ताम्रवर्णायाः
श्वेतायाश्चापि गोमयम् पयः कांचनवर्णायाः नीलायाश्च तथा दधि ५२ घृतं च कृष्णवर्णायाः सर्वं का
पिलमेव वा अलाभे सर्ववर्णानां पंचगव्येष्वयं विधिः ५३ गोमूत्रे माषकास्त्वष्टौ गोमयस्य तु षोड
श क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश कीर्तिताः ५४ गोमूत्रवद्घृतस्येष्टं तदर्धं तु कुशांभसः गाय
त्र्यादाय गोमूत्रं गंधद्वारेति गोमयम् ५५ आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि तेजोसि शुक्र
मित्याज्यं देवस्य त्वा कुशोदकम् ५६ पंचगव्यमृचा पूतं होमयेदग्निसंनिधौ सप्तपत्रास्तु ये दर्भा अच्छि
न्नाग्राः शुकत्विषः ५७ एतैरुद्धृत्य होतव्यं पंचगव्यं यथाविधि इरावतीदं विष्णुर्मानस्तोके च शंवतीः
५८ एताभिश्चैव होतव्यं हुतशेषं पिबेद्द्विजः प्रणवेन समालोड्य प्रणवेनाभिमंत्र्य च ५९ प्रणवेन
समुद्धृत्य पिबेत्प्रणवेन तु मध्यमेन पलाशस्य पद्मपत्रेण वा पिबेत् ६० स्वर्णपात्रेण रौप्येण ताम्रपात्रे
णैन वा पुनः कथितो ब्रह्मकूर्चोयं पाराशरघपत्रदाहकः ६१ एतदेव महाभ्यस्तं यतिसांतपनं स्मृतम् दश ९५

दशाहं तिलैर्दत्वा कृच्छ्रमाग्नेयमुच्यते ६२ गोनिर्हारविनिर्मुक्तयवसक्तुभिरेव यत् वर्तनं मासमेकं तु
ग्राम्यकृच्छ्रं तदीर्यते ६३ गवां निर्हारनिर्मुक्तैर्यवैरेव च वर्तनम् मासमेकं तु तन्नोक्तं पावकं व्रतमुत्त
मम् ६४ मासं चैकं प्रकुर्वीत तिलपिण्याकभक्षणम् स्वप्रस्तुतिप्रमाणेन कृच्छ्रः कौबेर उच्यते ६५
गोमूत्रेणाचरेत्स्नानं गोमयं चापि भक्षयेत् गवां मध्ये सदा तिष्ठेद्रात्रौ भूमौ च संविशेत् ६६ गोष्वपी
तासु न पिबेदुदकं हि न सत्तम अभुक्तासु न चाश्नीयादुत्थितास्वुत्थितो भवेत् ६७ तथा तासूपविष्टासु
सर्वासूपविशेन्नरः मासेनैतद्व्रतं पुंसो गोव्रतं कथ्यते हितं ६८ आमिक्षया च सौम्यो पक्षे तु पय
सा ततः दध्ना वर्तेत चाष्टाहं त्रिरात्रमपि सर्पिषा ६९ निराहारस्त्रिरात्रं च व्रतमुत्तमकं त्विदं वीरासने
न सहितः कृच्छ्रो वाक्यगुणो मतः ७० उत्थितस्तु दिवा तिष्ठेदुपविष्टस्तथा निशि एतद्वीरासनं प्रोक्तं म
हापातकनाशनम् ७१ एवमेतानि कृच्छ्राणि व्रतानि कथितानि ते शमनानि हि पापानां सर्वकामपि
फव्रत ७२ संवत्सरस्यैकमपि चरेत्कृच्छ्रं द्विजोत्तमः अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य च विशेषतः ७३
अज्ञातं यद्दिवा ज्ञातं पापं कृच्छ्रो विशोधयेत् कृच्छ्रं संस्पृश्य पापानां नरको न विधीयते ७४ श्रीकामः
पुष्टिकामश्च स्वर्गकामस्तथा पुमान् देवप्रीणनकामश्च कृच्छ्रं कुर्वीत सर्वदा ७५ गुरु वा लघु वापि

पातकं कुरुते यच्च विधाय न समाचरेत् विधिहीनं न निष्कृतिं तदा परलोके नरकेषु पच्यते ४६ स ततो यम 
गजशासनाद्रुकालेन निकृष्टयोनिषु भुक्तशिष्टं निज्ञाय मन्विते लभते जन्म मुक्तदुःखदम् ४७
इति श्रीयमगीजीवनेनारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशे प्रायश्चित्तविधौ चान्द्रायणा
दिव्रतलक्षणनिरूपणनामा सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ब्राह्मण उवाच ॥ भुक्तपापावशेषेण कीदृ
शेन स कीदृशम् लभते जन्म तन्मे त्वं कृपया ख्यातुमर्हसि १ ॥ श्रीनारायणमुनिरुवाच ॥ ब्रह्मन्कर्मवि
पाकोऽयं धर्मशास्त्रे सविस्तरम् मुनिभिर्वर्णितोऽस्तीति तत्त एव समवबुध्यताम् २ महापापादिपापानां
भेदाः संति सहस्रशः तत्तत्पापानुरूपं च तत्तत्कर्ता भुनक्ति फलम् ३ तत्र सामान्यतस्तेषां समासेन फ
लं द्विज तुभ्यं वदामि तेनाऽस्मिविशेषोऽवगम्यताम् ४ आदौ तु पापकर्माणो देहान्ते यमकिंकरैः क
र्मानुरूपं पात्यंते निरये भृतिनिर्दयैः ५ ततो नरकभोगान्ते कर्मशेषानुसारतः श्वशूकरादिकाकादि
योनीनेते यांति संभवम् ६ श्वशूकरखरोष्ट्राणां गोऽजाश्वमृगपक्षिणाम् चंडालपुल्कसानां च ब्रह्म
हा योनिमृच्छति ७ कृमिकीटपतंगानां विड्भुजामथ पक्षिणाम् हिंस्राणां चापि सत्त्वानां सुरापो योनि 
माप्नुयात् ८ जलाहिसरटानां च तिरश्चामम्बुचारिणाम् हिंस्राणां च पिशाचानां योनिमाप्नोति हेम

हृत् ॥ ९ ॥ तृणगुल्मलतानां च क्रमाद्दंष्ट्रिणामपि ॥ पुरुयोनिमवाप्नोति गुरुहा यो गुरुतल्पगः ॥ १० ॥ तिर्यक्त्वं
प्राप्य मानुष्यं लभन्ते ते यदा तदा ॥ ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदन्तकः ॥ ११ ॥ हेमहारी तु कुनखी दु
श्चर्मा गुरुतल्पगः ॥ यो येन संवसत्येषां स तल्लिंगोऽभिजायते ॥ १२ ॥ ईर्ष्यालुर्मशकस्त्याद्दीवाप्याहेदवि
कर्यी ॥ वराहत्वं च लभते तेषु याज्ययाजकः ॥ १३ ॥ गोघ्नो भवेच्च जन्मान्धः सर्वाशी कृपदंशकः ॥ मूषकमो
जीच कपिर्मत्सरी भ्रमरस्तथा ॥ १४ ॥ अपण्यविक्रयी गृध्रः पशुगामी त्वजिह्मकः ॥ एवमन्ये पापिनोपि
दुर्योनिर्यान्ति कर्मभिः ॥ १५ ॥ ततो मनुष्येष्वपि ते दरिद्रा नित्यदुःखिनः ॥ परतंत्राश्च जायन्ते रोगिणोन्धा
श्च केचन ॥ १६ ॥ इत्यादिलक्षणो ज्ञेयो विपाकः कर्मणां द्विज ॥ पुमानकृतनिर्वेशो यमिहाप्नोति निश्चितम्
॥ १७ ॥ प्रायश्चित्तमतोऽवश्यं गुरुणो लघुनोऽपि वा ॥ शीघ्रमेवैव कर्त्तव्यं सुधिया शास्त्रसंमतम् ॥ १८ ॥ अस्य
यातुमहद्दुःखभाग्यमस्येव तत्फलम् ॥ इति सर्वशास्त्रेषु मुनिभिश्चैवास्ति वर्णितम् ॥ १९ ॥ एवं धर्मा द्विजश्रे
क्ता वर्णाश्रमवतां नृणाम् वर्णाश्रमेतरेषां च संक्षेपेण सनिष्कृताः ॥ २० ॥ एतान्धर्मान्मदुक्तान्ये
कीर्त्तयिष्यन्ति भक्तितः ॥ श्रोष्यन्ति वा तेऽपि जना भविष्यन्ति निरेनसः ॥ २१ ॥ धर्मतत्त्वमिति प्रोक्तं मया त्व
णां हिताय वै ॥ प्रायशोऽत्रार्षवाक्यानि दर्शं श्रुत्वास्ति वर्णितः ॥ २२ ॥ सुव्रत उवाच ॥ इति श्रुत्वा वचस्तस्य

॥स॰जी॰पं॰ साक्षाद्भगवतो द्विजः॥ सम्भूय परमर्षीणां नत्वा तु धर्मवर्णं प्रभुम्॥ २३ ॥नारायण उवाच॥ धर्मकर्त्ता धर्म अध्या० ४६॥
॥५६॥ वक्ता धर्मात्मा धर्मसंस्थितिः॥ धर्मरक्षावतारो मे प्रीयतां धर्मनंदनः॥ २४॥ धर्मभक्तीश सुखदो
धर्मयुग्भक्तिबोधकः॥ धर्मनिष्ठजनप्रेष्ठः प्रीयतां॥ २५॥ धर्मस्थापन उत्कृष्टो धर्मशास्त्रप्रवर्त्तकः॥ ध
र्मयुक्तज्ञानवक्ता प्री०॥ २६॥ धर्महीनोन्मूलनकृद्धर्मरूपप्रकाशकः॥ धर्मकार्यरतो नित्यं प्री०॥ २६
धर्माश्रयो धर्मरुचिर्धर्मी धर्मधुरंधरः॥ धर्मनिष्ठजनैः सेव्यः प्री०॥ २७॥ धर्मविज्ञो धर्मवपुर्धर्मरू
पाखिलक्रियः॥ धर्मकीर्तिर्धर्ममतिः॥ प्री०॥ २८॥ धर्मरक्षणविख्यातो धर्मपत्नीसुतनंधयः॥ धर्मो
द्धवयथाचार्यः प्रीयतां धर्मनंदनः॥ ३०॥ सुव्रत उवाच॥ इतित्थं त्वाहरिराजन्नु शिवरामः सवाग्रवः॥ प्रण
नाम यविशांत्स्तान धर्मान्सर्वान्नर्वृद्धधन॥ ३१॥ धर्मशास्त्रमिदं नित्यं ये पठेयुर्नना भुवि॥ विकृतास्तेस्व स्व
धर्मान्येसां कर्यं चापिनाः॥ ३२॥ धर्मनिष्ठास्तु ते नूनमिहलोके परत्र च॥ कीर्तिसुखं च विपुलं प्राप्नु
युर्नात्र संशयः॥ ३३॥ कृपापात्रा वासुदेवस्य ते भवन्ति ध्रुवम्॥ ततस्ते संसृतेर्दुःखं मुच्यन्ते पुरुषाः किल
॥ ३४॥ तस्मादिदं सदा शास्त्रं पठनीयं च भक्तितः॥ पुंभिः स्त्रीभिर्द्विजैर्भक्तैः स्वस्वधर्मबुभुत्सुभिः॥ ३५॥ श्रे
यस्करान्नुमानवदेहप्राप्ता जगारम्भ सामान्यविशेषधर्मान्॥ निजाश्रितब्राह्मणमीश्वरो पीनारायणोत ॥५६॥

मुनिमीनतोस्मि॥ ३७॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे धर्मोपदेशोपाय
स्थितविधौ कर्मविपाकनिरूपणनामा षट्चत्वारिंशोऽध्यायः॥ ४६ ॥सुव्रत उवाच॥ इत्थं धर्मान्प्रवदतः कु
र्वतो मंत्रणां नानास्वकान्॥ सदा तीर्थप्रतिदिनं सार्द्धवर्षमगाद्धरेः॥ १॥ वासंतमुत्सवं कृत्वा दुर्गपत्तन एव
सः॥ पयोष्णीनगरं राजन्सहितो निजसेवकैः॥ २॥ संभारेणैव महता पुष्पदोलोत्सवं हरिः॥ कृत्वा महो
त्सवं तत्राग्रमुकुतालयमुपागमत्॥ ३॥ तत्र रामनवम्यां च सत्तु कृत्वा महोत्सवम्॥ पुनर्दुर्गपुरं प्राप चैत्रमा
से वसहानुगैः॥ ४॥ द्वितीयायां सुखासीनं कृष्णायामथ तं नृपः॥ उत्तमः प्रांजलिर्नत्वा प्रोवाच विनया
न्वितः॥ ५॥ सर्वे मनोरथाः स्वामिन्नस्माकं कृपयालयाः॥ प्रपूरिताः सेवकानां प्रभुणा दीनबंधुना॥ ६॥
एको त्वेकास्ति हृदये मम सम्यो प्रासत्पते॥ पौराणां चापि सर्वेषां तां पूरयितुमर्हसि॥ ७॥ कृष्णमंदिरम
त्रापिकारणीयं त्वयेति नः॥ प्रार्थितं भवति स्वामिन्नवत्र्पकार्यं सेवतां॥ ८॥ सुव्रत उवाच॥ इति सं
प्रार्थितो राज्ञा प्रसन्नो हरिराह तम्॥ यादृशी वास्ति वो राजन्कारिष्यामि तथा त्वहम्॥ ९॥ इत्युक्त्वानंतरं च मु
निं विरक्तानंदमुक्तवान्॥ मुने त्वयात्र कृष्णस्य कारणीयं च मंदिरम्॥ १०॥ अपेक्षितानि द्रव्याणि न
राज्ञोऽस्य नृप उत्तमः॥ तदा ज्ञायां वर्तमानः सर्वाण्याहारयिष्यति॥ ११॥ अहं च प्रायशो ग्रे च स्थितोस्मीति

॥स.जी.पृं० कदाचन ॥ मद्वशं यदि किंचिद्रूपात्तदा पृच्छेः स्वमामपि ॥ १२ ॥ इत्युक्तः सथेत्याह मुनिर्वचनकृद्धरेः ॥ आ श्रं०५४५॥
॥५७॥ नेदं प्रापन्नृपतिस्तत्र मारीचनामगराः ॥ १३ ॥ आत्मप्रशिल्पिनः कृत्वान्समुनिर्मंदिरं ततः ॥ आरेभ
न्नृपस्तत्र रम्याणाहारपच्चसः ॥ १४ ॥ हरिश्च प्रायशोनिर्संतत्रैसोपाविशान्नृप ॥ प्रशंसन्शिल्पिनां दाक्ष्यं
भक्तांश्चानेदयन्निजान् ॥ १५ ॥ आरंभितेभगवतां मंदिरे तत्र शोभने ॥ आनृपसिंहश्चागत्यैतं नेतुं जीर्ण
दुर्गपतनः ॥ १६ ॥ भगवंतं समेत्यासौ प्रणम्य प्रांजलिः स्थितः ॥ उवाच भगवान्ज्ञात्वं जीर्णदुर्गे हि मंदिर
म् ॥ १७ ॥ साकं मुनिगणैस्तत्र त्वमागत्य सपार्षदः ॥ कुरु प्रतिष्ठां कृष्णस्य यथाकार्जं यथाविधि ॥ १८ ॥ इ
ति तस्य हरेर्वाक्यं श्रुत्वा रुक्मोदिनोत्तमान् ॥ पत्रस्तः इत्यकृष्णस्य प्रतिष्ठायाः क्षणं शुभम् ॥ १९ ॥ राधा
कृष्णद्वितीयायां गुरुवारे शुभोदिसः ॥ इति मौहूर्तिकाः प्रोच्युस्ते मोः साक्षिणां हरिः ॥ २० ॥ ततः समेतो नि
जपार्षदाग्र्यैः स्वभ्रातृपुत्रैर्मुनिवर्णिमिश्च यथा हरिराधपसिंतेरश्राम्यां प्राप ज्ञपोपाम समीर्णदुर्गम् ॥
२१ ॥ आयांतमाश्रुत्य च तं प्रहृष्टो हेमंतसिंहादय आशु पौराः ॥ नियांति चरतुमना यदुपर्यायावद्धरिस्ता
वदवापतांस्तः ॥ २२ ॥ प्रणम्यैनं तेनेच समानितास्ते निवेशानं तस्य सदानुगस्य यथोचितवेश्मसु काशयि
त्वा च कर्मंदाम्तिस्म मति सत्त्वाः ॥ २३ ॥ तत्राह हरिर्मंदिरं मेसत तत्र संमंततो वीक्ष्य बभूव तुष्टः ॥ मुकुः ॥५७॥

स सर्वान्यशास्त्रां सशिल्पिवर्याञ्छ्रभूपंचमुनिस्त्वकीयम् ॥ २४ ॥ हेमंतसिंहस्य निकेतने यथा स्थावासमागत्य
सराज्ञकीयैः ॥ आहारयामास महोपहारान्देवप्रतिष्ठाविहितान्यथार्हम् ॥ २५ ॥ पौरे द्विजेंद्रैर्निगमा
गमज्ञैः श्रीकृष्णचाः सौ विधिनाचकार ॥ दिनद्वयेन प्रतिमाप्रतिष्ठां कृष्णस्य कृष्णः स्वयमेवराजन् ॥ २६
॥ वैशाखवत्से कमितामराधपकृष्णद्वितीयादिवसादिमार्द्ध समंदिरे स्थापयति स्मसाक्षाच्छ्रीद्वा
रिकेशं नृपमध्यमेः सौ ॥ २७ ॥ श्रीद्वारिकाधीश्वरदक्षभागे ततश्च राधारमणस्य मूर्तिम् ॥ स्थापया
मास कृमंदिरेः सौ महर्शनात्तीर्थफलं लिहस्मात् ॥ २८ ॥ कृष्णस्य वामेः यच मंदिरेः सौ सिद्धेश्वरं शांक
रमंबिका च ॥ विनायकं चापि सुकृदर्शनीयं यथाविधि स्थापयतिस्म देवि ॥ २९ ॥ कृत्वाजयेः सौ च यो
थैव लक्ष्मीनारायणस्थापनउत्सवं प्राक् ॥ चक्रेतयोरप्यमहां स्तेमेव कृष्णप्रतिष्ठोत्सवमाचचार ॥ ३०
यथाविधि स्थं त्रिषु मंदिरेषु देवप्रतिष्ठां सविधाय राजन् ॥ गोभूहिरण्यानि ति जान् ॥ ३१ ॥ द्विजेभ्यो नृ
ला निवासांसि बहूनि चाः दात् ॥ ३१ ॥ विशान्समग्रान्पुरवासिनोः थ ग्रामांतरेभ्योपि समागतान्सः
॥ संतर्पयामास तदिष्टनोज्यैर्यथोचितं रौप्यकदाक्षिणाभिः ॥ ३२ ॥ सौराष्ट्रदेशाधिपतिश्च तस्य ब
कारयोवीक्ष्य महाप्रतापम् ॥ सा श्चर्यमागत्य तदीयपार्श्वं प्रणम्य तस्थौ नृपदासवच्च ॥ ३३ ॥ तेमानया

मासं हरिस्ततोऽस्मै तन्मंदिरं क्ष्मातलं धर्मपत्तनम् ॥ कृत्वा ददौ स्वे विषये च तस्य धाम्यानयोदेरपथ्युत्कृतो सः
३४ ॥ मदर्हकार्येऽनवर्त्तानवेद्यं न जस्य पार्म कथनीयमेव ॥ इत्यर्थयित्वा स महीपतिस्तं तदाज्ञया स्वं निजगे
जगाम ॥ ३५ ॥ सोऽथार्चितोऽनकजनैः कगंधपुष्पांशुकस्वर्णविभूषणाद्यैः ॥ तद्देवसेवोऽस्वतकत्यवस्थां
चकार भूमावृत्तमीनिशायाम् ॥ ३६ ॥ एकादशामाभ्रमवं नतत्र कृत्वा प्रातः कृत्वा पारणां चाऽपरेद्युः ॥ नक्तं
साकं निर्ययौ स्वानुयानैः पुर्यास्तस्याः स्तूयमानो जनौघैः ॥ ३७ ॥ संनिवर्त्य पुरवासिनो हरिः स्वानन्तुग्रगत
भास्यवदृशः ॥ सानुगः पथि निजांघ्रुरंजयन दुर्गमाप पद्दुर्गपत्तनम् ॥ ३८ ॥ इति श्री सत्संगिजीवने ना
रायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे जीर्णदुर्गे श्रीहरिकोशादिप्रतिष्ठानिरूपणनामैकोनपंचाश
त्तमोऽध्यायः ॥ ४९ ॥ सुव्रत उवाच ॥ मंदिरं कारयेत्तत्र धर्मवार्त्तोभिरन्वहम् ॥ ज्ञापयन्निजभक्तांश्च समु
वास हरिर्नृप ॥ १ ॥ तमेकादा व्रतिराजो मुकुंदानंद आदरात ॥ बद्धांजलिर्नमस्कृत्य पप्रच्छ विनयान्वितः
॥ २ ॥ मुकुंदानंद उवाच ॥ तदाश्रितानामस्माकं नैष्ठिकब्रह्मचारिणाम् ॥ श्रोतुमिच्छाम्यहं त्वत्तो धर्मान्न
पाप्यानः शेषतः ॥ ३ ॥ श्रीनारायणमुनिरुवाच ॥ समीचीनं त्वया पृष्टं वर्णिराज वदाम्यहम् ॥ नैष्ठिकानां
यथाशास्त्रं धर्मान्स्ते ब्रह्मचारिणाम् ॥ ५ ॥ ब्राह्मणः क्षत्रियो वैश्यपयो वर्णा द्विजातयः ॥ ब्रह्मचर्याश्रमस्थे

नैष्ठिका अधिकारिणः ॥ ६ ॥ गर्भाधानादिसंस्कारैः संस्कृतश्चोपनायनम् ॥ प्राप्तो यथाकालमसौत्र
ह्मचर्ये द्विजोऽर्हति ॥ ७ ॥ क्रियात्वे बुद्धिहीनस्य मातृचित्ताख्यं तदीरितम् ॥ माता प्रसादस्यमुदितेन तद्वद्दुर्वजस्य
॥ ८ ॥ अपि बुद्धिमतः पुंसो गृहाश्रमरुचेस्तु तत् ॥ ब्राह्मणस्यैव द्वादशाब्दं च शोक्तं वैराग्यमोद्युत ॥ ९ ॥ याव
ज्जीवं नैष्ठिकाख्यमनिच्छोः स्तु गृहाश्रमम् ॥ प्रोक्तं न दुद्धि वैराग्यवतिनो विरजस्य हि ॥ १० ॥ तत्रोऽन्त्यः श्रेय
से स्वसद्गुरुं गुरुं ग्रमाश्रयेत ॥ विष्णुमाहात्म्यबुद्धीवसपवेन्निमं गुरोः ॥ ११ ॥ सांगं सार्थं च सद्गुरोरधीत्य
स्वस्य शक्तितः ॥ वेदं दद्यात्ततस्तस्मै श्रद्धाख्या स्वर्णादिदक्षिणाम् ॥ १२ ॥ तीव्रवैराग्ययुक्तत्वाद्दीक्षां गुरुवचस्त्वं
नि ॥ संप्राप्तो नैष्ठिकीं सम्यात्तद्धर्मान्कीर्त्तयाम्यहम् ॥ १३ ॥ नैष्ठिके व्रतेनैव यावज्जीवं स्वसद्गुरोः ॥ सेवने
कृतसंकल्पः स्वनवेद्भक्तिमान्हरौ ॥ १४ ॥ नित्यं यज्ञोपवीतं च सवित्रो धारयेच्छिखाम् ॥ तुलसीमालिका
युग्मं स्व कंठे परिवर्त्तिच ॥ १५ ॥ मौंजीं च मेखलां देहे पलाशं वैल्वमेव वा ॥ स धारयेद्दंडं पाणिभ्यासनार्थं
मृगाजिनम् ॥ १६ ॥ सोपपात्रं चाऽबुभृतं नित्यं धातुकमंडलुम् ॥ सोऽनुगाजनवस्त्रं तद्धारयेदुज्ज्वलं शुचिः
॥ १७ ॥ धारयेत पंच केशांश्च श्मश्रु न राघोऽजेत्तु संभवात् ॥ नेत्राग्निदीर्तं मे भस्म सिम्रणीयेन हीनरत ॥ १८ ॥
अति जंत्रहृदयेऽग्निमोर्म्र सौनाऽऽपदिश्रु इनम् ॥ कक्षोपस्थशिखावर्ज्जं कारयेत्तौ र्यदावसः ॥ १९ ॥ द्वे कौपीने

॥स·ज्ञी·पं॰ तिते धौतेऽत्र शोभने चैकां च कंबलीम् ॥ धारयेत्सुप्तिसमये परिधानार्थमेव सः॥२०॥ कंथां च प्रच्छदपटीकं ॥ऋ॰५०॥
॥५५॥ वलं द्वे च पंचिकेः॥ शिरःपटकमेतानि कापायाण्येव धारयेत् ॥२१॥ तृतीयं प्रकारेणैः साकं ग्रामं सममेव च
धारयेत्॥ चित्रवर्णं श्रावकानि धातु पात्राणि पक्कये ॥२२॥ सच्छास्त्र पुस्तकं चाःसौ धर्मज्ञानादिपुष्टये॥
लोपयोगि भवेद्यावत्तावत्तदपि धारयेत् ॥२३॥ पीठार्थं कंबली खंडो जपमाला समगोमुखी॥ धार्यो गोपीचं
दनं च पादुके इति संग्रहः ॥२४॥ रतौऽन्यस्मिन्नद्दत्वाद्यारात्रौ वासरान्सतु॥ उपवासान्प्रकुर्वीत तत्ता
वतः स्वस्य शुद्धये ॥२५॥ स्त्रियः कामान्नवीःस्याश्च क्रीडंती स्तेनवा स्थिताः॥ पश्यःकौतुकेन सदा ताश्चाः
सच्छास्त्रस्य तत्कथाः ॥२६॥ क्रीडां विनोदं सुतयोः किंचिन्स्त्रीभिः साकं न चाचरेत्॥ न कारयेच्च पुंस्त्वेऽपि काम
येत स्नानताः ॥२७॥ स्पृशेदन्यांगं तु न क्वापि न वस्त्री धार्यमं शुकम्॥ धौतेनैव पूर्णं च धौतानां तं च तान्हिं न दो
षभाक् ॥२८॥ विहाय देवतामूर्तिं न स्त्रियाः प्रतिमामपि॥ काष्ठपाषाणवस्त्रमृन्मयीं चित्रस्यामपि न स्पृशेत्॥
२९॥ न स्त्रीजातेश्च पुत्र्यां गेऽपरस्येपि दृष्ट्वा च दूरतः॥ तथानग्नांतु नेत्रेतकमकामपि नैष्ठिकः ॥३०॥ न स्त्रीभिः स
हभाषेत न तच्चित्रं तथा लिखेत्॥ न स्पृशेदन्यवस्त्रं चैतं नचित्राद्यपि च मे युनि ॥३१॥ हरूपमैथुनि चित्राणीन च
गेहे वसेत्क्वचित्॥ स्त्रीवक्त्रसंमुखं वपुरस्तं क्वचिन्नोपविशेच्च सः ॥३२॥ पठन्नं प्रेषयेन्नैव वस्तु किंचिदपि ॥५५॥

स्त्रियै॥ प्रेषितं च तथा किंचिद्दत्तं या च रहस्तया ॥३३॥ स्त्रियमुद्दिश्य पुरतः गुरुवस्मः हरे रपि॥ कथां वार्तां न
कुर्वीत शृणुयान्न च तां ततः ॥३४॥ स्वपेतोद्दंपती रात्रौ यतः कुर्यातां तरे गृहे॥ तत्र गेहे स्वपेन्नैव दोषिनाः
स्य स्यथा त्विह ॥३५॥ न स्वपेत स्त्रीपुत्रे गेहे समं तु पुंस्कबकुमप्यपि॥ न स्त्रीचरणस्थाने क्रुपीड्वमर्गकर्म च॥
३६॥ स्नानोद्वर्तनादिकाय यत्र स्युर्योषितां क्रियाः॥ तत्र तत्र क्रियां तां तां वर्णीनैवाचरेत्क्वचित् ॥३७॥ धनु
र्मानांतरेनैव स्त्रिया गच्छेदनापदि॥ मार्गान्सेवौ सवे विप्लोः स्त्रिया मौढ्यं च तन्मतम् ॥३८॥ स्त्रिया सह रहः
स्थाने वर्णी तिष्ठेन्न कर्हिचित्॥ न्याध्वनि तिया साकं तरुणानरुणो व्रजेत् ॥३९॥ नारोहेद्वाहनं वर्णीः
कापि रोहेद्युदापदि॥ तदापि न स्त्रिया साकं त्राकदाचानुपाविशेत् ॥४०॥ परिवेषणकर्त्री स्याद्यत्र स्त्री न तु
पूरुषः॥ तत्र भोक्तुं नैव गच्छेन्न स्पृशेच्च स्त्रकुंसकम् ॥४१॥ गुणां स्त्राःप्यःगुणान्स्त्रीणां त्रायो वर्णी न वर्णये
त्॥ जेपनार्थं द्रार्थमपिताः स्वमठे न प्रवेशयेत् ॥४२॥ एतेषु नियमेषु स्याद्यस्यभंगः प्रमादतः॥ तर्हि कृतु
पवासोऽस्य प्रायश्चित्तमुदीरितम् ॥४३॥ स्त्रीसंबंधिनिषेधो ये साक्षाद्यस्य त्रोरहः स्थितिम्॥ विनाश्चासन्न
संबंधस्त्रीभ्योऽन्यत्राचगम्यताम् ॥४४॥ रहःस्थाने तु मात्रापि सह तिष्ठेन्न कर्हिचित्॥ वृद्धस्तथ रोवणी
साक्षात्तामपि न स्पृशेत् ॥४५॥ कार्यमावश्यकं स्यान्ने संबंधिन्यापि योषया॥ अस्पृशन्भाषणादीनि तर्हि

॥स॰जी॰प्र॰४॥

॥१००॥

कुर्वीत नान्यदा ॥ ४६ ॥ कश्चिदापदि कृशायां वा पतत्यां स्पर्शने स्त्रियाः ॥ विहितेन व्रतस्तेन कथयामि समासतः अ॰५७॥
४७ ॥ अन्नांबुकाष्ठपात्रादेर्याचने ध्यवरक्षणे ॥ सावासस्य वदेन्नारी मुद्दिश्यं पुरुषं प्रति ॥ ४८ ॥ ईदृशावश्य
कं कार्ये शक्तिस्थं हि नापरो ॥ साक्षात्संभाषणकालेन स्वच यामि स्त्रियं प्रति ॥ ४९ ॥ संबंधनाशमेत्यस्य योषा
पद्यापतेत्क्वचित ॥ अपृष्टवाप्यंतरात्मनदोषो भाषणेन या ॥ ५० ॥ ज्वलाग्निशृंगी दष्ट्रादेर्भये शस्त्राद्दिवा
मृषा ॥ गृहद्रुमादिपाते वा रोगे स्वस्य स्त्रिया अपि ॥ ५१ ॥ प्राणांतिकापदीदृश्यां साक्षात्स्पर्शेन भाषणे ॥ स्त्रिया त्रा
ते पिनास्ये वदोषस्तस्याः स्मर्याऽक्लिहि ॥ ५२ ॥ सर्वथैव निषिद्धोस्ति स्त्रीप्रसंगोत्र वर्णिनः ॥ स्त्रैण प्रसंगोपि त
थाद्दि यः प्रोक्तोस्ति वधरूत ॥ ५३ ॥ न वीर्यपातनं कुर्याद्बुद्धिपूर्वं कदाचन ॥ स्वप्ने जाते स्वतः कुर्याद्दिन मेकमु
पोषणम् ॥ ५४ ॥ प्रमादाद्यामाति तेनौ यैकार्यं वाऽऽयणोत्रतम् ॥ साक्षात्संगे स्त्रिया जाते पतितो ऽसौ बृहद्व्रतात्
५५ ॥ नैष्ठिकं त्वं न तस्य स्यात्स्यात्प्रायश्चित्तशतैरपि ॥ अतस्तन्मंदिराज्जा दूरं सत्सु स्वसमाश्रितात् ॥ ५६ ॥ प्रायश्चित्तं वि
धायाऽसौ ततः कुर्याद्दृढाश्रमम् ॥ तत्र सा पूर्ववद्वर्मानो लक्ष्मीनारायणं भजेत ॥ ५७ ॥ यदि नस्याद्दृढयाः प्राप्ति
ः कुलद्ध्याद्यु नावत ॥ तुरीयाश्रममाश्रित्य सतपस्येत् हरिं मुक्तये ॥ ५८ ॥ स्त्र्यादिभ्यः किं किंमलाद्धधस्य कुर्वीत नि
त्यं सच वर्णिराज्ञ ॥ पापक्रियाविमुखस्त्वयाऽसौ मृत्वा सुवाद्धामतदीयमेव ॥ ५९ ॥ इतिश्रीसत्संगिजीवने नारा ॥१००॥

यणचरित्रे धर्मशास्त्रे पंचमप्रकरणे नैष्ठिकधर्मेषु ब्रह्मचारिपरिग्रह स्त्रीप्रसंगवर्जननिरूपणनामा
पंचाशत्तमोऽध्यायः ॥ ५० ॥ श्रीनारायणमुनिरुवाच ॥ न क्रोधो वर्णिना कार्यो नायेतां कस्मिकः स चेत्
तर्हि यस्मै स जातस्तं प्रणम्याशु प्रसादयेत ॥ १ ॥ पापमूलं च लोभोऽस्ति तत्त्याज्यः स सर्वथा ॥ संग्रहो नै
व कर्तव्यो विहितेतर वस्तुनः ॥ २ ॥ तीर्थयात्रां विनानैव धर्मे रक्षत्त्च रक्षयेत ॥ वर्जयेत्स कृतान्भोगान्द्यू
तादिव्यसनानि च ॥ ३ ॥ स्वसंबंधिजनानीच रद्दष्टाऽऽसावापदं क्वचित ॥ धनार्थमुद्यमं नैव कुर्यात्तस्मान्निवृत्त
ये ॥ ४ ॥ मोहं मदं मत्सरं च मानं ते ऽशीच वर्जयेत ॥ दंभदर्पं च कार्पण्यं कर्जिनिंदां च यत्नतः ॥ ५ ॥ अवाच्यां न व
देद्वाचमभक्ष्यं नैव भक्षयेत ॥ अस्पृश्यं न स्पृशेद्द्वाणी नाऽपेयं च पिबेत्क्वचित ॥ ६ ॥ नमर्मभिद्वचो ब्रूयाद्रु
क्षिवितथ्यं कटु ॥ नानृतं च वदेत्कापि सत्यं च परदुःखकृत ॥ ७ ॥ रसलुब्धो भवेन्नैव न कं भिक्षेत चान्नहम
धातुपुष्टिकरं चान्नं प्रायो वर्णी न भक्षयेत ॥ ८ ॥ खर्पातङ्क्षारंगपाश्च दृष्टिमाम्मपि सयः
९ ॥ चंडिकाभैरवादीनां महामांसाशिनां क्वचित ॥ नाऽश्नीयाद्ब्रह्मचार्यैवमापद्यपि
निवेदितम् ॥ १० ॥ नाद्यान्मादकं किंचिन्नस्पृशेल्लशुनं तथा ॥ नाद्यान्महाजीरुं जम्बुनं नान्येद्दत्तमश्रद्धया ॥ ११ ॥ मद्य
मांसाद्यभक्ष्येण मिश्रमौषधमप्यसौ ॥ नाद्यान्त्वनृलगृहीया दत्तान गुणा वेद्यतः ॥ १२ ॥ अनिवेदितमन्नं वा फ

॥स॰जी॰पं॰५॰ जपयज्ञादिविघ्नके ॥ ब्रह्मचारी न भुंजीत क्वापि किंचन नैष्ठिकः ॥ २३ ॥ नाऽन्नाहारं च कुर्वीत पुनर्भुक्तिं मना अ॰५२॥
॥१०२॥ पदि ॥ पौर्वाह्णिकं कर्म नित्यमसमाप्य च कर्हिचित् ॥ २४ ॥ न याचेदाग्रहेणासौ मिष्टान्नमपि कर्हिचित्
न दार्ढ्यं धने कुर्यान्नाक्रोशं चान्नयाचने ॥ २५ ॥ नाभिशस्तेन पतितं पाकमश्नीत न च हि हीनमाशौचिने क्वापि
न याचेदन्नमाह्निकम् ॥ २६ ॥ अगालितेन तोयेन नांबु कार्यं समाचरेत् ॥ न स्पृशेन्मद्यपात्रादि यदन्यच्चाऽप्य
मंगलम् ॥ २७ ॥ खरमुष्ट्रमनड्वाहं महिषं च करं च सः ॥ ब्रह्मचारी नाऽधिरोहेदापद्यपि कदाचन ॥ २८ ॥ दि
वा निद्रां न कुर्वीत निद्राप्याद्यंतयामयोः ॥ संध्ययोश्च स्वपेन्नैव ब्रह्मचारी विनाऽऽपदम् ॥ २९ ॥ प्रासादिकेनापि ह
रेश्चंदनेनांगचर्चनम् ॥ न चास्रग्गंधितैलेन कुर्यान्नाभ्यंगमप्यसौ ॥ ३० ॥ गोधरुत्थेन कस्तूरीकुंकुमादि न धा
रयेत् ॥ न देहालंकृतिं क्वापि न कुर्याद्दुल्वजानपि ॥ ३१ ॥ छत्रं न धारयेद्दर्शी नन्दस्रेक्षको भवेत् ॥ नाऽतिरक्ता
नि वासांसि काषायाण्यपि धारयेत् ॥ ३२ ॥ नेत्रांगमर्दनं कुर्यात्स्नानं काजेत पादे ॥ घर्षयित्वा न धावेच्च मुखं
नेक्षेत दर्पणे ॥ ३३ ॥ नातु ल्वजानि वासांसि धृत्वा कुर्वीत कर्हिचित् ॥ नांजयेत्स्वस्वके नेत्रे नेत्रांबुजादिभि
क्षयेत् ॥ ३४ ॥ न गायन्नाम्यगीतानि ग्राम्यवार्त्तां न कीर्त्तयेत् ॥ नदीं संतरेच्चैव सश्रुतं नैव वर्णी कुर्यान्न चारताम् ॥ ३५
देवताप्रतिमानां च तीर्थानां धर्मिणां गवाम् ॥ वेदानां च सतीनां च गर्हां कुर्यान्न सद्गुरोः ॥ ३६ ॥ न हिंसेत्स्थावराणां ॥१०२॥

च मनसा वपुषा गिरा ॥ न दंतधावनायापि छिंद्याद्दर्भद्रुमांगकम् ॥ ३७ ॥ तुलसीपत्रपुष्पादि विष्णुपूजनहे
तवे ॥ होमार्थं समिधो दर्भान्गृह्णन्नैष न दुष्यति ॥ ३८ ॥ न सूर्यास्तमयारंभे न जेदध्वमनापदि ॥ जंतुना
लोकयानके दिवसेऽपि चलेत्पथि ॥ ३९ ॥ न जंतुबहुले स्नानं कार्यं क्वापि जलाशये ॥ तत्रैव गालयित्वांबु
पश्चेत्स्नायात्ततो बहिः ॥ ४० ॥ शुद्धाद्योदकपात्रेण विनाऽपाकं च मात्मनः ॥ अनिक्षकाम्यं च कुर्वीत न मूत्रो
त्सर्गमप्यसौ ॥ ४१ ॥ नात्मघातं क्वापि कुर्यान्नातिश्रेष्ठाः क्रियाश्च च ॥ पाणिपादाक्षिचापल्यं न कुर्यात्कूर्दनं
न तथा ॥ ४२ ॥ राज्ञा च राजपुरुषैः स्त्रीभिर्दुष्टपुरुषैः सह ॥ विवादं नैव कुर्वीत येन स्वस्य भयो भवेत् ॥ ४३ ॥ प
राज्ञो द्विजस्य दाचा नाऽविश्वासस्य परे भवेत् ॥ नोद्विजेदुर्प्यवान्वर्णी दुर्जनानां दुरुक्तिभिः ॥ ४४ ॥ तेन तु जपदी
चापि न ग्रावायां त्वनापदि ॥ आपद्यपि क्वचिन्नैव सातु नैश्वावृतास्त्रिया ॥ ४५ ॥ अनापदि न खट्वायां वर्णी न
न्यस्य न स्वपेत् ॥ न केशोल्लारनं कुर्यान्नमण्पादि प्रतिग्रहम् ॥ ४६ ॥ मृत्तिकातृणकाष्ठादि यस्यास्त स्वामिकं
यदि ॥ तदा तदपि चौर्येण गृह्णीयान्न कदाचन ॥ ४७ ॥ न संध्याहोमयोः कालमतिक्रामेद्विनाऽऽपदम् ॥ विष्णु
पूजां गुरोः सेवां मर्कां पाक्षितं थ्येव च ॥ ४८ ॥ क्षेत्रवाटीद्रुमावापं स्वहस्तार्थं न चाचरेत् ॥ नैवांऽन्नसंग्रहं कु
र्यान्न रसादेरपि क्वचित् ॥ ४९ ॥ नोपवादं गुरोः क्वापि कुर्यान्नातिक्रमेत्ततः ॥ परिदध्यान्न विकृतं वासं सखो

पानहीनश्च ॥४०॥ अमार्गेण न गच्छेच्च गृहिगेहं कदाचन ॥ बालकं नालये न्नैव वर्णी कस्यचिदप्यसौ ॥४१॥ 
तैलेन केशसंस्कारं ब्रह्मचारी नचाचरेत् ॥ मनुष्यं वापि पश्वादिं तृणेनापि न ताडयेत् ॥४२॥ विप्रभिक्षुक
कृता देशाजीवप्रवृत्तिनाशनम् ॥ यथा स्यात्तनया कुर्याद्वर्ताहर्याद्यपि ताश्चपि ॥४३॥ पितरौ स्वगुपाध्यायं सतीर्थ्यं
च गुरुं विना ॥ सनाभेरपि नो कुर्यादौर्ध्वदेहिककर्म च ॥४४॥ योऽयं निषिद्धे चैतेषु व्यतिक्रामेद्दनापदि ॥ स तत्
दोषापनोदार्थं कुर्यात्प्रायश्चित्तमग्रिमम् ॥४५॥ न निष्कृतिं दुष्कृतकर्मणो यः करोति मूढः स तु वर्णिवर्य ॥ दुष्की
र्तिमाप्नोति हि भूमिजो के नेयश्च पुनश्चोद्भवसंप्रदायात् ॥४६॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशा
स्त्रे पंचमप्रकरणे नैष्ठिकधर्मेषु ब्रह्मचारिणो निषिद्धक्रियानिरूपणनामैकपंचाशत्तमोऽध्यायः ॥५१॥
श्रीनारायणमुनिरुवाच ॥ कर्म दैवं च पित्र्यं च यथाकालं यथाविधि ब्रह्मचारी विमुक्तकः कुर्यान्नित्यमतं
द्रितः ॥१॥ नरनारायणः साक्षादाचार्यो ब्रह्मचारिणाम् ॥ तपः परोपकारार्थं कुर्वन्नमरदुष्करम् ॥२॥ दैवं पित्र्यं
करोत्येव भगवानपि नित्यदा ॥ तर्हि दैवं कथं तत्तु स्यादकृतात्तनवर्णिभिः ॥३॥ संध्यात्रयमुपासीत काले
काले यथाविधि ॥ उपस्थानं रवेः कुर्याज्जपेद्देवप्रसूं च सः ॥४॥ सायं प्रातः प्रदीप्तेऽग्नौ होमं समन्त्रकं समाचरेत् ॥ अ
ञ्जलिना शाकफलं तस्मिन्काले जले क्षिपेत् ॥५॥ अनापदि द्विजातिभ्यः भिक्षां याचित्वान्नमुपाहरेत् ॥ अपक्वं पात्र 

पिता तन्निवेद्याग्र्यं शाखं विभवे ॥६॥ स्नानं त्रिषवणं कुर्याद्धिमवृष्टौ तथाऽन्वहम् ॥ पंचयज्ञान् यथाशक्ति ब्रह्म
चारी समाचरेत् ॥७॥ सदोपवीती च नवेशमरा बद्धशिखश्च सः ॥ पित्रोः श्राद्धं च कुर्वीत यथाकालं यथोचितम्
॥८॥ मेखलाजिनं दंडमुपवीतं च तुलिकाम् ॥ अप्सु क्षिपेच्छिन्नशनिर्धृत्वैवान्यानि मंत्रतः ॥९॥ सूतिसूतकि
पार्श्वदिपतनीत्यजपापिनाम् ॥ स्पर्शे श्मशानाक्रमणे सचैलं स्नानमाचरेत् ॥१०॥ अमेध्यस्पर्शने वांतौ च सदंड
स्त्वनुमाचपि ॥ स्नानं कुर्यान्नजो रोगेद्धः स्वप्ने च बृहद्व्रतः ॥११॥ स्नातो व्रतं संकुर्वीत स्त्र्यंगस्पर्शे तु सर्वदा ॥ स्त्र्यंग
स्यवस्त्रस्पर्शे वा कृच्छ्रात्तैः प्रबोधतः ॥१२॥ एकादशीषु सर्वासु कृष्णजन्मोत्सवेषु च ॥ उपवासान्स कु
र्वीत संप्रदायानुसारतः ॥१३॥ प्रासादिकं हरेरन्नं मितं चनियतं क्षुधि ॥ भुंजीत ब्रह्महं वर्णी नैमृदेवावशेषि
तम् ॥१४॥ नवेष्टुतेमुनिरतः हृत्तुचीदयणादिषु ॥ त्वग्गुम्फिश्रीणगात्रस्तैः शुष्कमांसास्थिगात्रवान् ॥१५॥ ज्ञा
नवैराग्यसंपन्नो विजितेंद्रियः ॥ एकांतिकीं हरेर्भक्तिं कुर्याद्दृढनिश्चयः ॥१६॥ गुरौ समीपे वर्तेत दा
सवत्तन्निदेशकृत् ॥ पानेऽप्यावचशायनेनाः निद्रस्तत्तौ नवेत् ॥१७॥ शीलोदांतश्च धृतिमान्समजो शमकोच
नः ॥ मित्रोदासीनरिपुषु समदृष्टिर्भवेत्सुधीः ॥१८॥ विभीयादिव सर्पेभ्यः स्वत्वं फलभोऽध्ययोषितः ॥ शवादिव च
मिष्टान्नतः सेव्यं निरयादिव ॥१९॥ विशालां कुशलं वांछन्प्रशांसेत्तोश्च संसदि ॥ दूरात्पेक्ष्मानयेत्सीलाविमु

॥स॰जी॰पं॰ ॥१०२॥

न्त्वानःमत्सरः॥२०॥ जीवेद्धर्मार्थमेवासौ फलं धर्मस्य तु प्रभोः॥ श्रीविष्णोः प्रीणनं विद्यात्तुष्टः स्क
स्वं स च॥२१॥ अभयं सर्वभूतेभ्यो महादानादितोऽधिकम्॥ भगवद्वार्त्तया द्यात्सर्वकाले च नैष्ठिकः॥२२॥
स्नाने होमे जपे चैव भोजने संप्रयोर्द्वयोः॥ केनचिन्नैव नाषेत चोत्सर्गे मलमूत्रयोः॥२३॥ विधि पेतेषु य
द्युक्तमतिक्रामेत्प्रमादतः॥ तर्हि तद्दोषशुद्ध्यर्थं कुर्यादेकमुपोषणम्॥२४॥ ज्ञानं सत्यं तितिक्षा ह्रीरमात्स
र्यधृतिस्तपः॥ शमो दमोऽनसूया च दानं यज्ञो गुणा अमी॥२५॥ कामः क्रोधः शोकमोहौ लोभेर्ष्या चाऽस्पृ
हास्पृहा॥ लोभोऽसूयानुगुप्सा च मानो दोषाष्टमे मताः॥२६॥ दोषैः सर्वदा दशभिर्विहीनो युक्तो गुणैर्
दशभिश्च नित्यम्॥ श्रीकृष्णमन्त्री निरतश्च कुर्वन् सेवां गुणी स्याद्विजिगीष्यते वै॥२७॥ इति श्रीसत्संगिजीव
ने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे नैष्ठिकधर्मेषु ब्रह्मचारिणां विहितक्रियानिरूपणनामाद्वि
पंचाशत्तमोऽध्यायः॥५२॥ श्रीनारायणमुनिरुवाच॥ वेदाभ्यासः प्रकर्तव्यः प्रसह्य ब्रह्मचारिणा॥ नाराय
णात्मको वेदो यतः प्रोक्तः सनातनः॥१॥ माहात्म्यातिशयज्ञानं हरेर्वेदार्थबोधनम्॥ विनान्यैव न वेत्तस्मा
त्स्वीयैः पठेत्तस्य चादरात्॥२॥ प्रमाणानां हि सर्वेषां वेद एव पुरातनैः॥ प्रमाणं परमं प्रोक्तः स्वच्छित्तत्त्वार्थ
बुद्धिभिः॥३॥ नारायणात्समुद्भूतो वेदः प्रणवमूलकः॥ यथा तथेह संक्षेपात्कथयामि प्रसंगतः॥४॥ पुरु

अ०५२ ॥१०२॥

षोत्तम एवासीत्प्रकृतेः पुरुषात्परः॥ नारायणोऽक्षरे धाम्नि वासुदेवो व्यराजत॥५॥ स सिसृक्षुः स्वांशान्नि
स्वतंत्रः स्वेच्छया प्रभुः॥ प्रावीवधद्यदा धाम्नि स्फुर्त्तो प्रकृतिपुरुषौ॥६॥ वीर्यं पुरुषरूपेण मायायां वीक्ष
या प्रभुः॥ निरधेसाऽग्रहीत्तत्तु स्त्री गर्भमिव पूरुषात्॥७॥ ततः प्रधानपुरुषाव्याविर्भूता अनेकशः॥ प्रधा
नेवीर्यमाधत्त स्वं रूपेण च प्रभुः॥८॥ विद्रूपं भगवद्वीर्यं माया सैव रजःप्रादिभिः॥ मिश्रं गुणै रच्चिद्रूपैर्मह
नासीद्गुणात्मकः॥९॥ तेमायाऽसूत सोऽस्वाक्षीरं देवो ज्ञो हिरण्मयम्॥ अहंकारात्का शमुखैः पदिन्नग व
रतोऽर्द्धतम्॥१०॥ महापुरुषसृष्टेऽस्मा वनेकोऽस्य समाश्रये॥ विराड्डोऽजलेऽस्वाज्ञीत्कारणार्णवसंज्ञके॥
११॥ आविर्बभूव कालेन तस्मिन्नेव राजपूरुषः॥ सोऽव्यक्तकारणः शिश्ये तदंडे गर्भवारिणि॥१२॥ ब्रह्मादी
निश्वरान्सर्वाञ्जीवांस्तत्स्थानकानि च॥ सर्वं ससर्ज स नगाः कन्भोगान्भोगोपकरणानि च॥१३॥ कालशक्त्या
प्रभोस्तस्य मुखबाहूरुपादादयः॥ आसन्नःवयवाव्यक्ता बहिश्चान्तर्दादयः॥१४॥ लोकेंद्रियैःसहाऽवास्तु
गीजकेष्वधिदेवताः॥ वरुणाद्याश्चनेशाद्या वाह्योरान्भंतरे स्तथा॥१५॥ विराज्ञ्नाया कृता स्वंतदात्मस्वव
पुस्त्वपम्॥ अपि स्कव्यक्तमनवत्स्थूजादीवात्मनामिह॥१६॥ यथा पाकदशायां सोऽग्नाविकेशी फलं त्रिधा
यत्कं ते येन वेत्ताऽपवत्पुरेकमपि त्रिधा॥१७॥ तद्योगात्कथितश्चाऽसौ विष्णुब्रह्मशिवाभिधः॥ गीजकें

ऽयदेवांस्ताच्यापन्नादात्मतोऽथ सः ॥ १८ ॥ तथामूर्तोऽपिनोत्थातुं सशशाकपदातदा ॥ महापुरुषरूपेण
तस्मिन्नारायणोऽविशत् ॥ १९ ॥ ततोविराट्तां प्राप्तदध्यात्मादितां च स ॥ सहस्रशीर्षपुरुषसंज्ञोऽभू
त्पुरुषोत्तमः ॥ २० ॥ आदौवैराजशिरसिहृत्पद्माम्बुजे ॥ आविर्भूयाक्षरब्रह्मात्मकंनादंचकारच ॥ २१ ॥
कण्ठमार्गेणवर्त्मनासद्योनाभिकंदंचतत्परः ॥ प्राप्योर्ध्वंचनृधेतस्मान्महाप्राणेनसंयुतः ॥ २२ ॥ अधोमु
खंनाभिपर्यङ्कंरजीकोशावस्थितम् ॥ तेनैवाऽभूदूर्ध्वमुखंहृदयावधितस्य च ॥ २३ ॥ तस्ययोनाभिकंदेतु
नादोऽभूत्सपरेतिवाक् ॥ वेदोऽत्रसत्त्वेभगवताबीजत्वेनप्रकाशिता ॥ २४ ॥ ततःपश्यन्तीरूपाऽप्यसाऽर्धमा
त्रात्मिकाततः ॥ प्राप्यतद्दशाकापेंद्रोपद्मंस्त्यास्यामवापच ॥ २५ ॥ मध्यमाख्यांकंठदेशंप्राप्यसाऽजमताः
पच ॥ वदनंप्राप्ययातिस्मवैखरीसन्निधांकिल ॥ २६ ॥ कंठंगच्छत्यधोगलाजलयंत्रेऽजलंयथा ॥ नाभिमित्स
मुखंयातिनादोऽपिशिरसस्तथा ॥ २७ ॥ वैखर्यादिस्थानकेषुतद्द्रक्गजहृत्स्वपि ॥ वर्णाःक्रमेणाविरासंस्त्र
यस्त्रिलोकधारकाः ॥ २८ ॥ अकारःप्रथमःप्रोक्तस्ततोकारोद्वितीयकः ॥ अन्त्योमकारःकथितस्त्रयो
मीत्रिगुणात्मकाः ॥ २९ ॥ स्थानेषुषुप्रतिष्ठास्तेविष्णुब्रह्मसमरेश्वराः ॥ अधीश्वराःक्रमेणैषांवर्णानांच ॥१०४॥
गुणीकसाम् ॥ ३० ॥ स्वस्वस्थानस्थिताएवंवर्णास्तेत्रिजपाहरे ॥ एकंप्रादुर्दधाकारंततोऽभूत्प्रणव

ध्वनिः ॥ ३१ ॥ महाप्राणमयोघोषःसमनोमयतांहरिः ॥ प्राप्येंद्रियत्वंचकण्ठेच्योनीह्नतन्मुखे ॥ ३२ ॥ ओंतः
स्योऽपिस्वरस्पर्शप्रमुखाःसकलास्ततः ॥ वर्णाआसंस्ततोवेदाःसर्गारंभेहिजज्ञिरे ॥ ३३ ॥ स्थानभेदाद्व
यानादएकोऽप्यासीच्चतुर्विधः ॥ नारायणोऽपिभगवांस्तथैवाऽभूच्चतुर्विधः ॥ ३४ ॥ नाभिपद्मेपरादेवो
वासुदेवाख्यईरितः ॥ संकर्षणाख्यश्चतथापश्यंतीरेवताहृदि ॥ ३५ ॥ अनिरुद्धाभिधःकंठेमध्यमाया
श्चदेवता ॥ मुखेप्रद्युम्ननामासौवैखर्यादेवतामतः ॥ ३६ ॥ विष्णवादयस्त्रयोदेवाःस्वस्थानंस्थात्रपासत
प्रद्युम्नादीन्क्रमेणैवतत्तद्वारणाधिदेवताः ॥ ३७ ॥ संकर्षणादयस्तेचसगुणमूर्तयःप्रभोः ॥ स्वयंतुवा
सुदेवोऽस्तिनाभिपद्मेहिनिर्गुणाः ॥ ३८ ॥ इत्थंनारायणोदेवःसाक्षात्पुरुषोत्तमान् ॥ आविर्बभूवसः
प्राशेवेदःसर्वार्थबोधकः ॥ ३९ ॥ सर्वस्मिन्वाङ्मयेमुख्यःसाक्षान्नारायणात्मवत् ॥ उत्पन्नत्वाद्वेदएवत
तोऽध्येयःसवर्णिनाः ॥ ४० ॥ अखेद्योऽखंडश्चैतस्मात्स्वात्मास्तेयःप्रयत्नतः ॥ तस्यैकंब्रह्मणाबुध्वातद्रूप
ःसम्भजेद्धरिम् ॥ ४१ ॥ भोगानामुपभोगेननकामःशाम्यतिक्वचित् ॥ हविषाकृष्णवर्त्मेवभूयस्तेनतुव
र्द्धते ॥ ४२ ॥ यत्पृथिव्यांव्रीहियवंहिरण्यंपशवःस्त्रियः ॥ नालमेकस्यतत्सर्वमितिपश्यन्नमुह्यति ॥ ४३ ॥ जी
र्यंतेजीर्यमाणस्यपुंसःकेशारदादयः ॥ जीविताशाधनाशाचकुमारीवविवर्द्धते ॥ ४४ ॥ नश्वरत्वाद्धिदेह

॥ स॰ जी॰ पं॰ ॥ ॥ १०५ ॥

स्यात्तदीये च खिले चाऽपि ॥ तत्तत्पूर्णां परित्यज्य धर्मनिष्ठो हरिं भजेत् ॥ ४५ ॥ देशं कालं क्रियां द्रव्यं शास्त्रं ॥ अ॰ ५३ ॥
मंत्रं च पूरुषान् ॥ नाऽसतः क्वापि सेवेत तैस्तान्सतः सदा ॥ ४६ ॥ देशादीन्यसतस्त्वाऽऽश्रयंति ये ते संयां-
ति प्रसभं मम सत्त्वमेव सतः ॥ तस्मात्ते निजहितमिच्छताऽतिदूरं हातव्या मुनिवर संततं एव सेव्या ॥ ४७ ॥ इ-
ति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे नैष्ठिकधर्मे ब्रह्मचारिणा वेदाध्ययनप्रसं-
गेन वेदोत्पत्तिनिरूपणनामा त्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ श्रीनारायणमुनिरुवाच ॥ अथाह्निकं प्रवक्ष्या-
मि कर्मास्य ब्रह्मचारिणः ॥ अनुक्रमेण संक्षेपात्कार्यमावश्यकं हि यत् ॥ १ ॥ ब्राह्मे मुहूर्ते उत्थाय नर-
नारायणौ हृदि ॥ ध्यात्वा तं तस्य भक्तांश्च कीर्तयन्प्रणमेच्च तान् ॥ २ ॥ गृहीतोदकपात्रोऽथ कर्तुं शौच-
विधिं बहिः ॥ ग्रामाद्गच्छेन्नैर्ऋतीं वा दक्षिणां दिशमेकलः ॥ ३ ॥ अंतर्धाय तृणैर्भूमिं शिरः प्रावृत्य वास-
सा ॥ कुर्यान्मूत्रपुरीषे तु शुचौ देशे च निर्जने ॥ ४ ॥ दिवा संध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः ॥ कुर्यान्मूत्र-
पुरीषे तु रात्रौ च दक्षिणामुखः ॥ ५ ॥ छायायामंधकारे वा रात्रावहनि वा सच ॥ यथासुखमुखः कुर्यात्प्रा-
णबाधाभयेषु च ॥ ६ ॥ बहिर्ग्रामान्न गंतव्यं निशि तूत्सर्गकर्मणे ॥ कार्यं मठसमीपादौ तच्चैवापदि तेन त-
त् ॥ ७ ॥ न तिष्ठन्नाऽप्सु नो विप्रगोवह्न्यर्केंदुसंमुखः ॥ न फालकृष्टभूभागे न मार्गे न नदीतटे ॥ ८ ॥ गवां म- ॥ १०५ ॥

ध्ये पान्थमध्ये जीर्णदेवालये क्वचित् ॥ विण्मूत्रशौचनं नैव कुर्यात्स्त्रीसंमुखस्तथा ॥ ९ ॥ धृतहस्तं परित्यज्य
मूत्रं कुर्यान्नीचाश्रयात् ॥ शतहस्तं पुरीषे तु तीर्थे चैतच्चतुर्गुणम् ॥ १० ॥ शौचं कृत्वा मृदंबुभ्यां गच्छेच्छुद्धं ज-
लाश्रयम् ॥ प्रक्षालयेत्करौ पादौ तत्र मृत्तिकया बुधः ॥ ११ ॥ मलिनं तु मृत्तिका नैव ग्राह्या शौचविधौ क्व-
चित् ॥ अशुचिस्थानगा चैव शौचशिष्टा च नाकृता ॥ १२ ॥ एका लिंगे गुदे तिस्रो दश वामकरे मृदः ॥ द्वौ
स्रोर्द्वयोः सप्त देयास्तिस्रस्तिस्रश्च पादयोः ॥ १३ ॥ एका लिंगे तु मूत्रे स्यात्तिस्रो वामकरे तथा ॥ उभयोः कर-
योर्द्वे च मूत्रशौचं प्रकीर्तितम् ॥ १४ ॥ कुर्याद्द्वादशगंडूषान्पुरीषोत्सर्जने द्विजः ॥ मूत्रोत्सर्गे तु षट् कुर्याच्चतुरो
वापि धर्मवित् ॥ १५ ॥ पीतशेषं शौचशेषं नाचामेदुदकं द्विजः ॥ पात्रांतरस्याभावे किंचित्त्यक्त्वा तदाचरेत् ॥
१६ ॥ एतच्छौचं गृहस्थस्य प्रोक्तमस्ति द्विजन्मनः ॥ वर्णिनस्तद्द्विगुणं कुर्यान्निशि त्वर्धं तथाऽध्वनि ॥ १७ ॥ आ-
र्तः कुर्याद्यथाशक्ति शक्तः कुर्याद्यथोदितम् ॥ शौचमेतत्प्रयत्नेन देशकालानुसारतः ॥ १८ ॥ कृते मूत्रपु-
रीषेऽपि यद्दिने वोदकं न चेत् ॥ तदा यदुदकाप्तिः स्यात्तदा स्नायात्सचैलकः ॥ १९ ॥ अरण्येऽनुदके रात्रौ चौ-
रव्याघ्राकुले पथि ॥ कृत्वा मूत्रं पुरीषं च द्रव्यहस्तो न दुष्यति ॥ २० ॥ अंतर्बहिर्मज्जनेन शौचपात्रं च शोधयेत्
तुंबी त्रिः क्षालनाच्छुध्येद्धातुपात्रं मृदंबुभिः ॥ २१ ॥ एवं शौचविधिं कृत्वा कुर्वीत दंतशोधनम् ॥ न तस्य का-

॥स॰ज्ञा॰पं॰ शेन मतं देवतानामतिघर्षणम् ॥ २२ ॥ आर्द्रं तु मलवद्द्रीप्यातन्निषेधोऽस्य यत्ततः ॥ यथालब्धेन काष्ठेन जिह्वा अ॰५४॥
॥१०६॥ शुद्धिं समाचरेत् ॥ २३ ॥ न तिष्ठंश्च चलन्मार्गे न च प्रस्वपन्मुखस्तथा ॥ भाषमाणो न चान्येन सङ्कुर्याद्दन्तधा
वनम् ॥ २४ ॥ व्रतोपवासदिवसे श्राद्धे संक्रान्तिपर्वसु ॥ अपां द्वादशगण्डूषैस्तु कार्यं न तु दारुणा ॥ २५ ॥ न द्यां
न्नागे कूपे वा ततः स्नानं समाचरेत् ॥ उष्णोदकेनापदि तु मानसं वा तदाचरेत् ॥ २६ ॥ ध्यात्वा हरिं स्वहृदयेन
नामोच्चारपूर्वकम् ॥ मनसा कल्पितैस्तोयैर्यत्स्नानं तत्तु मानसम् ॥ २७ ॥ स्नानकाले स्मरेद्गङ्गां विष्णुपादो
दकीं शिवाम् ॥ नगरे यदि पापः स्निग्धं महापातकनाशनीम् ॥ २८ ॥ उदङ्मुखः उदङ्मुखो वा स्नात्वा स्नानाङ्गतर्पण
म् ॥ कृत्वाऽऽगत्य गृहे जानु पात्र आर्द्रवासा निजाश्रमम् ॥ २९ ॥ पश्चात्तु कुर्यात्तत्र स्थाने हि संध्यां जपाशये ॥ आर्द्र
वासाः स्नकुर्वीत कृत्वा लिङ्गकर्म बुना ॥ ३० ॥ आर्द्रवाससा नैव कुर्याद्वासस्तर्पणादिकम् ॥ गायत्रीं च कृत्वा तु व
हिर्वजन्जलं प्रपेत् ॥ ३१ ॥ अवमृज्यान्न चाल्पानि गात्राण्यंबरपाणिभिः ॥ न च निर्धूनयेत्केशान्नाम स्नेहं न जलं तयं
त् ॥ ३२ ॥ तिस्रः कोट्योऽर्धकोटी च श्मश्रुसंततरोमाणि मानुषे ॥ नावेति संततिर्या नित्यस्नानं परिमार्जयेत् ॥ ३३ ॥ देवाः
पिबन्ति शिरसो मुखतः पितरस्तथा ॥ वृक्षसोपि च गंधर्वा अधःस्नाङ्गं सर्वं जंतवः ॥ ३४ ॥ निजाश्रममुपेत्यास्य प्र
क्षाल्य चरणौ करौ ॥ वसीत धौते च सने स्पर्शे दुष्टे न चेत्तदा ॥ ३५ ॥ सकृद्धौतं द्विपार्धौतं तथैव च ॥ अधौते न हि ॥१०६॥

मानीयाच्छुकरक्षिणापत्नैवैः ॥ ३६ ॥ न द्विजस्पर्शदोषोऽस्ति धौतकौशेयवाससः ॥ शाणस्यौर्णस्य नाणां
स्य तन्त्रकस्यादेश्च वाससः ॥ ३७ ॥ एकवासा भवेन्नैव संध्यादिमंत्रपादिषु ॥ क्रियाः कृत्वा स्वणः क्वापि कर्मलेप
पिन्यपेत्र के ॥ ३८ ॥ उत्तरीयं न तद्धि परिधानार्धकेन तु ॥ कुर्याद्वा वस्त्रखंडेन वस्त्रसूत्रांतरेण वा ॥ ३९ ॥ नग्नः स्या
न्मलवद्वासा नग्नः कौपीनकेवलः ॥ अकच्छः सोत्तरीयश्च मुक्तकच्छश्च नग्नकः ॥ ४० ॥ गृहे आर्द्रपटी नग्न ए
ककच्छस्तथाविधः ॥ कटिकच्छविहीनश्च द्विकच्छो नग्न उच्यते ॥ ४१ ॥ परिधानाद्बहिः कच्छानिबद्धा त्वासुरी म
ता ॥ धर्मकर्मणि विद्वद्भिर्वर्जनीया प्रयत्नतः ॥ ४२ ॥ दैवे पित्र्ये च वा कर्म संध्योपास्त्यादि नैत्यकम् ॥ सूत्रहतेन
तोयेन वर्णो नैव समाचरेत् ॥ ४३ ॥ समित्पुष्पकुशादीनि ब्राह्मणः स्वयमाहरेत् ॥ शूद्रानीतैः क्रयक्रीतैः
पूजयेन्न रमापतिम् ॥ ४४ ॥ पूजाद्यानि संस्कृत्य यथा लब्धानि सत्वरम् ॥ कुशकाशासने स्थित्वा शुचौ देशे उ
पाविशेत् ॥ ४५ ॥ उदङ्मुखः प्राङ्मुखो वा स्वस्तिकासनमास्थितः ॥ आचमनं प्राणायामं च वर्णी पुंड्रं समाच
रेत् ॥ ४६ ॥ स्नात्वा पुंड्रं मृदा कुर्याद्धुत्वा वह्नौ तु भस्मना ॥ देवानभ्यर्च्य गंधेन जलमध्ये जलेन च ॥ ४७ ॥ पंच
केशवर्णां पुंड्राणां समगोपीचंदनाख्यया ॥ महाविष्णुरुपाकुर्यात्कायत्री वै पत्रवायवत् ॥ ४८ ॥ ललाटकंठहृदा
हौ तान् पुंड्राणि समाचरेत् ॥ प्रजापते तु मंत्रः कुर्यादग्निहोत्रस्य भस्मना ॥ ४९ ॥ प्रातःसंध्यामुपासीनो गायत्री

शक्तितो जपेत् ॥ अष्टोत्तरं सहस्रं वा शतं वापि दशापि वा ॥ ५० ॥ तिलहोमं ततः कृत्वा भूतशुद्धिं विधा-
य च ॥ प्राणप्रतिष्ठां कुर्वीत मातृकान्यासपूर्वकम् ॥ ५१ ॥ ततो मूर्तेः परं ब्रह्मरूपी विष्णुं हृदम्बुजे ॥ ध्यात्वा दे-
वमनन्यस्यैवात्मपूजनमाचरेत् ॥ ५२ ॥ शालग्रामशिलायां तु कार्यं नावाहनं हरेः ॥ तथा स्थिरप्रतिकृ-
तौ चैव तत्तु तदाचरेत् ॥ ५३ ॥ पूजापदसु स्कन्धे सा मूलमूर्तौ तु नान्यथा ॥ कुर्यात्तु रूपस्थस्तैलेन यथा लब्धो-
पचारकैः ॥ ५४ ॥ पंचास्यास्यभूतस्य संततिहृत्कमलाग्रतो तिमत्पुरोः ॥ तालार्चनं विधिं सर्वं तेनैव समाचरेत्
५५ ॥ पुष्पधूपाद्युजाभेन तद्ग्राह्मं मन्त्रेण मानसम् ॥ प्रीता परमया नित्यं तन्मनाः प्रपतोऽर्चयेत् ॥ ५६ ॥ संकल्प्य
देहे देवेन कृत्वा न्यासविधिं ततः ॥ कलशार्घ्यं शंखघंटा पूजां तत्र मनुनाचरेत् ॥ ५७ ॥ पूजाद्रव्याणि संप्रोक्ष्य
ध्यानमावाहनासने ॥ पाद्यमर्घ्यं चाचमनं स्नानं पंचामृतेन च ॥ ५८ ॥ तथा पुनः पूजां चाभिषेकं कृत्वा वाससमर्प-
येत् ॥ उपवीतं चंदनपुष्पाणि विविधानि च ॥ ५९ ॥ तुलसीपत्रमालां च धूपं ततोऽर्पयेत् ॥ दीपं फलादि
नैवेद्यं जलेन करशोधनम् ॥ ६० ॥ मुखप्रक्षालनं दद्यात्ताम्बूलं फलदक्षिणाः ॥ नीराजयित्वाथ हरिं दद्यात्पु-
ष्पाञ्जलिं च सः ॥ ६१ ॥ प्रदक्षिणां स्तुतिं कृत्वा नमस्कृत्य क्षमापयेत् ॥ मूलमंत्रं च गायत्रीं वैष्णवीं शक्तितो ज-
पेत् ॥ ६२ ॥ तुलसीकाष्ठजाभिर्वा पद्मबीजाङ्कुरैरथवा ॥ धात्रीकाष्ठोद्भवाभिर्वा जपमाला शुभावहा ॥ ६३ ॥ कृत्वा

रेकाग्रहृदि स्वस्तिकासनमास्थितः ॥ वस्त्राच्छादितमालश्च जपेन्मौनव्रतः स्थिरः ॥ ६४ ॥ वेदपुराणं शा-
स्त्राण्यथ भारतं वा हरेः स्तवम् ॥ जप्त्वा नत्वा हरिं कुर्यात्कुरूणामभिवंदनम् ॥ ६५ ॥ याचित्वा पर्दिनान्नं दान-
पक्वान्नं कृत्वान्नं कृतार्थः ॥ पाकं कुर्यात्स्वमध्याह्ने संध्यां च पितृतर्पणम् ॥ ६६ ॥ अर्पयित्वा भगवते म-
हान्नैवेद्यमादरात् ॥ आवाहितो हरेर्मूर्तिं हृदये धारयेत्सुनः ॥ ६७ ॥ नाऽगाजितं पूतं क्षीरं निवेद्यं चाबुध्य-
ते ॥ केशादिदुष्टमन्नं च रक्षांसुर्गधिचाशुचि ॥ ६८ ॥ वैष्णवं देवं ततः कुर्यादथवैकोऽपि याचकः ॥ याचेत्सं-
तर्हि किंभजेत्तस्मान्नं मुदान्वितः ॥ ६९ ॥ कृतकृत्वा वैश्वानरं पाचं च गोसमं दले ॥ चतुरस्रे तु विहृते निधा-
य प्रोक्षते ततः ॥ ७० ॥ अपोशानविधिं कृत्वा प्राणाहुतिपूर्वकम् ॥ अद्यात्साग्नानतः कृष्णप्रसादान्नं
च मौनवान् ॥ ७१ ॥ वित्रः कश्चित्तत्रित्रः सर्वं भिक्षां ये चेद्गिरिमंत्रयेत् ॥ नापा किंतु तर्हि गच्छेद्गृहे भोक्तुं तत्सा ज-
ये ॥ ७२ ॥ सर्वविलोस्तत्र नैवेद्यं कृत्वा भुंजीत पूर्ववत् ॥ तस्मात् व्रतनं गच्छेद्धृदं देनुनीत तर्हि सः ॥ ७३ ॥ आच-
मनतु चुकं कृत्वा पात्रशुद्धिं विधाय सः ॥ वेदसंख्यास्त्रपाठादीन्दिवाशेषं समापयेत् ॥ ७४ ॥ सायं स्नात्वोपास्य
संध्यां होमकर्म समाचरेत् ॥ मूलमंत्रं यथाशक्ति जप्त्वा कुर्याद्धरेः कथाम् ॥ ७५ ॥ यतीते प्रथमे यामे नि-
शायां च हरिं हृदि ॥ शयनं भुवि कुर्वीत मंत्रलेख्ये सचारिणाम् ॥ ७६ ॥ इति संक्षेपतः प्रोक्तो वर्णिनां नैत्य

॥ स०जी०पं० ॥१०८॥

कौविधिः॥ ज्ञातव्योविस्तरस्तस्यनित्यजोधर्मशास्त्रतः॥ ७७॥ संप्राप्नुजोवैश्यदेवहोमादीनांनयोवि प्र०५४॥
धिः॥ तत्तस्यहतितोज्ञेयः सतुनैष्ठिकवर्णिना॥ ७८॥ एतान्धर्मान्निषेवेतयोवर्णीनैष्ठिकोभुवि॥ सप्राप्नु
यात्स्वेप्सितामेवमुक्तिमेकांतिकींदृढः॥ ७९॥ यएतान्स्वगृहस्थश्चधर्मान्यस्त्रपीमानुकीर्तयेत॥ प्राप्नु
यात्तांदेवलोकंतोविमुच्याघसंचयत॥ ८०॥ भूमौयेनैष्ठिकाःसंतुनिजहितनिरतावर्णीनस्तस्त्कृतयेहा
वैराग्यंतीव्रमासाद्यहरिमुद्दत्तपसाऽऽराधितुंचोत्कचित्ता॥ तैस्तैस्तेपालनीयाःसततमिहनृपाःश्रेयसेस
स्वतेनप्रीतस्तेभ्योददातिप्रभुरखिलमपिप्रार्थितंवर्णिराज॥ ८१॥ सुव्रतउवाच॥ इतिनिशम्यजनुरुणा
न्नृपान्निगदितान्हरिणास्वहितावहः॥ परमतुष्टिमवाप्यमुदाचरन्नरपतेश्रणुनावसतांपतिम्॥ ८२॥
मुक्तानंदउवाच॥ कल्याणहेतुगुणरत्नविभूषितांघ्रेकारुण्यपूर्णनयनांबुजदीनबंधो॥ नानाविधाय
यनिजयप्रशामाभिधाननितंसंनमोऽस्तुहरयेगुरुराजतुभ्यम्॥ ८३॥ अज्ञानसंतमसनाशकभास्करत्वं
सांघ्रिश्रिताखिलजनेप्सितकल्पवृक्षः॥ सद्धर्मवर्त्मपरिपालनशालिनन्नि०॥ ८४॥ त्वंब्रह्मसरब्रह्मयोग
कलाव्रतीतोर्ध्वंयःसहस्रदलपंकजगर्भराग॥ त्वंब्रह्मविष्णुशिवमूर्तिरसीतितस्मैनमि०॥ ८५॥ त्वंनैसु
रापलजन्मैषुनसक्तुसामेकोऽसिदंःधरसेज्ञाहितायतेषाम्॥ धर्मंसनातनमहिंसमस्वंचपासिनन्नि०॥ ॥१०८॥

८६॥ त्वंकामलोभरससमानमुखाघदैत्यानंदुरस्यसर्वजनतानययज्ञातदर्पान्॥ निघ्नन्निहेशमवसिप्रक
टप्रतापोनमि०॥ ८७॥ त्वंविद्वसमानरूपदंजगतीहसार्थंवर्तितेधर्मपथिवर्तयतिस्वशिक्षात॥ धर्मस्वयं
रहमनुष्ठितवत्सधर्मौवैनमि०॥ ८८॥ त्वंकीर्तिरेवगुरुनामतयात्रसिद्धान्नारीरसवविलासोत्तुपर्मंदबुद्धि
न्॥ स्वंकौत्वपलसनुरदिनंभुविधूर्तपुंसोनमि०॥ ८९॥ एकस्त्वमेवभुविमुक्तिपथाब्जभास्वानाश्रितोमुमुक्षु
भिरतोमुनिभिःश्रितोऽसि॥ नक्तिर्ममाऽत्रविहता सकलवांछितपदयेनिसंनमोऽस्तुहरयेगुरुराजतुभ्यम्
॥ ९०॥ सुव्रतउवाच॥ इत्थंसमंस्तुत्यहरिंमहात्मानन्नामवर्णीऽद्भुतारबुद्धिः॥ तद्धर्मसंस्थोऽनुदिनंनिषे
वेतमेवभक्त्यापरयानरेंद्र॥ ९१॥ इतिश्रीसत्संगिजीवनेनारायणचरित्रेधर्मशास्त्रेपंचमप्रकरणेधर्मे
षुब्रह्मचारिणामाह्निकविधिनिरूपणनामाचतुःपंचाशत्तमोऽध्यायः॥ ५४॥ सुव्रतउवाच॥ अथारंभितिमं
दिरेऽथकृष्णार्चास्थापनोचितं॥ जातेराजोत्तमीनत्वाहरिंप्रोवाचभूपते॥ १॥ भगवन्मंदिरेत्वोतच्छ्रीकृष्ण
स्थापनोचितम्॥ जातंततःप्रतिष्ठांत्वंकुरुकृष्णस्यलक्षणे॥ २॥ इत्युक्तेतिनृपतेर्वाक्यंसर्वेशोऽतिर्विदद्ध
रिः॥ पप्रच्छरामचंद्राख्यंकृष्णस्थापनलक्षणम्॥ ३॥ सप्राहाऽश्विनमासेऽस्मिन्शुक्लपक्षदशमीकादिने॥ कृ
मुहूर्तेप्रवरेकृष्णंस्थापयतत्रतु॥ ४॥ हरिःप्राहनृपंश्रीप्रमुपहारान्समानय॥ मुहूर्तेचोऽदिनादस्ति

स-जी-पं० पंचमेऽह्नि स्फुरच्छोभनः ॥५॥ इत्युक्तो हरिणा हृष्टो राजा सत्वरकारिभिः ॥ विप्रानाहूय भूपोऽपहाराज यजयामा स०५५॥

॥१०८॥ स सर्वज्ञाः ॥६॥ हरिश्च मंडपं तत्र रंभास्तंभादिशोभनम् ॥ बंधयामास वितते कारयामास वेदिकान् ॥ प

॥ रश्चाभ्यां विजयाख्यायां स्विक्षणार्थमुपागतान् ॥ भक्तानावासयामास तत्र तन्मंदिरे स्वयं ॥८॥ आरुह्य

वेदिकान्कृतान्ब्राह्मणप्रवरांस्ततः ॥ एकादश्यां समारेभे प्रतिष्ठाविधिमादरात् ॥९॥ पीतांबरं सत्प

रिधाय राजा स्वारक्तकौशेयकृतोत्तरीयः ॥ आवाह्य पीठेषु सुरान्देवान्विधिवत्तान्विप्रोदितवेदमंत्रैः ॥१०॥

स संगवे द्वादशिकादिनेऽथो तन्मंदिरे राधिकया समेतम् ॥ कृष्णं प्रतिष्ठापयति स्म गोपीनाथाभि

धं श्रीदत्ततनुं यथावत् ॥११॥ वादित्रस्फूर्महांस्तदासीद्दध्वनिर्वैदिकभूसुराणाम् ॥ बभूव कुहं समहोऽपि

हरेः संपूज्य दृष्ट्वा स्थिरयाऽद्य लोके ॥१२॥ मुहूर्त्तमित्थं प्रसीमीक्षमाणे हरौ स कृष्णोऽतितरां बभासे

॥ दृष्ट्वा तमायुर्भद्राक्षिस्मयं वै न कानि विज्ञाश्च लोकाः ॥१३॥ कृत्वा स पूर्णाहुतिमादितेयान्विसर्जयित्वा

कृत भूमिदेवान् ॥ कृत्स्नेन मुख्येन हरिर्दक्षिणाभिः संतोषयामास तथेतरांश्च ॥१४॥ ददौ च दानानि बहूनि

तत्र द्विजोत्तमेभ्यः स उदारबुद्धिः ॥ गाः स्वर्णमुद्राश्च हयांस्तिलांश्च प्रादाच्च वासांसि मनोहराणि ॥१५॥

देशांतरेभ्यः श्रुतुरंतरेभ्यः समागतान् ॥ विप्रगणाननेकान् ॥ पौरांश्च विप्रान्स मुनींश्च सर्वान्संतर्पयो ॥१०९॥

मास विचित्रभोज्यैः ॥१६॥ कृष्णप्रतिष्ठोत्सवमेष रम्यं विधाय भक्तैः परिपूज्यमानः ॥ ग्रामांतरेभ्योऽप्य

सृजल्लनकांस्तत्रागतान्धर्मतनूजवर्यः ॥१७॥ राजोत्तमः प्राय स बोधयोऽपि भीरतनस्स स्वमनोरथस्य

॥ एतत्फलं तत्कृपया तदानीं भक्त्या सिषेवेऽथ तमेव नित्यम् ॥१८॥ जया च ललिता जाता तस्मिन्नगिरौ

हरिसंश्रिते ॥ लेभाते परमानंदं सर्वे भक्ताश्च नागराः ॥१९॥ हरिश्च तत्र न्यवसत्तीव्रवैराग्यमाश्रितः

॥ निःस्पृहोऽवर्तत जडभरतेन समं नृप ॥२०॥ क्वचिद्दग्धं क्वचिच्चान्नं क्वचिदन्नं क्वचित्कजम् ॥ क्वचित्सत्रं च

बुभुजे वायुमेव क्वचिज्जलं ॥२१॥ स्वस्वधर्मे वर्तयितुं साधून्पर्षदांश्च वर्णिनः ॥ स गोपाजानंदमुनिं

समाहूयाब्रवीद्वच ॥२२॥ स्वस्वधर्मे वर्त्तनीया त्वयैते सकला अपि ॥ आचार्यानुमतेनैवेत्युक्तस्ते सोऽ

ब्रवीत्तु तान् ॥२३॥ अस्मात्तायां वर्तितव्यं भवद्भिर्मामकैर्मुनेः ॥ वर्तिष्यतेऽन्यथा योऽसौ न मदीयः स इति

ध्रुवम् ॥२४॥ एवमुक्तान्भगवता तेन नमस्कृत्य तेऽखिलाः ॥ एवमेवाऽऽचरिष्यामो नान्यथेत्यब्रुवन्वचः

॥२५॥ तदा प्रसन्नो भगवांस्तानुवाच विनिश्चितान् ॥ श्रेयोऽभविष्यत्सर्वेषु युष्माकमिति भूपते ॥२६॥ संस

क्तदैत्यान्सकलान्व्यवहारकार्यादेर्हनिशं च बहुधाऽननुसंदधानः ॥ ज्ञानं च भक्तिमतिज्ञां स विरागं

योगं च धर्ममवबोधयति स्म यथावदेव ॥२७॥ धर्मस्तावकेन केनचित्संनिगमविहितो भास्करेदेवेन भ

॥स॰जी॰पं॰

॥११०॥

क्रिर्दिश्याकारेविधेयासितघनमहसिब्रह्मणोस्य चैकाम् ॥ निष्ठिल्लैवाप्य वल्गुंगणमुमपि चरनि अ॰५६॥
संपश्चिलज्यसंतस्तन्माहात्म्या यसेयारतिवदतिनिजानधार्मिकोनीलकंठः ॥२९॥ इतिश्रीसत्संगि
जीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे दुर्गपत्तने श्रीगोपीनाथप्रतिष्ठानिरूपणनामा पं
चपंचाशत्तमोऽध्यायः ॥५५॥ श्रीहरिर्जयतितमाम्॥ सुव्रतश्रीहरिस्त्वाश्रित्य परमानंद॥ प्रादुर्भूय धरातले
सभगवानेकांतभक्तिं निजां धर्मज्ञानविरागवेगसहितां प्रावर्तयच्छ्रेयसे॥ तस्मिन्भक्तिविवर्द्धये
तनुभृतां सद्यः समाधौ नयः स्वीयब्रह्मपुरा श्रुदीदृशां दर्सी धर्मात्मिनः प्रीयताम्॥ १॥ यो योग
शास्त्रं निखिलं जनानां निजाश्रितानामनवद्यहिताय॥ प्रावर्तयच्छ्रीतिदयानिधिर्भुवि तस्मै नमः
श्रीहरये परात्मने॥२॥ सुव्रत उवाच॥ कृष्णेतरपदार्थेषु रुचिहीनस्स सर्वथा॥ धर्मादिस्त्वकेत्वाऽऽ
सीत्तद्रुसप्रीतिर्हरेर्नृप॥ १॥ शतानंदो मुनिस्तस्य सेवायां निरतः सदा॥ पादसंवाहनं कुर्वन्निकटासी
त्तदंतिके॥ २॥ तस्मै वाच स्वयंस्वामी मुने किंचन ते यदि॥ पृष्टव्यमस्ति तद्देहि ताहि पृच्छ वक्ष्ये तदुत्तरम्॥ ३॥ ए
वमुक्तः स तु प्रीतो भृशं मुनिरुदारधीः॥ प्रांजलिस्तं नमस्कृत्य प्रपच्छेत्थं नराधिप॥ ४॥ शतानंद उवाच॥ ॥११०॥

सांगं योगमहं स्वामिन्बोद्धुमिच्छामि तत्त्वतः॥ त्वत्त एव हि सर्वज्ञात्केवलीयाच्च योगिभिः॥५॥ मया
तु त्वत्प्रसादेन योगिनामपि दुर्लभा॥ समाधिसिद्धिः प्राप्तास्ति विना साधनसंपदम्॥ ६॥ तथापि
लक्षणादीनि योगशास्त्रानुसारतः॥ विविज्ञासुः सम्यग्योगस्य तदंगानां च सर्वशः॥७॥ सुव्रत उवाच
॥ इति पृष्टः स मुनिना तेन योगिद्धितैषिणा॥ प्रसन्नो भगवानुत्तरं तमुवाच महामतिम्॥ ८॥ श्रीना
रायणमुनिरुवाच॥ समीचीना तिने बुद्धिर्योगं पृच्छसि यन्मुने॥ नास्ति योगसमं किंचित्साधनं श्रेयसे
परम्॥ ९॥ योगं विना तु मनसो निग्रहो दुष्करः सताम्॥ भक्तिर्ज्ञानं च योगेन सिद्धिमाप्नोति निश्चि
तम्॥१०॥ आदौ हिरण्यगर्भेण योगशास्त्रं प्रवर्तितम्॥ पतंजलिस्वरूपेण तत्फणीन्द्रेण विस्तृतम्॥
११॥ तत्रारम्भ हमादाय सांगं योगं वदामि ते॥ कृत्स्नेस माधिमनसो विहितिर्योगलक्षणम्॥ १२॥ यद्वै
वक्रिना सर्वेंद्रियाणि ते धातुसंगताः॥ शेषाः समाधियोगेन नाशं ते मानसास्तथा॥ १३॥ अतस्तद्
पनाशार्थं नत्तेन कृमजापत्तेः॥ समाधियोगाभ्यसनं कार्यं मुमुक्षुहिनाकुलम्॥ १४॥ सांगं समाधि
योगं तु संसाधयितुमिच्छता॥ प्रथमं योगगुरुर्भक्त्या सर्वयोगकलानिधिः॥ १५॥ मनोनुकूलयान
स्थाननिर्जंतु स्थूपयासनम्॥ प्राणायेद्रपतत्त्वोक्तं गत्वा योगं समभ्यसेत॥ १६॥ देशोऽस्तु चौ समे वायु शार्क

शादिविवर्जिते ॥ मनोनुकूले निर्बाधे निवसेद्योगसाधकः ॥१७॥ अन्नादिभिः स्वशुश्रूषाकर्तुर्यत्रा- 
नुकूलता ॥ नवे स्थाने शीतवातदंशबाधा न यत्र च ॥१८॥ जनाज्ञायानुकूल्यं च यत्रास्त्यौचितं भवे-
त् ॥ आश्रमे तत्र निश्चिंतो नक्तं योगं समभ्यसेत् ॥१९॥ नदीकूपे पंके च समये पितृकानने ॥ सशा-
र्द्धःस्त्रिजनाशाशोजीर्णगोष्ठे चतुष्पथे ॥२०॥ अशुचौ वृत्तिगंधे च शुष्कपर्णचये तथा ॥ देशे न नाकुले
चापि न योगाभ्यासमाचरेत् ॥२१॥ जनसंगं च व्याप्तिजल्पमत्याहारमतिश्रमम् ॥ रसजौल्यमतिक्रोधं
न कुर्याद्योगमाचरन् ॥२२॥ तुदस्व पूरयेज्जागो दावन्ये नैकमंबुना ॥ शोषयेदेकमेवं हि मितभुग्योग
रूढवेत ॥२३॥ यवतंदुलगोधूमान् गोदुग्धाम्मेच शुंठिकाम् ॥ भक्षयेदभ्यसन् योगं सिद्धे त्वस्मिन्लतद्य
मः ॥२४॥ परित्यजेज्जनवैश्यैर्व्रसंसर्गं मद्यमांसयोः ॥ भंगां न माजाहिफेन मादकारीनि पूतिच ॥२५॥ सा-
धकोन भक्षयेन्नैव दधिनकांचिकास्तथा ॥ माषान्कुलस्थान्शाकं च कंदं च जवर्णं समेत ॥२६॥ तैलं
तिक्तं रामठं च सौंलसुदमतिशीतलजम् ॥ न भक्षयेद्विलालं पराय्यं कं च नापि च ॥२७॥ कृशाहवांस्भवे-
न्नित्यं शौचिल्यं तु परित्यजेत ॥ स्त्रीप्रसंगं तु यत्नेन सर्वथा सपरित्यजेत् ॥२८॥ स्त्रीणां पापमतिधूर्त-
संगमं सर्वथा परिहरेच्च सफरं वम् ॥ अन्यथा तु परिपक्वयोगवानभ्रंशमेति किमुतर्हि साधकः ॥२९॥ 

इति श्रीसर्वांगिनीवनेनारायणाचार्यविरचितधर्मशास्त्रे पंचमेप्रकरणे योगोपदेशे योगसाधनोचितदेशा-
हारनिरूपणं नाम षट्पंचाशोऽध्यायः ॥५६॥ श्रीनारायणमुनिरुवाच ॥ समाधियोगस्यांगानि मोक्षा-
र्थं मनीषिभिः ॥ तानि तेऽनुक्रमेणाहं कथयामि द्विजोत्तम ॥१॥ आद्यं यमास्ततः प्रोक्ता नियमाश्चास-
नानि च ॥ प्राणायामस्तु तुर्यं तु प्रत्याहारश्च पंचमम् ॥२॥ धारणा च ततो ध्यानं समाधिश्चाष्टमं मत-
म् ॥ अंगी समाधिरेतेषां हि सिद्धसंगैः क्रियाश्रमैः ॥३॥ तत्राद्यानि तु पंचापि बहिरंगानि सन्ति हि ॥ अं-
तरंगाणि चत्वारि धारणादीनि विद्धि भो ॥४॥ अथैतेषां च लक्षणानि संक्षेपतः पृथक् पृथक् ॥ योगशा-
स्त्रोदितान्येव कथयामि शृणुष्व मे ॥५॥ हिंसादिभ्योऽघकर्मभ्यः साधकं योगएव यः ॥ स्वाधितं यमयं-
त्यत्र तेतु प्रोक्ता यमा बुधैः ॥६॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्यं च सुव्रत ॥ अपरिग्रहश्चैते यमाः पंच
प्रकीर्तिताः ॥७॥ शरीरवाङ्मनोभिर्यद्देहेकेऽराजननं सदा ॥ प्राणिमात्रस्य सा सद्भिरहिंसेत्यभिगीयते ॥८॥ ध-
र्म्माधर्म्मौ समीक्ष्यैव यथार्थं कथनं तु यत् ॥ सर्वेषां हितकृद्वाक्यं तत्सत्यमुच्यते ॥९॥ अदत्तस्य
परस्वस्य पाशीक्ष्णेण बलेन वा ॥ यन्नैव ग्रहणं क्वापि तदस्तेयमुदीर्यते ॥१०॥ स्त्रीसंगस्याष्टधा त्यागः
सम्यग्वस्तुविचारतः ॥ ब्रह्मचर्यं तदेवाहुर्ब्रह्मप्राप्तिकरं तु यत् ॥११॥ स्वयं विचार्यत्यक्तानां पदार्थानां

॥ स॰ज्ञा॰ ६० नां न संग्रहः ॥ सोऽपरिग्रह इत्याकर्मुन यत्तत्त्वदर्शिनः ॥ १२ ॥ अहिंसायाः फलं तत्र निर्वैरत्वं हि स अ॰ ५७ ॥
॥ ११२ ॥ र्वथा ॥ अभ्यावित्वं च सत्यस्य फलं वै पुण्यकर्मणाम् ॥ १३ ॥ अस्तेयस्य फलं नानादिव्यरत्नोपलंभनं
म् ॥ वीर्यलाभो योगसिद्धिर्ब्रह्मचर्यस्य चाद्भुतम् ॥ १४ ॥ मनोविक्षेपनाशश्चापरिग्रहफलं मतम् ॥ प्रति
प्रोक्ता यमाः पंच नियमान्कथयाम्यथ ॥ १५ ॥ निवर्त्तकाम्यधर्मेभ्यो मोक्षधर्मेषु योगिनम् ॥ यैर्वैनि
यमयंत्यत्र नियमास्ते प्रकीर्तिताः ॥ १६ ॥ शौचं तपश्च संतोषः स्वाध्यायश्चेश्वरार्च्चनम् ॥ इति पंचैव क
थितास्ते च योगविशारदैः ॥ १७ ॥ तत्र शौचं द्विधा प्रोक्तं बाह्याभ्यंतरभेदतः ॥ मृज्जलाभ्यां भवेद्बाह्यं
भावशुद्ध्या तथांतरम् ॥ १८ ॥ शरीरशोषणं यत्तु कृच्छ्रचांद्रायणादिभिः ॥ तत्कायमिंद्रियाणां च तपस्तु
च्यते तथा ॥ १९ ॥ अन्येच्छारहिता तुष्टिः संप्राप्तेनेश्वरेच्छया ॥ अन्नादिना स संतोषः कथ्यते सुमतेबु
धैः ॥ २० ॥ मंत्रोपनिषदां पाठो यथाशक्ति निरंतरम् ॥ भक्तिज्ञानस्तुत्यवाक्यस्य स्वाध्यायः स च कथ्यते
॥ २१ ॥ मनसा चिंतनं नित्यं हरेश्च वचसा स्तुतिः ॥ कायेन पूजा पुष्पाद्यैरित्युक्तं चेश्वरार्चनम् ॥ २२ ॥
सत्त्वशुद्धिः सौमनस्यमिंद्रियाणां च निग्रहः ॥ आत्मदर्शनयोग्यत्वं फलं शौचस्य तेषु च ॥ २३ ॥ तपसः
स्विंद्रियधियां शुद्धिश्चाघक्षयः फलम् ॥ सर्वोत्तमसुखप्राप्तिः संतोषस्य फलं तथा ॥ २४ ॥ प्रसन्नते ॥ ११२ ॥

श्वरे च स्वाध्यायस्य फलं मतम् ॥ फलमीश्वरपूजायाः समाधेः सिद्धिरप्युत ॥ २५ ॥ आस्यते योगिना
यत्र येन वा योगसिद्धये ॥ तदासनमिति प्रोक्तं योगस्यांगं तृतीयकम् ॥ २६ ॥ आसनानि तु योगज्ञाः
प्राहुर्बहुविधानि हि ॥ चतुरशीतिसंख्यानि तेषु मुख्यानि योगिनाम् ॥ २७ ॥ तत्रापि विंशतिं मुख्या
नि योगिनः कथयंति हि ॥ चतुर्दश च तत्रापि मुख्यानि कथयामि ते ॥ २८ ॥ स्वस्तिकं गोमुखं वीरं यो
गं पद्मं च कौक्कुटम् ॥ कौर्म्यं चापि च मायूरं तथा पश्चिमतानकम् ॥ २९ ॥ शवं सिद्धं तथा सिंहं भद्रं चे
ति चतुर्दश ॥ लक्षणानि क्रमेणैषां कथयाम्यथ तत्त्वतः ॥ ३० ॥ जानूर्वोरंतरे पादतले द्वे अपि यो
गकृत ॥ कृत्वासीत ऋजुर्यत्तत्स्वस्तिकं परिकीर्तितम् ॥ ३१ ॥ दक्षपार्श्वे सव्यगुल्फं सव्येदक्षिणमर्प्य
येत ॥ गोमुखाकृति तन्योक्तमासनं गोमुखाभिधम् ॥ ३२ ॥ एकं सव्येतरे पादमेकमूरुमन्यपदे तथा ॥ वी
रासनमिति प्रोक्तं सुकरं साधकैरिदम् ॥ ३३ ॥ व्युत्क्रमेण गुदं रुद्ध्वा गुल्फाभ्यां स्यात्समाहितः ॥ एत
द्योगासनं प्रोक्तं योगविद्भिः सुसंमतम् ॥ ३४ ॥ वामोरोर्दक्षिणं पादं दक्षोरोरन्यसव्येतरम् ॥ अपाक
राभ्यामंगुष्ठौ दधात्पद्मासनं त्विदम् ॥ ३५ ॥ बद्धपद्मासने हस्तौ जान्वोरंतरे गतौ ॥ भुवि संस्थाप्य
व्योमस्थो भवेत्कुक्कुटासनम् ॥ ३६ ॥ कुक्कुटासनबंधस्थो दोर्भ्यां संबध्य कंधराम् ॥ भवेत्कूर्मवदु

स्तानन्तनुस्तानकूर्मकम् ॥ ३७ ॥ सव्योरुमूले दक्षांघ्रिं कृत्वा नाभौ धृतिर्दरेत ॥ दक्षिणेन करेणामंद
क्षेणाधनुरासनम् ॥ ३८ ॥ एतन्नावरशेगघ्नं कुंडलीबोधकारकम् ॥ अगानाभ्यैर्यकृत्वौ क्रमासनं मुनि
संमतम् ॥ ३९ ॥ दोर्भ्यां भूमिमवष्टभ्य नाभिपार्श्वे कफोणिगे ॥ कृत्वा मवेनवम्यु वपुर्मायूरं तत्हृदेर्दवत
४० ॥ रोगानौदरिकान्हंति प्रदीपयति जाठरम् ॥ भुक्तं विषं कदन्नानं जरयेत्तदासनम् ॥ ४१ ॥ प्रसार्य
देहवन्नादीन्दहीनाग्नं यंतयोः ॥ स्पसिज्जानुं परिशिरइति पश्चिमतानकम् ॥ ४२ ॥ पवनंपश्चिमगानिं
जठरानिप्रदीपनम् ॥ कृशानमुदरस्यापि कुर्यादेतत्किलासनम् ॥ ४३ ॥ शवासनंच शवबदुत्तानं श्रा
पनंभुवि ॥ सर्वासनश्रांतिहरं चित्तविश्रांतिसाधनम् ॥ ४४ ॥ निपीड्य सीवनीं वाम पार्ष्णिना वामगुल्फकं
॥ विन्यसेद्दक्षिणं गुल्फमेतत्सिद्धासनं स्मृतम् ॥ ४५ ॥ आसनाग्र्यं च रोगघ्नमेतदस्यासनं विदुः ॥ केचि
न्मुक्तासनं प्राहुरेके गुप्तासनं जगुः ॥ ४६ ॥ आधोरधानयोर्गुल्फौ सीवनीपार्श्वयोः क्षिपेत ॥ सव्ये दक्षे
तोऽस्य प्रसृतांगुलिकौ करौ ॥ ४७ ॥ जान्वोर्हस्तौ व्यात्तवक्त्रो नासिकाग्रं विलोकयेत ॥ एतत्सिंहासनं प्रोक्तं
योगिनामभिवांछितम् ॥ ४८ ॥ सीवनीपार्श्वयोर्गुल्फौ वृषणाधः क्रमान्न्यसेत ॥ दध्यात्पादौ च पाण्योर्भ्यां
क्तितभद्रासनं परम् ॥ ४९ ॥ इत्याद्यन्यासनान्याहुर्योगशास्त्रविशारदाः ॥ स्थिरं सुखं ध्यानकाले नैव पा ॥ ११३ ॥

मेकतमं श्रयेत ॥ ५० ॥ आसनश्रमजातेन स्वेदेनांगं विमर्दयेत ॥ दृढतालघुतांचैव तेन गात्रस्य जायते
॥ ५१ ॥ आसनानां फलं प्रोक्तं सर्वद्वंद्वसहिष्णुता ॥ शारीररोगनाशश्च प्राणायामाधिकारिता ॥ ५२ ॥
उदितान्यासनान्यस्य सिद्धानि स्युर्यदा तदा ॥ गुरूपदिष्टमार्गेण नाडीशोधनमभ्यसेत ॥ ५३ ॥ विना ना
डीशोधनेन तु प्राणायामो न सिध्यति ॥ मलाकुलासु नाडीषु नांतश्चरति मारुतः ॥ ५४ ॥ धौतिर्बस्तिस्तथा
नेतिस्त्राटकं नौलिकातथा ॥ कपालभातिश्चैताः षट्क्रियाः समत्र कीर्तिताः ॥ ५५ ॥ शनैर्ग्रसेत्क्लिन्नं वस्त्रं
चतुरंगुलविस्तृतम् ॥ प्रत्याहरेत्पुनरिति धौतिः कासादिरोगहा ॥ ५६ ॥ नाभिमात्रे जले स्थित्वा पायुना
लम्बवारिच ॥ ससेदस्तिं श्वाउपित्वा स बस्तिः सर्वरोगहृत ॥ ५७ ॥ शिश्नेनाकृष्य सलिलं पुनस्तेनैव रेच
येत ॥ गुदेन वारेचयेत्तद्वस्तिरेषद्वितीयकः ॥ ५८ ॥ पीत्वा मुखेन पानीयं रेचयेत्तद्गुदेन च ॥ शंखप्रक्षा
लनाख्यैषा बस्तिरुक्तामनीषिभिः ॥ ५९ ॥ पीत्वा जलं मुखेनाशु पुनस्तेनैव तद्वमेत ॥ प्रोक्तागजकरण्ये
षा क्रियावैनाडिशोधनी ॥ ६० ॥ नासानालेस्निग्धसूत्रं प्रवेश्याकर्षयेन्मुखात ॥ एषा नेतिर्नेत्रमूर्ध्वरोग
प्रीदिव्यदृष्टिदा ॥ ६१ ॥ त्राटकं च सूक्ष्मलक्ष्यं यावत्स्यादश्रुपातनम् ॥ तावस्थिरदृशोक्षेत नेत्ररुक्तंडिहंति
दम् ॥ ६२ ॥ अमंदावर्त्तवेगेन तुदं सव्यापसव्यतः ॥ नतांसौ भ्रामयेदेषा नौलिर्सिद्धैःकथोच्यते ॥ ६३ ॥

॥स॰प्री॰पं॰ ॥११४॥

रेचकं पूरकं कुर्याद्भस्त्रावच्छ्वाससंभ्रमम् ॥ कपालभातिः सा प्रोक्ता दोषघ्नी योगिसंमता ॥ ६४ ॥ शुद्धं अ॰५३॥
तिनाशस्थताभिः क्रियाभिर्योगचारिणः ॥ शुद्धासु तस्य नाडीषु प्राणोतिकृशतां तनुः ॥ ६५ ॥ देहे भवति कां
तिश्च जठराग्निप्रदीपनम् ॥ नादाभिव्यक्तिरारोग्यं पथ्येष्वं वायुधारणम् ॥ ६६ ॥ इत्थं नाडीः शोधयित्वा
प्राणायामं समभ्यसेत् ॥ चलेवाते चलं चित्तं निश्चले निश्चलं यतः ॥ ६७ ॥ आसने दृढमास्थिस कुर्वीत
प्राणसंयमम् ॥ गुरुप्रोक्तक्रमेणैव स्वस्थचित्तः शनैः शनैः ॥ ६८ ॥ प्राणशब्देन तु प्रोक्ते शारीरे वायुरुच्य
ते ॥ आयामो निग्रहस्तस्य प्राणायामस्ततः स्मृतः ॥ ६९ ॥ प्राणायामो द्विधा प्रोक्तः सगर्भो ऽगर्भ एव च
॥ जपध्यानं विनाऽगर्भः सगर्भस्तत्समन्वितः ॥ ७० ॥ अगर्भात्केवलाच्छुद्धिः सगर्भः श्रेष्ठ उच्यते ॥ सग
र्भाभ्यासतः शीघ्रं सिद्धिर्योगस्य विद्यते ॥ ७१ ॥ द्वयोर्भेदश्चतुर्धोक्तः पूरको रेचकस्तथा ॥ कुंभकः स्तम्भ
कश्चेति शृणु तल्लक्षणान्यपि ॥ ७२ ॥ यथा कमलनालेन जलं वक्त्रधृतेन तु ॥ आकर्षयेत्तथा वायुं पूर
कः स निगद्यते ॥ ७३ ॥ समुत्क्षिप्य बहिर्वायुं शून्यं कुर्याद्दृढं चिरम् ॥ स रेचक इति प्रोक्तो योगशास्त्रविशा
रदैः ॥ ७४ ॥ उच्छ्वासमपि निःश्वासं रुंध्वा योगी स्थिरस्थितिः ॥ स कुंभक इति प्रोक्तः पूर्णकुंभवत्स्थि
तः ॥ ७५ ॥ कुंभको द्विविधो ज्ञेयस्तेषु संकल्पते बुधैः ॥ एकत्याभ्यंतरस्तत्र द्वितीयो बाह्य उच्यते ॥ ७६ ॥ अपा ॥११४॥

ने प्राणसंरोधो ऽत्र यश्चाभ्यंतरो ऽस्तु मे ॥ बाह्यो ऽपानस्य संरोधो द्वितीयः कुंभकः स्मृतः ॥ ७७ ॥ पूरकः शनैर्वैस्त
त्र कार्यः षोडशभिः शनैः ॥ द्वात्रिंशता रेचकस्तु चतुःषष्ट्या च कुंभकः ॥ ७८ ॥ अथवा विष्णुगायत्रीं यो
गी स्वमनसा पठन् ॥ यथाशक्त्यैव कुर्वीत प्राणायाममतंद्रितः ॥ ७९ ॥ पिंगला दक्षिणे वामे नाडीडा सं
स्थितौ तयोः ॥ सूर्यचंद्रौ सुषुम्णा तु तन्मध्ये तत्र पावकः ॥ ८० ॥ इडया पूरकं कृत्वा ततः कुर्वीत कुंभक
म् ॥ ततः पिंगलया कुर्याद्रेचकं तु शनैः शनैः ॥ ८१ ॥ यद्वा पिंगलया कुर्यात्पूरकं कुंभकं ततः ॥ कृत्वा
रेचकं कुर्यादिडया योगसाधकः ॥ ८२ ॥ शनैः कृतेन युक्तेन प्राणायामेन योगिनः ॥ रोगनाशश्च सिद्धिः
स्याद्रम्यासात्तु विपर्ययः ॥ ८३ ॥ प्रातर्मध्यंदिने सायमर्धरात्रे च कुंभकान् ॥ शनैरशीतिपर्यंतं चतुर्वारं स
मभ्यसेत् ॥ ८४ ॥ कनीयसि प्राणरोधे स्वेदः कंपस्तु मध्यमे ॥ उत्तमे चासनोत्थानं साधकस्य तु कुंभके ॥ ८५ ॥
बहिःस्थितस्य ग्रहणमस्यागोतः स्थितस्य च ॥ वायोः स स्तम्भको ज्ञेयः शून्यवेधाद्यभूमिका ॥ ८६ ॥ प्राणा
यामफलं प्रोक्तं मुनिभिर्योगवित्तमैः ॥ योग्यता धारणासु स्यान्मनसस्त्विति सुव्रत ॥ ८७ ॥ असमस्तकं च्यक
संजन्मप्राणरोधस्य सर्वतः ॥ विशेषोक्तं ते तं च समर्थं ते कथयाम्यहम् ॥ ८८ ॥ नस्य स्मकप्राणनिरोधसाम्यं
योगांगमायोस्य परं हि किंचित् ॥ नाराभिधत्रसातिपत्र लब्धे भवेत्स्वरक्षस्सु खानुभूतिः ॥ ८९ ॥ इति श्री

॥स.जी.पं.५ सत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे योगोपदेशे यमनियमासनप्राणायामलक्ष श्री॥५८॥
॥२२५॥ णनिरूपणनामा ॥ ५७ ॥ श्रीनारायणमुनिरुवाच ॥ प्राणायामः स्मृतः काष्ठो
मतः श्रेष्ठतया बुधैः ॥ सनिर्वाणमनश्चित्तस्य पुंसो हृदेव जायते ॥१॥ हृदि तस्मिन्जायमाने प्राणाद्याद
शवायवः ॥ स्वस्वस्थानावकाशेषु शाम्यंति तद्दयादिषु ॥२॥ योगिनो जायतेऽवस्था तदा जाग्रत्सुषुप्ति
वत् ॥ देहे च स्तब्धतां चालन्नादर्शस्य श्रवणेन तया ॥३॥ आदौ नेत्री रवमिव श्रुत्वा सूक्ष्मध्वनिं ततः ॥ अंत
:श्रवद्घंटे चाऽथ वेणुनादं शृणोति सः ॥४॥ ततो मृदंगवन्नादं शंखदुंदुभिवत्ततः ॥ भेर्या ह्यनेकवादित्र
तुल्यनादं शृणोत्यथ ॥५॥ मेघगर्जनतुल्यं स नादान्नैकविधानिति ॥ श्रुत्वाऽतीव प्रबुद्धः सन्स्वकाशं रु
द्धि पश्यति ॥६॥ ततः स्वच्छविराड्ब्रह्मदेहेषु प्राणवं सच ॥ श्वासोच्छ्वासस्वरूपेणास्थितं स्वांतर्दिपश्यति ॥७
॥ अभ्यस्यति योगिनोऽत्र शाम्यते यस्य निःसरा ॥ प्रतिष्ठा सं महाव्योमत्रमशाश्वरमनंतहिता ॥८॥ आदौ तु ने
त्रसांशज्ञिमाकाशवदनंतकम् ॥ नादब्रह्मेति यं प्राकृत्तं पश्यति महीन्यलम् ॥९॥ यस्माद्वाग्नेर्विस्फु
लिंगाख्वनिर्यांति सर्वतः ॥ तेजसो मंत्रजान्यर्कविं वतुज्यान्यनंतशः ॥१०॥ तस्मात्तु तेजसो राशेरुद्यं
प्रणवेन तः ॥ सर्वास्ते नादरूपं यो योगी तेजोमयं सितम् ॥११॥ प्रणवध्वनयस्तत्र तेजोऽत्र मिसमप्रभा ॥१२॥ ॥२२५॥

सहस्रो ऽपि यं लक्षरक्तपंते तेन भ्रूशिरा ॥१२॥ यथा समुद्रे कल्लोला विकृतो वा बुलाहकैः ॥१३॥ तस्मात्तेच
जीयं ते तेजः पुंजेन धारवाः ॥१३॥ नादात्मकस्यतस्या ऽथ प्रणवस्य महाध्वनौ ॥ प्राकृषु नानंतरे ना
दान्तिरोधीयते न एव ते ॥१४॥ प्रणवस्याऽस्य माहात्म्यं वेदेषु बहुधोदितम् ॥ तस्य सारं समाकृष्य संक्षे
पेण वदाम्यहम् ॥१५॥ यत्किंचिदात्मपं जो के प्रणवोत्पन्नमस्तु ॥ तेभ्यः कारणमस्तीति बीजरूपः स
नातनः ॥१६॥ तस्याऽकारउकारस्य मकारस्यार्धमात्रका ॥ मात्राश्चतस्र ऽसाहुः सर्वाधारतया मताः
॥१७॥ विराड्विष्णुः स्थितिश्चेति त्रयं चाकारमाश्रितम् ॥ सर्वे हिरण्यगर्भस्य सृष्टिश्चोकारमाश्रिताः ॥१८
॥ अव्याकृतेश्वरलयामकारमिति संश्रिताः ॥ चिदाकाशाक्षरब्रह्मसतुर्यमिस्यर्धमात्रकाम् ॥१९॥ मात्र
काश्च हि पंचाशद्वर्णा व्याकृतिभिः स्मृताः ॥ वेदागमाद्यथ यत्किंचित्तच्छब्दजं वाङ्मयं हितम् ॥२०॥ ततो वका
रोऽप्यखिलः प्रणवस्याऽस्य तेजसा ॥ आत्तरसवलोक्या सौ प्राज्ञो सानंदसुत्तमम् ॥२१॥ तस्यैवात्रैवना
चकुत्समहानादादिभूमिकाः ॥ विज्ञानाद्यात्मकं योगी याति नारायणं प्रभुम् ॥२२॥ कार्यकारणरूपो
सौ नादः सर्वोयदेगतः ॥ प्रादुर्भवति तं देवं साक्षात्स्वहृदि वीक्षते ॥२३॥ ततः सहृत कृत्सोऽत्रमनवते
वनसंज्ञायः ॥ तत्र साक्षाद्वदवाप्नोति तद्धाम परमं बृहत् ॥२४॥ कृष्णकप्राणसंरोधादीर्घं प्याति रुद्री ।

॥स॰जी॰पं॰ रिता॥ सहजः समसमाधिर्हि कृष्णतेनत्त्वदर्शिभिः॥२५॥ तदाभ्योगी वपुःस्थोपि वर्त्ततेसास्ति वत्सदा॥ अ॰५८॥
॥११६॥ शापवासंतिकलयस्थितिमुन्निठराव्वसः॥२६॥ नसर्वज्ञो कस्माधी यैः श्रमकःशाससंयमः॥ नचै
कजन्मजन्मेनसुकृतेनापि लभ्यते॥२७॥ अनेकजन्मजन्मानां संचयैः पुण्यकर्म्मणाम्॥ अशेषवा
सनाहीनं यस्यचित्तंतुजायते॥२८॥ तस्यसत्संगमस्त्वाशु विनापिप्रस्मकर्थितिः॥ वासुदेवस्यैवसाक्षा
दिच्छयाजायतेमुने॥२९॥ महात्मनो ब्रह्मणोकांवास्मेस्मनुनवत्समौ॥ आर्षमेषुयथाइर्वनवयोगेष्णु
शास्त्रया॥३०॥ कविर्हरिरंतरिक्षः प्रबुद्धःपिप्पलायनः॥ आविर्होत्रोऽथद्रुमिलश्चमसःकरभाजनः
॥३१॥ पुत्राऋषभदेवस्य नवैतेयोगवित्तमाः॥ सिद्धावधूतवृत्त्यापिशान्तब्रह्मात्मदर्शिनः॥३२॥ तथा
विधाश्च येकेचित्तेऽधुनाप्यवभूतले॥ नारायणीचर्यायाःकस्मात्त्वमंतेनाहंदर्शिस्थितिम्॥३३॥ चित्त
मनिर्वासनतांविना शून्यकश्चिदये॥ उपायोऽन्यस्तुनास्त्येव कश्चिद्दृष्टःश्रमस्मते॥३४॥ सनिर्वासन
चित्तस्यहृदयेशाससंयमः॥ जायतेसहसैवाश्वप्रकाशाःक्रियाविना॥३५॥ इतितेशाससंरोधीमया
संकीर्तितोमुने॥ यःसामान्यविशेषाभ्यांत्रोक्तोयोगविशारदैः॥३६॥ यःशाससंयमनमन्यमती
हस्मिद्धयोगीपदर्शितपथेनपुमांस्तुधीरः॥ तस्यातिचंचलमपिप्रशमंसमेति मोक्षोन्मुखैकरिपुरा ॥११६॥

शुभमनोऽपिनूनम्॥३७॥ इति श्रीमत्सत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे योगोप
देशे शून्यकशासायामलक्षणनिरूपणनामा ॥५८॥ श्रीनारायणमुनिरु
वाच॥ पुंसामिलाधयितताशाणायामभिहांजसा॥ तेयानिनासान्निःश्वासेपंचतत्त्वानिसद्बुधा
॥१॥ दक्षपांपिंगलायां वासुषुम्णायांचयोगिना॥ वहंत्यांयच्चकर्त्तव्यंतेषुतदपितत्त्वतः॥२॥ सौ
रेश्वासांश्चतिप्यारीनपिलात्वायथागमम्॥ विदधीतयथाकालंयोगरूढःकजाःक्रियाः॥३॥ वि
स्तीर्णंसर्वमेतद्धिवर्त्ततेस्वरशासने॥ ब्रुवेतत्सारमात्रंसाधकानांहितायच॥४॥ तत्रपीतंचतुः
कोणंज्ञेयंतत्त्वंतुपार्थिवम्॥ श्वासस्तदामध्यगतिर्भवेच्चद्वादशांगुलः॥५॥ तदास्थिरःस्वभा
वःस्याद्धैर्येचतुरभोरुचि॥ पीतवर्णपदार्थानांसंकल्पश्चभवेद्धृदि॥६॥ एवंविधेधरातत्त्वेव
र्त्तमानेतुयोगिना॥ स्थिरकार्याणिकार्याणिस्वोचितान्येवनेतरम्॥७॥ वारितत्त्वंभवेच्छुक्लम
र्द्धचंद्रसमाकृति॥ अधोगतिस्तदाश्वासःषोडशांगुलमायतः॥८॥ तदास्वभावेचांचल्यंरसेहार्दं
तनंतरादि॥ भवेच्छुक्लपदार्थानांशांतिकर्माणिचाचरेत्॥९॥ तेजस्तत्त्वंभवेच्छोणंत्रिकोणमरुणो
गतिः॥ चतुरंगुलमूर्ध्वंचस्वभावेनीक्षणातदा॥१०॥ रूपेरुचिश्चशोणानांचिंतनंहृदयेभवेत्॥ त

॥सं॰जी॰पं॰५॥ रानीक्षा कर्म यत्नतो योगी स्वभ्योऽपि चिंतं चरेत् ॥११॥ वायुतत्त्वं हरिद्वर्णं वर्तुलं च गतिस्तदा ॥ स्पर्शो यस्या अ॰५९॥
॥११७॥ स्तं गुणं तिर्यक् तस्मात्स्वभावोऽतिचंचलः ॥१२॥ प्रीतिः स्पर्शसुखेऽपस्माद्दारिद्र्यं समानमे ॥ सैक
स्मस्तत्र कुर्वीत चरकर्माणि योगकृत् ॥१३॥ आकाशतत्त्वं रूपं संस्थाहिंदुवस्त्वत्सदा गतिः ॥ एकां
गुलं सर्वतस्तस्य भवेच्चु मस्य योगिनः ॥१४॥ स्वभावे शून्यता शब्दे रुचिः सैकत्वहीनता ॥ भवेत्तदा
नु कर्तव्यं योगिना न विचिंतनम् ॥१५॥ वेष्वादौ ऽतिमं तत्त्वे प्राणायामोऽधमध्यमः ॥ द्वितीये च
तृतीयेऽपि कनिष्ठस्तु तुरीयके ॥१६॥ रज्जुयामं वृत्तत्त्वे च वहन्स्वे च पिबेदपः ॥ पिंगलायामग्नितत्त्वे
भुक्तिं वोत्सर्गमाचरेत् ॥१७॥ सुषुम्णायां हरेर्ध्यानं कुर्याद्वा प्राणसंयमम् ॥ अन्यत्किंचिन्न कुर्वी
त स्थिरं कर्म यथा चलम् ॥१८॥ दिवा न वाहयेद्वामां जेनाडीं सौरीं तथा निशि ॥ कर्तव्येत्वं शुभा नाडी
तावत्तां विपरीतयेत् ॥१९॥ ज्ञेयश्चांद्रः सितः पक्षः कृष्णः सौरोऽथ योगिना ॥ सौम्यं शुक्ले दुर्गवी
ग्राणश्चेंदोः परे रवेः ॥२०॥ शुक्लप्रतिपदोऽमांतं त्रीणि त्रीणि दिनानि च ॥ तालयानि क्रमेणैव चंद्रस्य
च रवेः पुनः ॥२१॥ चांद्रां नाडीं विधीः पक्षतिथिवारसमागमे ॥ सौम्यं तथैव सूर्यस्य सर्वं कार्यं
हि सिध्यति ॥२२॥ एतेषां मिश्रतायां तु क्रूतायुः रैभस्य कर्मणः ॥ मनोभिजल्पितं तत्त्वं फलं नैव हि ॥११७॥

जायते ॥२३॥ इति तत्त्वादिरूपाणि तुभ्यं संक्षेपतो मया ॥ प्रोक्तानि तानि जानीयाद्योगकृत्स्वार्थसि
द्धये ॥२४॥ एतत्तत्त्वादिविज्ञानं पूर्वोक्तनियमस्थितेः ॥ भवेद्योगकृतः सर्वं न तु तद्वात्यवर्तिनः
॥२५॥ कुपथ्यभोजी वक्काशी प्रमादी व्यसनी सकृत् ॥ बहुभाषी दिवास्वापी कामी चैतन्न बुध्यते ॥
२६॥ प्राणायामप्रसंगेन तत्त्वादीन्निरूपितम् ॥ यज्ज्ञानेनाऽर्थसंसिद्धिरसिद्धिश्च दृश्यते ॥२७
॥ अंगानि चत्वारि मया सुबुद्धे योगस्य तुभ्यं स्फुटलक्षणानि ॥ निरूपितान्यन्यथ पंचशाणि फलै
ः सहानुक्रमतो वदामि ॥२८ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे यो
गोपदेशे तत्त्वादिज्ञाननिरूपणनामा ॥५९॥ श्रीनारायणमुनिरुवाच ॥ सत्त्वेभ्यो
विषयेभ्यो यत्र समाकर्षणमात्मनि ॥ इंद्रियाणां तु सर्वेषां स प्रत्याहार उच्यते ॥१॥ इंद्रियाणां पारतं
त्र्यादिमुक्तिर्योगिनस्त्विति ॥ प्रत्याहारस्य कथितं फलं योगविशारदैः ॥२॥ आधारादिषु चक्रेषु प्रा
णस्य मनसा सह ॥ हृदि वा भगवन्मूर्तौ धारणं धारणोच्यते ॥३॥ ध्यानसिद्धिर्धारणायाः फलं सद्भिर्वि
गद्यते ॥ तत्र ध्यानं प्रवक्ष्यामि योगस्यांगं हि सत्तमम् ॥४॥ षडंगाभ्यासतः क्षीणकर्मदोषस्य मानसे
॥ योगिना साधनीयं तद्भगवत्येव मद्धिकृत् ॥५॥ अस्ति नाभिहृदेशे पद्ममष्टपत्रमधोमुखम् ॥ कदली को

॥स॰जी॰पं॰ शसंकाशं चारुग्रीवं युगनालकम् ॥६॥ प्रणवध्वनिमित्तक्षिः कुर्वे चोर्ध्वमुखीकृते ॥ तेजोबिंबे वा श्र॰९०॥
॥११८॥ सुदेवचिंतनं ध्यानमुच्यते ॥७॥ भास्वत्कोटिसमप्रभं सुवदनं सत्पद्मपत्रेक्षणं कंठे कौस्तुभरा
जितं च मुरलीसंनादयंतं रमात् ॥ सर्वालंकृतिभूषणं सुमुकुटं कर्णोज्वलत्कुंडलं ध्यायेद्धरिं स्वं भु
जं च पीतवसनं श्रीवासुदेवं हरिं ॥८॥ भातं मौक्तिकपुष्पहाररततिभिर्लक्ष्म्यार्पिता लिंगिते हेमवि
भ्रतमुज्ज्वलं च रुचिरं सद्रत्नसत्रं प्रभुम् ॥ तं ध्यायन्सुरगणांबुजादिषु मनश्चांगेषु संधारयेत्प्रत्येकं
तु पृथक्पृथग्दमतिर्योगी चिरं सुस्थिरः ॥९॥ अवतारान्भगवतो वासुदेवस्य येऽनघ तान् ॥ तेष्वन्यत
ममभ्यग्रो ध्यायेद्वा योगसाधकः ॥१०॥ प्रतिमां वा यथारुच्यां ध्यायेद्भगवतोऽनघ सदृम् ॥ यत्किंचिद्धरिसं
बंधि वस्तु तद्ध्येयमुच्यते ॥११॥ ध्यानमभ्यसतो नित्यमिष्टं वै योगिनोऽचिरात् ॥ प्रेमाविर्भवते चित्ते सौ
ख्यानामगति चांकितः ॥१२॥ ध्यानस्थानानि देहेऽस्मिन्संत्यनेकानि योगिनः ॥ तत्रापि नाभिकंदेऽस्मि
न्हृदयेऽस्तीति तं शृणु ॥१३॥ नेत्रो मंडलके तस्मिन्ध्याता योगी यदीक्षते ॥ भगवंतं वासुदेवं सर्वदे
वाधिदेवतम् ॥१४॥ नरदेवनाद्याः सनकाद्याः संकुर्वंत सगुणैः सह ॥ निरोधं मनसश्चात्मा ध्येये समपदि विं
दते ॥१५॥ आयंति योगिनो नित्यं मत एव समाहिताः ॥ भगवंतं नाभिपद्मेन हृदि दृष्ट्वा प्रसिद्धिदे ॥१६॥ ॥११८॥

ध्यायेत भगवन्मूर्तिं नक्तं विश्राम्य तु विधाः ॥ पीडयंतीति तान्यत्वा त्याजयेद्धि दान्ततं द्विजः ॥१७॥ तत्रचा
रोऽजयः प्रोक्तो विक्षेपस्तदनंतरः ॥ कषायाख्यस्तृतीयः स्याद्रसास्वादश्चतुर्थकः ॥१८॥ चित्तावस्थाविशे
षाहि दोषा ते यामे बुधैः ॥ योगभ्रंशः स्यात् योगी संसृतिर्यात्स संशयम् ॥१९॥ तथा त्वबोधयेच्चित्तं
विक्षेपात्तु निवर्तयेत् ॥ कषायैक्षाजयेदुष्टाविरक्त्यावर्जयेद्रसान् ॥२०॥ नमित्यस्य तथा ध्यानं ध्या
नाभावे कुतः स्थितिः ॥ तां विना च कुतो मुक्तिर्ध्यानादौ पाकृयेत्ततः ॥२१॥ समाधिमष्टमं चांगं योग
स्याथ वदामि सः ॥ ध्यानान्यासविवृद्धेन प्रेम्णास्यान्मनसो हरौ ॥२२॥ एकैकावयवस्यैकपृथग्विचिंतनं
हरेः ॥ तत्तध्यानप्रकुर्वीत सर्वां मुर्तिं विचिंतयेत् ॥२३॥ नैरंतर्येण यन्मूर्तेः सर्वस्याश्चिंतनं हरेः ॥ स
समाधिरितिप्रोक्तो योगांगं योगवित्तमैः ॥२४॥ ध्येयाकारमनोवृत्तिप्रवाहः सुचिरं तु यः ॥ स संप्रज्ञा
तनामांगी समाधिः कथ्यते बुधैः ॥२५॥ ध्यानेंगेऽचांगिनि तथा समाधौ सूक्ष्मयारशा ॥ विज्ञो यस्त्वव
गंतयः पक्वा पक्वत्वभेदतः ॥२६॥ यथा वेदमधीयानोऽधीतवेदश्च पूरुषः ॥ वेदाध्यायकशब्देनेक्रमा
च्छूयाः प्रकीर्तिताः ॥२७॥ तथाऽत्र ध्यानवान्प्रोक्तस्तस्मादेगसमाधिमान् ॥ तस्यान्ये प्रष्टकथितः सं
प्रज्ञातसमाधिमान् ॥२८॥ अश्रवंगे पुनैतेषु बहिरंगान्तरंगता ॥ मोक्ता तत्राग्यंतरंगश्चेष्ठत्वं वि

दिसन्मते ॥ २९ ॥ पूर्वपुण्यप्रयोगसंस्कारैरगदादेवजन्मतः ॥ अंतरंगं समनी कुर्याद्बहिरंगास्तये क्रमम्
३० ॥ तन्त्रक एकांतिको विज्ञोः स्वेहस्मातिशायेनयः ॥ तस्मिन्समाधिप्राप्नोति सिद्धयस्तस्य विग्रहाः
३१ ॥ अणिमा महिमा प्राप्तिः प्राकाम्यं वशितेशिता ॥ लघिमा कामशूर्तिश्चैस्त्वेषु मुख्या हि सिद्धयः
॥ ३२ ॥ ज्ञातश्चोन्याश्चापि तपास्सिद्धयः संति मोहकाः ॥ तासु सक्तो न वेन्नैव योगी माहात्म्यविद्वरे ॥ ३३
॥ सिद्धिजालसमासक्तं योगिनं कालतुंधकः ॥ प्रमत्तं पश्चिलाम्बिवनिहे सेवनसंशयः ॥ ३४ ॥ तस्मा
न्मनः समाकृष्य सर्वतः परमात्मनि ॥ वासुदेवे समादध्यात्तानि मुक्तो यतो भवेत् ॥ ३५ ॥ अन्यत्र
नगकन्मूर्तेः कस्मिंश्चिदपि वस्तुनि ॥ मनो यस्यागसत्कस्मात्तस्य विघ्नो महान्भवेत् ॥ ३६ ॥ सक्तस्तु
च्छपदार्थेश्वयः सोऽज्ञो किकवस्तुषु ॥ सज्जेत न कथं योगी न गकद्दामवर्त्मनि ॥ ३७ ॥ अत्र सम
न्विरक्तमपरदतानवतो मुनेः ॥ कुत्रापि स्थानकेनास्ति विघ्नः कश्चन कर्हिचित् ॥ ३८ ॥ देवैः प्रजोभ्य
मानोऽपि तन्नलत्र न सिद्धिभिः ॥ उद्दालकादिमुनिवद्योगी नासज्जते कचित् ॥ ३९ ॥ अंगी समाधिरे
षोऽपि द्वैधासंप्रोच्यते बुधैः ॥ संप्रज्ञाताख्य एकोऽन्यस्त्वसंप्रज्ञातसंज्ञकः ॥ ४० ॥ लक्षणं तत्रचाद्यस्य श्रो
क्रमस्य कीर्तये ॥ चित्तस्य भूमिकास्तस्य प्रसंगाच्छृणु पंच च ॥ ४१ ॥ क्षिप्तं मूढं च विक्षिप्तमेकाग्रं ॥१२८॥

शतत्वानि तथान वरात्नानि च ॥ षट्पंचाशच्छताभिः शिराधमनिसंयुता ॥ १५ ॥ अंगप्रत्यंग
संधीनां बंधकाः स्नायवोऽपि च ॥ शतानि नव संतीह पेशयः पंचशतानि च ॥ १६ ॥ इमश्रुतिकेशास्त
थैवात्रिजक्षाणि देहिनाम् ॥ सप्तोत्तरं मर्मशतं सुखसंधिशतद्वयम् ॥ १७ ॥ शरीरे रोमाणां सर्वेषां
सूक्ष्माणः परमाणुभिः ॥ वायवी येः संविभक्ताः संति सेदायनैः सह ॥ १८ ॥ चतुःश्चाशदवोक्ताः
कोटयः ससाधिकानया ॥ षष्टिलक्षाणि पंचाशत्सहस्राण्येवतेमताः ॥ १९ ॥ नस्पृशन्दृश्यकेनापि
ज्ञातुं शक्यं कथंचन ॥ समाधिस्थैरिदं सर्वं दृश्यते सूक्ष्मदर्शिभिः ॥ २० ॥ सम्पकशरिणताहारसारस्यां
ज्ञत्तयोनव ॥ संतिदेहेदरशैवापाविज्ञाःसमाप्ताःसृजोऽस्थच ॥ २१ ॥ मूत्रपित्तश्लेष्माणां च चत्वारः पंच
षट्कमात् ॥ मज्जमेदोवसानीचाप्येकोदीचत्रयःक्रमात् ॥ २२ ॥ मस्तिकस्यांजलिश्चार्धस्तावान्श्लेष्म
रसप्रचारेतसोर्द्वइतिप्रोक्तासमधातुवपुःस्थितिः ॥ २३ ॥ देहस्य मध्ये हृदयं स्थानं तु मनसः स्मृत
म् ॥ कफस्य तु हृदयं स्थानं पित्तं नाभ्यां प्रतिष्ठितम् ॥ २४ ॥ पक्वाशयस्त्वधो नाभेरूर्ध्वमामाशयः स्मृतः
॥ मध्ये च जाठरो वह्निस्तयोस्तिष्ठति चासव ॥ २५ ॥ अंगानहतिस्तत्वकं रक्तं तु रेशुचसंमितः ॥ हेतुर्देह
स्थितेस्त्याः स्तिनाभिचक्रं तदंतरे ॥ २६ ॥ जीवो भ्रमति तन्मध्ये कुलएप पापप्रचोदितः ॥ प्राणारूढो यथा

॥स॰जी॰पं॰५ नानायते पजम् ॥ तत्र कोशाग्निना पक्वं मेदस्त्वं प्रतिपद्यते ॥ २ ॥ मेदःस्वकोशाग्निपक्वमस्थितां न अ॰६१॥
॥१२०॥ स्य वह्निना ॥ पक्वं मज्जा भवेत्सोपि शुक्रतां याति वह्निना ॥ ३ ॥ परिणामो न शुक्रस्य कोशाग्न्याद्युत्तरा
त्मनः ॥ रेभास्तंभत्वचरवपङ्क्तौ शादेहरूपिणः ॥ ४ ॥ अस्थ्नां शतत्रयं चास्ति नरदेहेषु षष्टियुक् ॥ दं
तास्तत्र चतुःषष्टिः संख्याता विंशतिर्नखाः ॥ ५ ॥ शलाकाः पाणिपादस्य संख्याता विंशतिः खलु
॥ अस्थ्नां षष्टिस्त्वंगुलीनामेकैकस्यास्त्रिकं त्रिकम् ॥ ६ ॥ गुल्फेषु संति चत्वारि पाष्ण्योर्द्वे प्रस्थिनी मते
॥ बाह्वोररत्निमानानि चत्वार्येव च जंघयोः ॥ ७ ॥ जानूरुफलककक्षंधकपोलस्य द्वयं द्वयम् ॥ नासिकास्
थ्नोणिफलके द्वे द्वे चैकं तु मेहने ॥ ८ ॥ हन्वावेकं पंचदशास्थ्नी वायां मनुगो द्वयम ॥ हनुमूले द्वे च पृष्ठे च
त्वारिंशत्तु पंच च ॥ ९ ॥ अक्षिगंडललाटे च द्वे द्वे चैकं न नास्ति स्थितम् ॥ अर्बुदैः स्याजकैः सार्द्धं पार्श्वास्थी
नि द्विसप्ततिः ॥ १० ॥ चतुष्टयं कपालानां शीर्षे स्वदेतु शंखयोः ॥ त्रिदिससदशास्थीनि पुंसस्त्वस्थि
संग्रहः ॥ ११ ॥ गंजोनास्निर्युर्देषु कं रक्तशो बीशिरोगलः ॥ प्राणस्यायतनास्य चरुरस्यादीनि संति च ॥
१२ ॥ वातपित्तश्लेष्मवहाश्चत्वारिंशाच्छिरा इह ॥ शाखाभेदैर्नवैतास्युः शतानि सप्त संख्यया ॥ १३ ॥ च
तुर्विंशतिसंख्याकाधमन्यो वायुवारकाः ॥ नाभिजातास्तु शाखाभिर्दशानेसंख्यया ॥ १४ ॥ एकोनत्रिं ॥१२०॥

द्देहभौतिकम् ॥ वीक्षते योगदृष्ट्या तद्योगवान्नेतरः परः ॥ ५० ॥ वाक्रैरेवचरणा ज्ञरूपापाः पात्र
तामुपगतेस्तु पात्वा ॥ योगिभिर्न्न किमपि त्यजनचा संमवर्ध्ये हत्व परत्र महर्षे ॥ ५१ ॥ इतिश्री सनंगि
जीवने नारायणचरित्रे धर्मशास्त्रोपदेशे योगोपदेशे भौतिकदेहविकारनिरूपणं नाम
६१ ॥ श्रीनारायणमुनिरुवाच ॥ कथयाम्यथ संक्षेपाद्ब्रह्मांडरचनामपि ॥ अधो
दशाक्रमेणैव सर्वा मूर्ध्वं रजावधि ॥ १ ॥ अधोरजोपरि महद्वर्त्तते वितलं जलम् ॥ तस्योपरि महाकु
र्म्मः शेषस्तस्यास्ति चोपरि ॥ २ ॥ सहस्रशीर्षत्कमिण्फणे तस्यापि जोपि च ॥ भूगोलोस्ति पुरे
ष्वस्य सप्तलोकान्नवंति हि ॥ ३ ॥ पातालजोकः प्रथमे पुरेस्ति मनोहरः ॥ वसंति वासुकिमुख्या
नागा यत्र फणोज्ज्वलाः ॥ ४ ॥ दैत्याश्च दानवाः संति तस्योपरि रसातले ॥ महातलेतु परि नागाश्च
तक्षकादयः ॥ ५ ॥ तलातलेस्ति तस्योर्ह्रमगणो मयदानवः ॥ तस्योपर्यस्ति सुतले बलिर्भगवना
मह ॥ ६ ॥ तस्योपर्यस्ति वशिवो वितले हारकेश्वरः ॥ तस्योपर्यतलेनास्ति सगणो बलदानवः ॥ ७ ॥
अष्टमोस्यंतरिक्षश्च लोकस्तन्मध्ये मेरुपर्वतः ॥ तस्योपरि पुरः संति ब्रह्मविष्णुकपर्दिनाम् ॥ ८ ॥ इंद्रा
दीनां दिक्पतीनां तत्तद्दिक्षु पुरोभवन् ॥ तत्रामरावतीमुख्याः संति हेमाचलेनघ ॥ ९ ॥ जंबूद्वीपस्त

॥स.जी.प्र.५ णां पुंसः स्वहस्तेनेनंनु पंजरे ॥२७॥ कंदपार्श्वं ऽस्ति परितः शक्ति कुंडलिनी मुने ॥ ब्रह्मरंध्रमुखं रुद्ध्वा स्वमुखा अ.६०॥
॥१२१॥ ग्रेवलयोरगी ॥२८॥ द्वासप्ततिः सहस्राणि नाड्यः कंदसमुद्भवाः ॥ प्रधानाः सर्वनाडीनां संति मुख्या
स्तु दृश ॥२९॥ सुषुम्णा पिंगलेडा च वारुणा च सरस्वती ॥ यशस्विनी हस्तिजिह्वा पूषा विश्वोदरा कु
हूः ॥३०॥ अलंबुषा च गांधारी शंखिनी च पयस्विनी ॥ नाड्यस्तिस्रः संति मुख्या एतास्वप्यादिमा मुने
॥३१॥ कंदमध्येऽथवा तत्र सुषुम्णोर्ध्वगतिश्च सा ॥ मूर्द्धं च ब्रह्मरंध्रे सा स्थिता नाऽतः सर्वतोऽधिका ॥३२॥ पिं
गला चोर्ध्वगा याम्ये नासांतं यावत्संस्थिता ॥ इडापि सव्यनासांतं सव्यभागेऽस्ति संस्थिता ॥३३॥ अध
श्चोर्ध्वं च विज्ञेया वारुणा सर्वगामिनी ॥ सरस्वती तथैवोर्द्धं माजिह्वाग्रा प्रतिष्ठिता ॥३४॥ यशस्विनी या
म्यभागे पादांगुष्ठांतमस्ति च ॥ हस्तिजिह्वा तथा सव्यपादांगुष्ठावधि स्थिता ॥३५॥ याम्ये पूषा च नेत्रां
तं पिंगला पार्श्वतः ॥ विश्वोदरा भिधा नाडी तु उदरमध्ये व्यवस्थिता ॥३६॥ कुहूर्वै नाभेस्तु सुषुम्णा या मे
ढ्रांतं च कुहूः स्थिता ॥ अलंबुषा तथा नाडी तु उदरमध्याऽरधो मुखी ॥३७॥ गांधारी सव्यनेत्रांतमिडाया
ः पृष्ठतः स्थिता ॥ आस्यया कर्णांतं च मुने शंखिनः स्युरूर्ध्वगामिनी ॥३८॥ पयस्विनी तथैवोर्ध्वं याम्ये क
र्णावधि स्थिता ॥ एतास्वन्याः सत्सुषुम्णाना नाड्यो ज्ञेयाः सहस्रशः ॥३९॥ रसादिस्वशरीरस्थं यत्किंचि ॥१२२॥

रूढमेव च ॥ चितं पंचविधं तेन तदंता भूमिका अपि ॥४२॥ आद्यद्वये तु शैकैव समाधेस्तत्र नास्ति
हि ॥ संदेहोऽस्ति च विक्षिप्ते तत्क चित्क ध्यानसंभवात ॥४३॥ संप्रज्ञातसमाधिस्तु चित्ते काग्रे समी
रितः ॥ रोधे तु सर्ववृत्तीनामसंप्रज्ञात उच्यते ॥४४॥ चेतसो विजये त्वत्र हरणं चानेदवारिधौ ॥ म
नः किंचित्तनानाति वा स्तु माभ्यंतरं तथा ॥४५॥ युक्त्या नेऽप्य पुनश्चित्तवृत्तीनां संभवोऽपि च ॥ नि
रिंधनाग्निवत्कुर्याच्छाम्यस्येव शनैः शनैः ॥४६॥ ततो योगी त्रयं तात्मा ब्रह्मरूपतया स्थितः ॥ अ
निर्वाच्यं महानंदं दृष्टयेऽनुभवत्स्वयं सौ ॥४७॥ यत्किंचित्स्वशरीरे स्यं स्थूलं सूक्ष्मं च भौतिकम् ॥
पश्यावत्किल तत्सर्वं समाधौ वीक्षते मुनिः ॥४८॥ ब्रह्मांडस्थं च यत्किंचित्तत्सर्वं स्वतनुवद्वरे ॥ सातंत्र्ये
ण क्षते चाऽसौ तत्तत्स्थानाद्यथनाखनन ॥४९॥ नाडीचक्रात्मदेहस्थितं यत्सम्यग्योगी वीक्षते सौ
तिकं च तत्तेसर्वं तत्त्वतो वच्मि विद्वन्शांसेरंत योगशास्त्रमप्युत्तमम् ॥५० ॥इति श्रीसत्संगिजीवने
नारायणचरित्रे धर्मशास्त्रे पंचमप्रकरणे योगोपदेशे प्रत्याहारधारणाध्यानसमाधिलक्षण
निरूपणं नामा ॥६०॥ श्रीनारायणमुनिरुवाच ॥ कोशा वपुषि पंचैव संति व
क्रिस्थान तया मताः ॥ पक्षिणोऽन्नरसः पक्षी नावरेणभवत्स्तक ॥१॥ स कोशास्थेन तत्स्कंवक्रि

मध्यतो वेष्टितः क्षारसिंधुना ॥ लक्षितो नवभिः स्वैर्वर्षैर्नवभारतादिभिः ॥ १० ॥ मेरुवर्षे तु पद्मोऽस्ति न 
चरं वेदरक्षाकृते ॥ हयग्रीवश्च भद्राश्वे हरिवर्षे नृकेसरी ॥ ११ ॥ कामदेवः केतुमाले मत्स्यमूर्तिश्च रम्य
के ॥ उपास्यो भगवानस्ति कूर्मरूपी हिरण्मये ॥ १२ ॥ वराहः कुरुवर्षेऽस्ति रामः किंपुरुषे तथा ॥ नर
नारायणऋषिरुपास्योऽस्मिंश्च भारते ॥ १३ ॥ क्षारोदवेष्टिता दस्माद्द्वीपा उत्तरउत्तरः ॥ द्विगुणो द्विगु
णो ज्ञेयो द्वीपोऽब्धिश्चापि तादृशः ॥ १४ ॥ जंबूद्वीपात्परः प्लक्षद्वीपोऽस्तीक्षुरसाब्धिना ॥ वृतस्तत्र हरि
र्वेदकैः सूर्यमूर्तिरुपास्यते ॥ १५ ॥ ततश्च शाल्मलिद्वीपः सुरोदेनाब्धिना वृतः ॥ वर्तते चंद्ररूपश्च त
त्रोपास्यो हरिर्जनैः ॥ १६ ॥ ततः परः कुशद्वीपो घृतोदाब्धिपरिवेष्टितः ॥ अस्ति तत्राग्निरूपश्च हरिर्लो
कैरुपास्यते ॥ १७ ॥ क्षीरोदाब्धिवृतश्चास्ति क्रौंचद्वीपस्ततः परः ॥ अंबुरूपस्तत्र लोकैर्भक्तैर्देव उपा
स्यते ॥ १८ ॥ दधिमंडोदाब्धिवृतः शाकद्वीपस्ततः परः ॥ वर्तते तत्र च जनैर्वायुर्हरिरुपास्यते ॥ १९ ॥
स्वादूदकाब्धिपरिवृतः पुष्करस्ततः परम् ॥ द्वीपोऽस्ति तत्र च ब्रह्मा पुष्करस्थ उपास्यते ॥ २० ॥ ततो ऽ
स्ति कांचनी भूमिर्लोकालोकस्ततो नगः ॥ तस्योपरि चतुर्दिक्षु चत्वारः संति दिग्गजाः ॥ २१ ॥ तत्रैव सा
क्षाद्भगवान्महापुरुष ईश्वरः ॥ आस्ते च लोकरक्षार्थं विष्वक्सेनादिभिर्वृतः ॥ २२ ॥ भूर्लोकाद्दृश्या 

र्द्धभुवर्लोकोऽस्ति सन्मते ॥ भूतप्रेतपिशाचानां तद्विहाररतिकेतनम् ॥ २३ ॥ भूमध्यगे च हेमाद्रौ
दिक्पालानां पुरोऽस्ति च ॥ सूर्योदिग्रहरथारूढो भ्रमति स्वं मध्यगः ॥ २४ ॥ उपर्युपरि संस्थेन मंड
लानि क्रमेण च ॥ चंद्रऋक्षशुक्रसौम्यांगारकदेवपुरोधसाम् ॥ २५ ॥ तदूर्ध्वं मंडलं पंगोस्ततः सप्तर्षि
मंडलम् ॥ ततः परं ध्रुवपदं वर्तते धाम वैष्णवम् ॥ २६ ॥ तत्समानप्रदेशोऽस्ति स्वर्गलोकोऽति शोभनः
॥ तत्रास्तीन्द्रस्त्रिलोकीशः सर्वदेवगणैः सह ॥ २७ ॥ शिशुमाराश्रितं तेजस्तत्पुच्छाग्रेऽस्ति ध्रुवश्चाधि
॥ ग्रहचक्रं तदुपरि महर्लोकोऽस्ति शोभनः ॥ २८ ॥ जनलोकस्तदुपरि तपोलोकस्ततः परम् ॥ एते
लोकास्त्रयः संति ऋषिमंडलसंस्थिताः ॥ २९ ॥ तदूर्ध्वं सत्यलोकोधाम विश्वसृजोऽस्ति तत् ॥ चतुर्दशै
ते लोकाश्च परितस्तमसा वृताः ॥ ३० ॥ अस्ति तस्मात्तु तमसः परं गंभीरकं मुने ॥ ततः परे चाष्ट संति
पृथ्व्याद्यावरणानि च ॥ ३१ ॥ ततोऽस्ति मूलप्रकृतिः परं ज्योतिस्ततः परम् ॥ तत्रैव भगवद्धाम यद्धंसा
पुरमुच्यते ॥ ३२ ॥ एवं स्थितेः च तत्सांख्ययोगाचित्तः समाधिना ॥ तत्स्वाद्यध्वनागत्वा तत्स्थानं समी
क्ष्यते ॥ ३३ ॥ सुषुम्णयैव भगवद्धाम यस्सूक्ष्मतः परम् ॥ तच्च दृष्ट्वा पुनर्देहं नैति कं शापवच्युते ॥ ३४ ॥ इ
त्यं समाधौ सात्तं मंत्रं मन्नारायणमवेत ॥ तस्मात्तमेव कृतार्थ्यं शिक्षेद्योगं गुरोर्बुधः ॥ ३५ ॥ भक्ति

